ISSN: 2320-740X

# शारदा

## वार्षिकपत्रिका



प्रधानसंपादकः

डा. एन्. आर्. कण्णन्

सम्पादकौ

डा. नवीनहोळ्ळः

डा. हरिप्रसादः के.

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७ १३९

२०१४-१५

# SHARADA

ISSN: 2320-740X

Chief Editor : Dr. N. R. Kannan

Editorial Board :

Dr. V. Naveena Holla
Dr. Hariprasad K.
Dr. Rajeshkumar Shukla
Smt. Kavitha S
Sri. Vinay M. S
Sri. Prashant R. Goankar
Kum. Annapoorna K.
Sri. Akshay N. Hegde
Sri. Umamaheshwara N.
Sri. Arun Sharma
Sri. Soorya Hebbar
Sri. Padmanabha Adiga
Sri. Gopalakrishna Hangari
Kum. Yogitha D. Chatre
Kum. Sarayu P.

Year of Publication: 2015
© Rashtriya Sanskrit Sansthanam (DU)
Rajiv Gandhi Campus,
Sringeri - 577 139, Karnataka

No. of Copies: 550

Published By:
The Principal
Rashtriya Sanskrit Sansthanam (DU)
Rajiv Gandhi Campus,
Sringeri - 577 139, Karnataka

DTP By:
Sri Pruthviraj K.

Designed By:
Sri K. V. Shashidhar, Sri Raveesha N.

Printed At:
Diganta Mudrana Ltd, Mangalore

© All rights are reserved for the Principal, Rajiv Gandhi Campus, Sringeri. Provided that contributors are responsible for their respective writing.

# शारदा

## धीनामवित्र्यवतु

### वार्षिकपत्रिका

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

प्रधानसंपादकः

डा. एन्. आर्. कण्णन्

सम्पादकौ

डा. नवीनहोळ्ळः
डा. हरिप्रसादः के.


राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

**श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम् दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी**



## Sri Sri Jagadguru Shankaracharya Mahasamsthanam
## Dakshinamnaya Sri Sharada Peetham, Sringeri - 577139

The Administrator
To His Holiness Sri Jagadguru -
Shankaracharya Dakshinamnaya -
Sri Sri Sharada Peetham,
Sringeri – 577139 (Karnataka).

पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्री राजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति । विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता

डा. वे. रा. गौरीशङ्करः

डॉ. बिनोद कुमार सिंह, कुलसचिव
Dr. Binod Kumar Singh, Registrar

RASHTRIYA SANSKRIT SANSTHAN
(Deemed University) (Ministry of HRD, GOI)
56-57, Institutional Area, Janakpuri,
New Delhi - 110058

राष्ट्रिय संस्कृत संस्थान (सम विश्वविद्यालय)



# MESSAGE

I am immensely delighted to know that Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Sringeri, brings out the Annual Magazine "SHARADA" and the issue for the academic year 2014-15 is set to be released during its ensuing Annual Day Celebrations.

I am glad to see that the magazine is a rare collection of vibrant ideas and an abundant source of knowledge with unique articles and thoughtful writings on versatile topics. I wish the magazine to suffuse students with noble thoughts and life skills and catapult them towards academic excellence.

I congratulate the faculty members, staff and students of the campus on adding another feather to their creative endeavour and compliment them for the efforts made by them in bringing out this magazine.

I also wish a grand success for the magazine to prove its excellence.

(Dr. Binod Kumar Singh)
Registrar
Feb., 23, 2015

राष्ट्रिय संस्कृत संस्थान (सम विश्वविद्यालय), 56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-110058
Tel.: 011-28520979 Fax : 011-28520976 E-mail : registrar.sansthan@gmail.com website : www.sanskrit.nic.in

RSkS

अस्मिन् हायनेऽस्माकं परिसरे संस्थानस्य युवमहोत्सवः अभूतपूर्वरीत्या सम्पन्नः यत्रास्माकं छात्रैः गतेषु वर्षेष्विव विजयवैजयन्ती समासादिता । तत्र निदानभूतौ स्पर्धिष्णुपरिषदध्वदर्शिनौ विद्वांसौ प्रो.का.ई.मधुसूधनन् डा .गणेश ईश्वरभट्टौ नितरां प्रशंस्येते ।

अस्याः पत्रिकायाः प्रकाशने; तथैव परिसरीयविविधकार्यक्रमेषु च कृतभूरिपरिश्रमाः वाग्वर्धिनीपरिषदः कार्यदर्शिप्रमुखाः ये सदस्याः छात्राः; ये च छात्राः महता परिश्रमेण विद्यामधिगत्य विविधासु स्पर्धासु भागं गृहीत्वा स्वीयं कौशलं प्राचीकटन् । तेषां सर्वेषां मङ्गलपर्म्परां कामये ।

अस्य परिसरस्य सर्वतोभावेन विकासे निदानभूतानां परिसरस्यास्य विषये परिपूर्णमनुग्रहं कुर्वतां ज्ञानतपोधनानां श्रीमज्जगद्गुरुशङ्कराचार्याणां श्रीभारतीतीर्थमहास्वामिनां सन्निधौ अनन्तान् प्रणामान् समर्प्य विरमामि ।

श्रीरामनवमी-स्थिरवासरः
28-03-2015

डॉ. एन्. आर्. कण्णन्

डा. एन्. अर्.कण्णन्.
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Dr. N. R.Kannan
Principal
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# पुरोवाक्

‘‘योनूचानः स नो महान्’’ इति श्रुतिवाक्यं ध्यायत् राष्ट्रियसंस्कृतसंस्थानं समग्रे देशे ज्ञानपरम्पराभिवृद्धौ भृशं प्रयतमानं वरीवर्ति । ‘‘अनूचानो वेदाध्यापक’’ इति भाट्टदीपिकायां प्रवर्ग्याधिकरणे (3.3.12) खण्डदेवाचार्या आहुः । वेदश्च वेदपादपस्तवे ‘‘अर्थज्ञानैकमूलः क्रमपदपुलिनो मन्त्रविस्तीर्णशाखः’’ इत्येवमर्थज्ञानात्मकमूलविशिष्टवृक्षरूपेण स्तुतः । अतो यथा वृक्षस्य रक्षा अभिवृद्धिश्च मूलरक्षणेन भवति तथा वेदस्यापि रक्षाभिवृद्धी अर्थज्ञानरक्षणद्वारा भवति । वेदार्थज्ञानार्थमेव च विविधानि शास्त्राणि इत्यतः संस्थानेन शास्त्राण्यध्याप्यन्ते । तस्य च एकादशसु परिसरेषु शृङ्गेरीस्थो राजीवगान्धीपरिसरो वस्तुतः बहुभिरनूचानैर्विद्वद्भिरध्यापकैर्युक्तः अत एव विद्वत्कमलभ्रमद्भृङ्गायमाणसच्छिष्यवर्गयुक्तश्च विराजमानो नितरां शोभते ।

अत्र च छात्राः सततमध्ययनरताः श्रद्धालवः गुरुभक्ताः विविधकर्मकुशलाश्च राजन्ते । तत्र परिसरे विदुषां मुदे छात्राणां ज्ञानाभिवृद्धये च विविधा गोष्ठ्यः समायोज्यन्ते अनेके ग्रन्थाश्च प्रकाश्यन्ते । तत्र छात्राणां सर्वविधकल्याणाय सङ्घटिता वाग्वर्धिनीपरिषदा प्रतिसप्ताहं छात्राणामेका वादगोष्ठी समायोज्यते । प्रतिहायनं शारदानाम्नी पत्रिका च प्रकाश्यते । ऐषमोऽपिल वाग्देवताया अनुग्रहेण अस्याः परिषदः अध्वदर्शिनोः विदुषोः नवीनहोळ्ळहरिप्रसादयोः नेतृत्वे छात्राणां वादगोष्ठ्यः समायोजिताः, सम्प्रति शारदापत्रिका च प्रकाश्यत इति महतो हर्षस्य विषयः । अत्र अस्य परिसरस्य अध्यापकाः महत्त्वपूर्णान् स्वशास्त्रीयविषयविषयकान् लेखान् विलिख्य ज्ञाननिधिं वर्धयन्ति, छात्राश्च स्वीयलेखप्रकाशनद्वारा स्वीयप्रतिभां प्रकटयन्तीति सर्वेऽप्येतेऽभिनन्द्यन्ते ।

अस्याः पत्रिकाया विषये स्वीयशुभाशयान् प्रेषितवद्भ्यः संस्थानस्य कुलसचिवेभ्यः डा .बिनोदकुमारसिंहवर्येभ्यः कार्तज्ञ्यं निवेदयामि । पत्रिकासम्पादकयोः वाग्वर्धिनीपरिषदध्वदर्शिनोः अध्यापनादिच्छात्रहितकारिविविधकर्मसु बद्धश्रद्धयोः डा . नवीनहोळ्ळ डा .हरिप्रसादमहोदययोर्विषये साधुवादान् प्रयुञ्जे ।

सार्वत्रिकं विद्यावितरणमिति अर्वाचीनवर्त्म । पात्र एव विद्याप्रदानं नापात्र इति प्राचीनसरणिः । तदुक्तम् –

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ।। (मनुस्मृतिः)

नास्तिकाय कृतघ्नाय दुराचाररताय वै ।
गुरुभक्तिविहीनाय दातव्यं न कदाचन ।।
सेवापराय शिष्याय हितपुत्राय मारुते ।
मद्भक्ताय सुशीलाय कुलीनाय सुमेधसे ।।
सम्यक् परीक्ष्य दातव्यम् ।। (मुक्तिकोपनिषत्)

अपात्रेभ्यः संरक्षणेन विद्या विदुषो निधिरिव वीर्यवती भवति ।
विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवे शठाय मा मा ब्रूमा वीर्यवती तथा स्याम् ।।

आधुनिकेऽपि काले आत्मविद्येव वीर्यवत्तमा मन्त्रयोगादिविद्याः विना पात्रोपलब्धिं सिद्धविद्यानां मुखकुहरान्नैव बहिरायान्तीति नाविदिततथ्यं विज्ञानाम् । अपात्राय गुरुणा वितीर्णापि विद्या न तेन गृह्यते, गृहीतापि न धार्यते, धृतापि न साधु फलति, विपरीतं वा फलति ।

हृदयं बुद्धिं कण्ठं वा गता विद्या पुरा बभूव, न लिपिबन्धमनुबभूव । इत्थं परैः श्रवणेनैव उपलभ्यमानतया शब्दात्मको वेदः श्रुतिरित्यभिधामवाप । शास्त्राण्यपि व्याकरणादीनि सूत्रात्मना ग्रथितानि कण्ठस्थीकरणसौकर्याय । सम्प्रति अध्येतॄणां धारणसामर्थ्यन्यूनतापरिहाराय सलिपिबन्धं विद्या पुस्तकेषु विन्यस्यते ।

प्राचीनशास्त्राणाम् आधुनिकपद्धत्या अध्ययनाध्यापनाभ्यां प्रसारणाय बद्धदीक्षोऽयं परिसरः वार्षिकपत्रिकायाः शारदायाः 2014–15 वर्षीयसञ्चिकां प्रकाशयति । परिसरीयानां प्राध्यापकानां छात्राणाञ्च शास्त्रीयैः लौकिकैः वैज्ञानिकैः भावपूर्णैश्च विविधैर्लेखैः परिपुष्टिमुपगता एषा अदसीयवैदुष्यप्रतिभयोः दर्पणायते । परिसरेऽत्रे छात्राः शैक्षिक–सांस्कृतिक–क्रीडाप्रतिभानां प्रकटीकरणाय विकासाय च विपुलानवसरान् लभन्ते । तेषां ऐषमः विजययात्रावृत्तान्तं पत्रिकेऽयं सचित्रमावहति । पत्रिकाया अस्याः प्रकाशनाय अनुमतिं प्रदाय मार्गदर्शनं कृतवद्भ्यः प्राचार्येभ्यः डा ।। एन् . आर् . कण्णन्वर्येभ्यः कार्तज्ञं विनिवेदयावः । पत्रिकामुद्रणाय अपेक्षितवित्तसाहाय्यस्य प्रदातृभ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवेभ्यः डा ।। विनोदकुमारसिंहमहोदयेभ्यः प्रणतिततिं विज्ञापयावः । उत्तमलेखप्रदानेन उपकृतवतः प्राध्यापकान् वन्दावहे । पत्रिकासम्पादनकर्मणि कृतोद्यमाः हिन्दी प्राध्यापकः डा. राजेशकुमारशुक्लमहोदयः, आङ्ग्लप्राध्यापकः श्री विनयमहोदयः, कन्नडप्राध्यापिका श्रीमती कविता, सङ्गणकशिक्षकौ श्री के. वि. शशिधरः–श्री रवीशवर्यः, टङ्कणकर्ता श्री पृथ्वीराजः इमानि सर्वान् कार्तज्ञ्यवाचा अभिनन्दावः । छात्रहिताय सङ्घटितायाः वाग्वर्धिनीपरिषदः सर्वेऽपि सदस्याः आवर्षम् अनवरतं सोत्साहं परिसरीयसकलकार्यक्रमाणां साफल्याय परिश्राम्यन्ति । पत्रिकासम्पादनेऽपि नितराम् उपाकुर्वन् । रवीन्द्रगणपतिकोमारः, गणेशप्रसादः, विनयकिरणः एच्. एते छात्राः विशेषतः पत्रिकासम्पादनकार्ये साहाय्यमाचरन् । अन्येऽपि छात्राः लेखप्रदानादिना सहयोगं व्यदधुः । तान् सर्वानपि साधुवादेन अभिनन्दावः । विद्याधिदेवतायाः शृङ्गेरीक्षेत्राधिष्ठात्र्याः श्रीशारदाम्बायाः असीमानुकम्पया ज्ञानतपोमूर्तीनां जगद्गुरूणाम् अनन्तश्री विभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां परिपूर्णानुग्रहेण च परिसरोयं सकलविधश्रेयोभाजनं वर्तते । अतः श्रीशारदामातुः जगद्गुरूणाञ्च चरणनलिनेषु सभक्तिश्रद्धं प्रणमावः ।



Dr. Naveena Holla



Dr. Hariprasad K.

# सम्पादकीयम्

विद्यायामधीतौ च प्राचीनार्वाचीनसरण्योर्महदेव अन्तरमाविरस्ति । भवबन्धविमोचको निर्विकल्पतत्त्वसाक्षात्कार एव प्राधान्येन विद्यापदेन अभिधीयते, 'सा विद्या या विमुक्तये', 'विद्ययाऽमृतमश्नुते', 'द्वे विद्ये वेदितव्ये परा चैवापरा च', 'अथ परा यया तदक्षरमभिधीयते' इत्यादिवचनात् । चित्तशुद्धिद्वारा तत्त्वज्ञानोपयोगिनो देवतोपासनस्यापि विद्येति व्यपदेशो मुख्यः, 'विद्यया देवलोकः' इति श्रुतेः । भवचक्रप्रवर्तकं सविकल्पकं शिक्षाव्याकरणादिशब्दजालोपबृंहितम् अवशिष्टाशेषज्ञानराशिं तु गौण्या अभिधत्ते विद्यापदम् । वेदवेदाङ्गस्मृतिपुराणादीनि उपवेदान्तानि अष्टादशविद्यास्थानानि अत्रैवान्तर्भवन्ति, 'तत्रापरा ऋग्वेदो यजुर्वेदः .. शिक्षा कल्पो व्याकरणं ..' इति श्रुतेः । चतुष्षष्टिकलाः गीत–वाद्य–नृत्य–नाट्य–वास्तु–वैनायिकी–वैजयिकी–वैतालिकी–विद्याप्रभृतयोऽप्यत्रैवान्तर्गताः । भौतिकार्थविषयकमिममेव ज्ञानराशिं विद्यामभिमन्यते आधुनिको लोकः ।

यद्यपि वेदस्मृतिपुराणादीनां धर्माधर्म–कर्तव्याकर्तव्यविवेकदृष्टिसम्पादकतया चित्तशुद्धिद्वारा तत्त्वोज्ञानोपयोगिता देवतोपासनस्येव सम्भवत्येव । तथा चाभियुक्तोक्तिः 'सच्छास्त्रजन्मा हि विवेकलाभः' इति । तथापि तेषां विवेकदृष्टिसम्पादकत्वं चित्तशुद्ध्याधायकत्वं वा न नियतम् । भगवदुपासनमन्तरा वेदशास्त्रादिविद्यामात्रेण चित्तशोधनासम्भवात् । तदुक्तम् –

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ।। (भागवतम्–11.14.22)

भक्तिर्हि उपासनाविशेष एव । शास्त्राधीतेः चित्तशुद्धिसम्पादकत्वनैयत्याभावश्च अन्यत्राप्युक्तः –

इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोयं धर्मस्याष्टविधः स्मृतः ।।
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरश्च चतुर्वर्गो नामहात्मसु तिष्ठति ।। (महाभारतम्, उद्योगपर्व 35.57)

उपासनायाः चित्तशोधकत्वं स्पष्टमेवोपवर्णितम् –

यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपम् ।
आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ।। (भागवतम्–11.14.25)

तस्मात् वेदस्मृतिपुराणादिष्वपि विद्याशब्दप्रयोगो न मुख्यः ।

# Department of Navya Nyaya



Prof. K. E. Madhusudhanan
Professor, HoD



Dr. V. Naveen Holla
Asst. Professor



Sri Shyamsundar
Contract Teacher



Sri R. Naveen
Contract Teacher

# Department of Phalita Jyotisha



Dr. Ishwar Bhat
Associate Professor, HoD



Dr. Ramakrishna Pejathaya
Contract Teacher



Dr. Muralikrishna T.
Contract Teacher

# FACULTY OF THE CAMPUS




Dr. N. R. Kannan
Principal of the Campus

## Department of Advaita Vedanta



Prof. Mahabaleshwara P. Bhat
Professor, HoD



Dr. Ganesh Ishwar Bhat
Asst. Professor



Dr. Srikara G. N.
Contract Teacher



Sri Ganapati V. Hegde
Contract Teacher

# Department of MImamsa



Dr. Suryanarayana Bhat
Asst. Professor, HoD



Dr. S. V. Tatacharya
Asst. Professor

# Modern Subjects



Dr. Rajesh Kumar Shukla
Contract Teacher, Hindi



Smt. Kavitha S.
Contract Teacher, Kannada



Sri Prabhakara M. A.
Contract Teacher, History



Sri Vinay M. S.
Contract Teacher, English



Sri Ramachandra H. D.
Guest Teacher, Physical Education



Sri Shashidhar K. V.
Guest Teacher, Computer Science



Sri Raveesha N.
Guest Teacher, Computer Science

# Department of Navya Vyakarana



Dr. CSSN Murthy
Associate Professor, HoD



Dr. Chandrashekhara Bhat
Asst. Professor



Dr. K. Padmanabham
Asst. Professor



Dr. Vinayaka Rajat Bhat
Contract Teacher



Dr. Pramod Bhat
Guest Teacher

# Department of Sahitya




Dr. Raghavendra Bhat
Asst. Professor, HoD



Dr. Ramachandra Joisa
Asst. Professor



Dr. Chandrakala R. Kondi
Asst. Professor



Dr. Vinay Kumar Kompelli
Contract Teacher



Dr.Srinivasa Murthy
Guest Teacher

# Non Teaching Staff


Sri S. K. Mahapatra
Section Officer


Sri Ghananand Tripathi
Asst. Librarian


Sri Gururaj Bhat
U. D. C.


Sri S. R. Chandrashekar
L. D. C.


Smt. Manjula
LDC


Sri Pruthviraj K.
DEO (MSP)


Sri Dinesh S.
Group 'C'


Sri H. Kumar
Group 'C'


Sri Shivanna S.
Group 'C'


Smt. Siddamma
Group 'C'


Sri Mohammad Rafeeq
Group 'C'


Sri Sandeep Kumar M. R.
Group 'C'


Smt. Jayamma
Safai Karmachari


Smt. Timmamma
Safai Karmachari


Sri Umesh H. S.
Hostel Attendent

# Department of Shiksha Shastra



Prof. A. P. Sachidananda
Professor, HoD



Dr. Chandrakant
Asst. Professor



Dr. R. Balaji
Asst. Professor



Dr. Hariprasad K.
Asst. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Somanath Sahu
Asst. Professor



Dr. Venkataramana Bhat
Asst. Professor



Dr. Kumar
Guest Teacher

# Vagvardhini Parishad


Dr. V. Naveena Holla
Co-ordinator


Dr. Hariprasad K.
Co-ordinator


Dr. Chandrakant
Sports Incharge


Prashant R. Gaonkar
General Secretary


Annapoorna K.
Genaral Secretary


Dayananda Sharma
Spardishnu Parishad
Secretary


Umamaheshwara N.
Spardishnu Parishad
Secretary


Uma V. Bhat
Spardishnu Parishad
Secretary


Nagapati Hegde
Cultural Secretary


Manjunatha Bhat
Cultural Secretary


Ahalya Bhat
Cultural Secretary


Adarsha T. A
Sports Secretary


Megha S. Bhat
Sports Secretary


Ravindra Komar
Sharada Prasada
Management


Ganesha Krishna Bhat
Sharada Prasada
Management


Akshay Hegde
Magazine Secretary


Gopalakrishna Hangari
Website Designer


Yogita D. Chatre
News Editor


Pankaj Bhat
Environment Secretary


Maheshwari
Environment Secretary

# Co-ordinators of Various Activities



Prof. K. E. Madhusudhanan
Co-Ordinator, Spardhishnu Parishad



Dr. Ganesh Ishwar Bhat
Co-Ordinator, Spardhishnu Parishad



Dr. Somanatha Sahu
Co-Ordinator, Sharada Vishishta Vyakhyanamala



Dr. Ramachandra Joisa
Co-Ordinator, Sharada Vishishta Vyakhyanamala



Dr. Raghavendra Bhat
Co-Ordinator, Vakyartha Parishad



Dr. Sooryanarayana Bhat
Co-Ordinator, Vakyartha Parishad



Dr. Chandrakant
Co-Ordinator, MSP



Dr. Somanatha Sahu
Co-Ordinator, MSP

# Editorial Board





Dr. N. R. Kannan
Chief-Editor



Dr. Naveena Holla



Dr. Hariprasad K.



Dr. Rajesh Kumar Shukla



Sri. Vinay M. S.



Smt. Kavitha S.



Prashant R Gaonkar



Annapoorna K.



Akshay N. Hegde



Umamaheshwara



Arun Sharma



Soorya Hebbar A.



Padmanabha Adiga T.



Gopalakrishna



Sarayu P.



Yogitha D. Chatre



Shashidhar K. V.
Page Designer



Raveesha N.
Page Designer



Pruthviraj K.
DTP

# Class Representatives


Niharranjankar
Acharya-II


Sumedha K. K.
Acharya-II


Swarnadatta
Acharya-I


Binita Tappo
Acharya-I


Arun Bhat
Shiksha Shastri-A


Sahana S. P.
Shiksha Shastri-A


Shashank T. Bhat
Shiksha Shastri-B


Swagatika Mohanti
Shiksha Shastri-B


Padmanabha Adiga T.
Shastri-III


Nikhita J. Nayak
Shastri-III


Akshay Bhat
Shastri-II


Bhavani R.
Shastri-II


Karthikesha
Shastri-I


Shrivalli
Shastri-I


Mahesh Kumar
Prak-Shastri-II


Devikrishna
Prak-Shastri-II


Shripada H. R.
Prak-Shastri-I


Tridala
Prak-Shastri-I

## संस्कृतविभागः


| | लेखः | लेखकः | पृष्टसङ्ख्या |
|---|---|---|---|
| 1. | आत्मानुभूतिः | प्रो. महाबलेश्वर पि. भट्टः | 03 |
| 2. | सूर्यचन्द्रग्रहणयोः छेद्यसाधनोपायः | डा. ईश्वर भट्टः | 04 |
| 3. | योगः योगाङ्गानि च | डा. सि. एस्. एस्. एन्. मूर्तिः | 09 |
| 4. | रोजर्स्–महोदयस्य व्यक्तित्वविकासवादविचारः | डा. चन्द्रकान्तभट्टः | 12 |
| 5. | स्वामिविवेकानन्दमहोदयस्य शिक्षादर्शनम् | डा. रामचन्द्रुलबालाजि | 15 |
| 6. | पश्य मृगो धावति इति वाक्यार्थविचारः | डा. चन्द्रशेखरभट्टः | 21 |
| 7. | निर्गुणब्रह्मोपासनम् | डा. गणेशईश्वरभट्टः | 23 |
| 8. | रत्नमन्विष्यते | डा. राघवेन्द्रभट्टः | 28 |
| 9. | ज्ञानसूचनयोः प्रसारणस्य प्राचीनप्रविधयः | डा. हरिप्रसादः के. | 33 |
| 10. | आयुर्वेदे स्वास्थ्यसम्पादनम् | डा. रामचन्द्रजोयिसः | 35 |
| 11. | विरोधाधिकरणम् | डा. सूर्यनारायणभट्टः | 37 |
| 12. | शास्त्रशस्त्रो माघः | डा. गणेश टि. पण्डित् | 41 |
| 13. | ज्ञानं विज्ञानञ्च | डा. वेङ्कटरमणभट्टः | 42 |
| 14. | शक्तिग्रहोपायविमर्शः | श्री श्यामसुन्दरभट्टः | 46 |
| 15. | पलभाविचारः | डा. रामकृष्णपेजत्तायः | 49 |
| 16. | प्रामाण्योत्पत्तौ परतस्त्वसमर्थनम् | श्री आर्. नवीनः | 51 |
| 17. | जिज्ञासाधिकरणभाष्यस्य रत्नप्रभान्यायनिर्णयव्याख्यानयोः –तुलना | डा. जि. एन्. श्रीकरः | 53 |
| 18. | वैदिकतत्त्वानां वैज्ञानिकदृष्ट्या अवलोकनम् | डा. विनायकरजतभट्टः | 56 |
| 19. | मोक्षस्वरूपम् | श्री गणपतिहेगडे | 59 |
| 20. | काव्यसौन्दर्यसम्पादने अलङ्काराणां स्थानं, तत्स्वरूपम् | डा. के. विनयकुमार् कोम्पेल्लि | 60 |
| 21. | अलङ्कारशास्त्रे भक्तिरसस्य विकासक्रमः | डा. श्रीनिवासमूर्तिः | 66 |
| 22. | महाभारते वैज्ञानिकदृष्ट्या अनुसन्धेयाः जननविचाराः | डा. प्रमोदभट्टः | 70 |
| 23. | व्याकरणशिक्षणे आगमनविधिः | डा. कुमारभट्टः | 74 |
| 24. | बृहज्जातकस्य प्रसूतिकाध्यायोक्तयोगानां प्रश्नोपयोगित्वम् | प्रसादभट्टः, शोधच्छात्रः | 78 |
| 25. | श्रीपत्युक्तदृष्टिगणितस्य सोपपत्तिकं निरूपणम् | रमानन्दभट्टः, शोधच्छात्रः | 82 |
| 26. | सहृदयनिरूपणम् | नरेन्द्र बि. एस्., शोधच्छात्रः | 87 |
| 27. | लक्षणानिरूपणम् | राजेश एम्. डि., शोधच्छात्रः | 90 |
| 28. | जैमिनीयम् आयुश्चिन्तनम् | श्रीपतिः, शोधच्छात्रः | 94 |
| 29. | शास्त्रमालावृत्त्यनुसारं धर्मलक्षणम् | राजेन्द्रभट्टः, शोधच्छात्रः | 97 |




ISSN : 2320-740X

| | | | |
|---|---|---|---|
| 30. | रसस्वरूपम् | विनायकहेगडे, शोधच्छात्रः | 100 |
| 31. | यन्त्रेषु शङ्कुः | यज्ञदत्तः, शोधच्छात्रः | 102 |
| 32. | उपनयनमुहूर्तः | सुब्रह्मण्यभट्टः, शोधच्छात्रः | 106 |
| 33. | न्यायदर्शने द्रव्यस्थैर्यसिद्धान्तः | राकेश पि., शोधच्छात्रः | 110 |
| 34. | अज्ञानध्वान्तचण्डभास्करग्रन्थोक्तदिशा वासनाक्षयविचारः | विक्रान्त केल्करः, शोधच्छात्रः | 113 |
| 35. | शास्त्रेषु लौकिकन्यायानामुपयोगः | सुनीता भट्टः, शोधच्छात्रा | 116 |
| 36. | अथ शब्दानुशासनम् | टि. आर्. कृष्णमूर्तिः, शोधच्छात्रः | 119 |
| 37. | न हि पदान्ताः परेऽणः सन्ति इति वाक्यतात्पर्यविमर्शः | भारती एस्., शोधच्छात्रा | 122 |
| 38. | धात्वर्थविचारः | राघवेन्द्र पि. आरोल्ली, शोधच्छात्रः | 126 |
| 39. | रामपाणिवादविरचितं 'मदनकेतुचरितं' प्रहसनम् | दीपा हेगडे, शोधच्छात्रा | 129 |
| 40. | आत्मस्वरूपम् | युवराज घिमिरे, शोधच्छात्रः | 132 |
| 41. | साङ्ख्यवेदान्तदर्शनयोः अव्यक्ततत्त्वम् | गीता याजी, शोधच्छात्रा | 133 |
| 42. | लघुपाणीनीयग्रन्थस्य परिचयः वैशिष्ट्यञ्च | आनन्द पाण्ड्या, शोधच्छात्रः | 137 |
| 43. | न्यायनये अपवर्गसाधनसरणिः | सुमेधा के. के., आचार्यद्वितीयवर्षम् | 139 |
| 44. | आनन्दवर्धनोक्तं चित्रकाव्यम् | पङ्कजभट्टः, आचार्यद्वितीयवर्षम् | 141 |
| 45. | छन्दःश्शास्त्रम् & Digital Electronics | उमामहेश्वर एन्., आचार्यद्वितीयवर्षम् | 143 |
| 46. | काव्यलक्षणार्थः | स्वर्णदत्तः, आचार्यप्रथमवर्षम् | 146 |
| 47. | कर्माजीवविचारः | गणेशकृष्णभट्टः, आचार्यप्रथमवर्षम् | 149 |
| 48. | वेदोक्तकर्मणां फलसाधनत्वम् | राजेशहेगडे, आचार्यप्रथमवर्षम् | 150 |
| 49. | संस्कृते विज्ञानम् | मञ्जुनाथभट्टः, आचार्यप्रथमवर्षम् | 152 |
| 50. | प्राचीनं भूकम्पविज्ञानम् | सुब्रह्मण्यभट्टः, शिक्षाशास्त्री | 153 |
| 51. | शुभकर्मणां कालविभागः | श्रीहरिश्ङ्करशर्मा, शिक्षाशास्त्री | 155 |
| 52. | योगशास्त्रोक्तसमाधिविचारः | कृष्णमूर्तिहेगडे, शिक्षाशास्त्री | 157 |
| 53. | ईश्वरस्य अशरीरित्वम् | वाणी हेगडे, शास्त्रि तृतीयवर्षम् | 158 |
| 54. | तत्त्वानि | ब्रह्मानन्दः, शास्त्रि तृतीयवर्षम् | 160 |
| 55. | भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि इति सूत्रार्थविचारः | मुकेश् शर्मा, शास्त्रि द्वितीयवर्षम् | 161 |
| 56. | पाणिनीयाष्टके संस्कृतस्य लोकव्यवहारसमीक्षा | योगिता डि. छत्रे, शास्त्रि द्वितीयवर्षम् | 164 |


## हिन्दी विभाग


| | | | |
|---|---|---|---|
| 1. | महाभारत में शिक्षा का स्वरूप | डा. सोमनाथ साहु | 169 |
| 2. | आज की हिन्दी कविता और् कविता का भविष्य | डा. राजेश कुमार शुक्ला | 173 |
| 3. | उत्तरमीमांसा–वेदान्तदर्शन एवं शङ्कराचार्य | निहार रञ्जन कर, आचार्य द्वितीय वर्ष | 178 |



ISSN : 2320-740X

| | | | |
|---|---|---|---|
| 4. | भारतीय समाज में सात पी में सुधार की आवश्यकता | रविशङ्कर द्विवेदी, शास्त्रि तृतीय वर्ष | 180 |
| 5. | इश्क | घनश्याम, शास्त्रि प्रथम वर्ष | 183 |
| 6. | बडा ही महत्व है | रोहित कुमार, शास्त्रि प्रथम वर्ष | 184 |


**English Section**


| | | | |
|---|---|---|---|
| 1. | The Motor Homunculus or Little man | Dr. Naveen Holla | 187 |
| 2. | Premchand's Godan | Sri Vinay M. S. | 188 |
| 3. | Interdisciplinary approach with different models | Sri Ramachandra H. D. | 190 |
| 4. | The Challenges in Studying Sanskrit | Nagapati Hegde A-I | 192 |
| 5. | Effects of Television | Omkar B.Ed. | 193 |
| 6. | A life of Contentment | Vibha Kumari S-III | 193 |
| 7. | Importance of Agriculture in India | Akshay Bhat S-III | 195 |
| 8. | Contemplation on Continence | Hamsaveni S-II | 196 |
| 9. | Knowledge in Epistemology | Subray Hegde S-II | 197 |
| 10. | Let the food giver be happy | Maheshwari S-II | 198 |
| 11. | Cell Phone and Tower Radiation Hazards | Kishor S-III | 199 |
| 12. | Role of Youth in Environmental Conservation | Kshama Kamath P.S. I | 201 |
| 13. | Narendra Modi | Anusha G. Nayak P.S. I | 203 |


**ಕನ್ನಡ ವಿಭಾಗ**


| | | | |
|---|---|---|---|
| 1. | ತೇಜಸ್ವಿ ಸಾಹಿತ್ಯ ಮತ್ತು ಪರಿಸರ ಪ್ರಜ್ಞೆ | ಶ್ರೀಮತಿ ಕವಿತಾ ಎಸ್. | 207 |
| 2. | ಶಾಸನೋಕ್ತ ಕರ್ನಾಟಕ ಕಾಶ್ಮೀರ ಸಂಬಂಧ | ಶ್ರೀ ಎಮ್. ಎ. ಪ್ರಭಾಕರ್ | 213 |
| 3. | ಹುಟ್ಟಿದ ದಿನವೇ | ನಿರಂಜನ ಭಟ್ A–I | 215 |
| 4. | ಮುನ್ನವೇ ಭಕ್ತಿ ಕ್ರಿಯೆಯಿಂದಂ | ಭೀಮಾನಂದ ಎಚ್. A- II | 216 |
| 5. | ಅಜ್ಜನ ನೆನಪು | ಪ್ರಶಾಂತ ಗಾಂವ್ಕರ್ A-II | 219 |
| 6. | ಮೊಬೈಲ್ ಗಳು ಆರೋಗ್ಯದ ಕೇಡಿಗಳು | ನಾರಾಯಣ ಹೆಗಡೆ S-III | 220 |
| 7. | ನನ್ನ ಹೆಮ್ಮೆಯ ಭಾರತ | ಗಣೇಶ ಆರ್. ಭಟ್ S-III | 223 |
| 8. | ಉಳಿದವರು ಕಂಡಂತೆ | ಶ್ರೀಪತಿ ಭಟ್ S-III | 224 |
| 9. | ಪ್ರೀತಿಯೆಂಬ ಅಮೃತ | ರಾಜೇಶ್ವರಿ ಹೆಗಡೆ S-III | 226 |
| 10. | ಒಂದು ಮಾತು ಒಂದೇ ಮಾತು | ಪದ್ಮನಾಭ ಅಡಿಗ ಟಿ. S-III | 227 |
| 11. | ಪ್ರೇಮದ ನಡುವೆ | ರಮೇಶ ಬಿ. ಸಿ. S-II | 228 |
| 12. | ಪುನರುಜ್ಜೀವನದ ಮಾರ್ಗ | ವೆಂಕಟೇಶ S-II | 229 |
| 13. | ಬ್ರಾಹ್ಮಣರು ಯಾರು? | ಶ್ರೀವಲ್ಲೀ ಬಿ. S-I | 233 |
| 14. | ತಾಯಿಯ ನೆನಪು | ಸುಬ್ರಾಯ ಭಟ್ S.S | 234 |

❖ शास्त्रग्रन्थपरिचायिका - पङ्कज भट्टः, रायण हेगडे, अश्विन भट्टः, मोहित जोशी 235

❖ विजयवैभवम् 273


 ISSN : 2320-740X

# संस्कृतविभागः


ISSN : 2320-740X

ISSN : 2320-740X

# आत्मानुभूतिः

**प्रो.महाबलेश्वर पि. भट्टः**

वेदान्तविभागाध्यक्षः

**श्रुतिस्मृतिपुराणानामालयं करुणालयम् । नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥**

तत्र तावत् श्रुतिः शास्ति "आत्मा वा अरे द्रष्टव्यः ; श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति । आत्मदर्शनोद्देशेन श्रवणमनननिदिध्यासनानि विहितानि । तथा च प्राक्तनैरभ्यधायि–

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । मत्वा च सततं ध्येयः एते दर्शनहेतवः ॥** इति ।

असकृत् श्रवणेन प्रमाणासम्भावना दूरमुपैति । असकृन्मननेन प्रमेयासम्भावना अपगच्छति । असकृन्निदिध्यासनेन प्रमित्यसम्भावना विनाशमृच्छति । एवं तिसृषु असम्भावनासु सुदूरं गतासु आत्मानुभूतिः करतलामलकवत् स्पष्टं प्रतिभाति ।

ननु सर्वो हि मनुष्य अहमस्मीति आत्मानमनुभवति, न कश्चित् सन्दिग्धे अहमस्मि न वेति । नापि विप्रतिपद्यते नाहमस्मीति । सति चैवं न जिज्ञास्य आत्मा । प्रयोजनमपि विवेक्तव्यम् – किं प्रयोजनम् आत्मदर्शनस्य आत्मानं ज्ञात्वाऽपि संसरति यतः संसारनिवृत्तिः अशक्या । प्रयोजनान्तराभावात् विध्याभासोऽर्थवादः । वेदवाक्यत्वात् जपमात्रेण अदृष्टोत्पत्तिः प्रयोजनं भवति चेत्, कामं भवतु । यदि प्रयोजनान्तरं न स्यात् अस्ति च मुख्यं प्रयोजनम् आत्मदर्शनस्य, संसारस्य समूलनिवृत्तिः निरतिशयानन्दावाप्तिश्चेति । "आत्मवित् शोकं तरति" "ब्रह्मवित् ब्रह्मैव भवति" "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "ज्ञानादेव तु कैवल्यम्" इत्यादीनि आम्नायवचांसि आत्मज्ञानात् संसारनिवृत्तिं आनन्दप्राप्तिं च उपदिशन्ति । अतः आत्मा जिज्ञास्यः । अपि च भारतीयदर्शनानि सर्वाण्यपि आत्मतत्त्वमन्वेष्टुं प्रवृत्तानीति न विवादास्पदं पदम् । न ते भ्रान्ताः, नापि अविवेकिनः। किन्तु क्रान्तदर्शिनः प्रेक्षावन्तः परमर्षयः सत्सम्प्रदायप्रवर्तका इति भारतीयानामस्माकं परमपूजनीयभाजनानि ते दार्शनिकाः । यद्यपि प्राकृतानां स्थूलदृशां परस्परं वैरुध्यं दृश्यते न तथा वस्तुस्थितिः । समन्वयबुद्ध्या वीक्ष्यमाणे श्रौतमतसम्मतात्मतत्त्वबुभुत्सया परीक्ष्यमाणे सर्वाणि दर्शनानि आत्मतत्त्वविवेचने प्रवृत्तानि । अचेतनात्मतत्त्वदर्शिनश्चार्वाकात् प्रभृति चेतनात्मवादिवेदान्तपर्यन्ताः सर्वेऽपि सोपानारोहणन्यायेन मुमुक्षुजनमनःक्लेशाशेषविनाशयैव प्रवृत्ता इति विदुषां मतम् । ते सर्वेऽपि येन केनचिदंशेन श्रुत्या उपकृता एव । अन्नमयादिपञ्चकोशनिरूपणद्वारा ब्रह्मात्मतत्त्वोपदेशः प्रमाणमत्र ।

किञ्चान्यत् जडमज्ञानं चेतनमात्मानमावृणोति । न जडं वस्तु । आवरणकृत्याभावात् । अज्ञाननिवर्तकं प्रमाणम् । परमप्रमाणभूता श्रुतिः आत्मा द्रष्टव्यः इति उपदिशन्ती अनात्मनः जिज्ञास्यत्वं वारयति । वा शब्दः अवधारणार्थः तथा च आत्मैव द्रष्टव्यः इति फलितम् । "**तमेवैकं जानथ आत्मानम् अन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः**" इतिश्रुतिः कण्ठत एव केवलमात्मवेदनं नियमयति आत्मा एव दर्शनीयः । लोके आपामरविदुषां अहमस्मीति



ISSN : 2320-740X

आत्मानुभूतिः अस्तीति यदुक्तं तत्तु न याथात्म्यज्ञानं किन्तु भ्रमात्मकम् । देशकालवस्तुपरिच्छेदवर्जितः, सजातीयविजातीयस्वगतभेदशून्यः सच्चिदानन्दस्वभावः परमात्मा ब्रह्मपदाभिधेयः विज्ञेयः मुमुक्षुभिः । गृहे अस्मि, प्रकोष्ठे पश्यन्नस्मि इत्येवम् अनुभूयमान अहं पदार्थ आत्मा परिच्छिन्नः संसारी जीवात्मा आविद्यकः । आत्मनः अखण्डता असंसारिता निरतिशयानन्दरूपता नानुभूयते । आत्मपरमात्मयथार्थज्ञानेन मोक्षः श्रुतिसम्मतः । अत एतदर्थं गुरुवेदान्तवाक्येभ्यः श्रोतव्यः तथैव युक्तिभिश्च मत्वा सततं ध्येयः आत्मा एवं आवृत्या श्रवणाद्यनुष्ठाने कृते परिशुद्धे चेतसि निश्चले च सति अहं ब्रह्मास्मीति अवगतिरुदेति । तया च अवगत्या समूलाविद्या लयं याति। देहेन्द्रियमनोबुद्धिपुत्रकळत्रवित्तादिषु आत्मबुद्धिः ससंस्कारं नश्यति । आत्मा ब्रह्मैव भवति । ब्रह्मैवात्मा भवति । मुक्तः सन् मुक्तो भवति, निरतिशयानन्दं भजते, तेन जीवनं सफलतामेति ॥

***

# सूर्यचन्द्रग्रहणयोः छेद्यकसाधनोपायः

**डा. ईश्वरभट्टः**

ज्यौतिषविभागाध्यक्षः

सुविदितमेवैतत् समेषां विदुषां लोकस्यालोककरम् इदं ज्योतिश्शास्त्रं वेदाङ्गेष्वन्तर्भूतं होरागणितसंहिताश्चेति स्कन्धत्रयेण विभक्तं सकलानां लोकानां शुभाशुभफलप्रदर्शकत्वेन भुवि प्रवर्तितम् अस्ति । स्कन्धत्रयात्मके ज्योतिश्शास्त्रे सिद्धान्तस्कन्धस्यैव अपरं नाम गणितस्कन्ध इति प्रथितम् अस्ति । अयमेव स्कन्धः शास्त्रेऽस्मिन् प्रमाणस्कन्धत्वेन महत्पदमासादयति । यतो हि गणितस्कन्धे "उपपत्तिमानेवागमः प्रमाणम्" इति भास्कराचार्यवचनानुसारेण गणितयुक्तिविरुद्धानां धर्मशास्त्रकारादिवचनानामप्रामाण्यमेव कल्प्यते । अमुमेवाभिप्रायं प्रश्नमार्गकारोऽपि मनुते । तद्यथा –

**"प्रमाणफलभेदेन द्विविधं च भवेदिदम् ।[१] प्रमाणं गणितस्कन्धः स्कन्धावन्यौ फलात्मकौ"** ॥ इति ।

सम्प्रति प्रमाणस्कन्धेष्वन्तर्गतविषयप्रतिपादनपरेऽस्मिन् ज्योतिश्शास्त्रे सौरग्रहगणितसिद्धान्ते सूर्यचन्द्रग्रहणयोः छेद्यकसाधनोपायमाश्रित्य मीमांसा क्रियते । ननु छेद्यको नाम क इति जिज्ञासायां छिद्यन्ते गोलविषयकाः संशया अनेनेति छेद्यकः । छिद् धातोः भावे घञ् प्रत्यये कृते सति पुल्लिङ्गे छेदः इति रूपं सिध्यति । खण्डः, छेदनं, नाशः अपगतिश्चेति नानार्थबोधकोऽयं शब्दः । अयमेव शब्दः नपुंसकलिङ्गेऽपि छेदनम्, अस्त्रेण द्विधाकरणम्, कर्तनं, कल्पनम् अपनोदनमित्यनेकार्थे प्रयुक्तः । इत्थं नानार्थनिरूपणे प्रयुक्तं छेद्यकं विना सूर्यचन्द्रग्रहणयोः स्पर्शमध्यमोक्षादयो न ज्ञायन्ते । अतः तदुत्तमं छेद्यकज्ञानम् अर्थाद् परिलेखसाधनोपायं सूर्यांशपुरुषः मयाय प्रवक्ष्यति सूर्यसिद्धान्ते छेदकाधिकारे । यतो हि छेद्यकं विना रविचन्द्रयोर्ग्रहणे तयोः बिम्बस्य कस्यां दिशि स्पर्शः कुत्र मध्यग्रहणं कुत्र च मोक्ष इत्यादिज्ञानं दुर्घटमिति स्पर्शज्ञानं छेद्यकप्रयोजनं सूचितम् ।


ISSN : 2320-740X

यथा –

**"न च्छेद्यकमृते यस्माद् भेदाः ग्रहणयोः स्फुटाः ।[२] ज्ञायन्ते तत् प्रवक्ष्यामि च्छेद्यकज्ञानमुत्तमम्"** ॥ इति।

यद्यपि सूर्यसिद्धान्तग्रन्थस्यास्य काश्चित् प्रतिषु षष्ठाधिकारस्य कृते छेद्यकाधिकारेति नाम अन्यत्र परिलेखाधिकारेत्यपि नाम समुल्लिखितं दृष्टिपथमुपयाति । अतो छेद्यकाधिकारापेक्षया परिलेखाधिकार एव साधुरिति प्रतीयते । अत्र विशिष्य छेद्यकाधिकारनिरूपणक्रमेऽपि काचन सरणिः जातकशास्त्रमनुसृत्यैव कृतेति न विस्मर्तव्यम्। यथा जातकशास्त्रानुसारेण षष्ठभावतः छेदनकर्तनप्रभृतयो विचाराः विमृश्यन्ते तथैव सूर्यसिद्धान्तस्य षष्टाधिकारे एव छेद्यकनिबोधकविषयो विमृष्टः नितरां महत्त्वपूर्णं स्थानं भजेतेति निश्चप्रचम् । तस्मात् होरास्कन्धस्य यादृशो भावो यावान् गुणानुबन्धो यादृशी शैली यश्च खलु ध्वनिविशेषः होराविद्भिः अभिप्रेतः तस्यैव समुचितसमावेशो गणितस्कन्धेऽपि वर्तत इति ज्योतिश्शास्त्रचिन्तनपरिपक्वबुद्धीनां विदुषामनुभवसाक्षिकोऽयं विषयोऽस्ति । अत्र छेद्यकाधिकारे च्छेदकस्य प्रयोजनम् आदौ निरूप्य तत्समनन्तरमेव वलनवृत्तमानैक्यार्धवृत्तग्राह्यवृत्तानां च परिलेखनक्रमं ब्रूते । तद्यथा जलेन सुसमीकृतभूमौ कुत्राप्येकं
स्थिरं बिन्दुं कृत्वा तद्बिन्दुरेव केन्द्रमित्यामनय्य एकोनपञ्चाशदङ्गुलव्यासार्धेन वृत्तमेकं रचयेत् । 'यवोदरैरङ्गुलमष्टसंख्यैः' इत्युक्तप्रमाणेन अङ्गुलस्य परिमाणं मापनक्रमे परिगणनीयम् । तद्वृत्तस्य कृते वलनाश्रितबृत्तेति नाम व्यपदिश्यते । पुनः तस्यैव वृत्तस्य केन्द्रात् द्वितीयं वृत्तं विलिखेत्, तस्य व्यासार्धः छाद्यछादकबिम्बयोः व्यासार्धयोगतुल्यो भवेत् । यद्वा मानैक्यखण्डसमानो भवेत् । तद्वृत्तस्य कृते समासवृत्तेति नाम व्यासार्धादुत्पन्नत्वात् । एवमेव तस्मादेव बिन्दोः पुनस्तृतीयं वृत्तमालिखेत् यस्य वृत्तस्य व्यासार्धं तद्ग्रहबिम्बव्यासार्धस्य समानं भवेत् यद्वा यस्योपरि ग्रहणं सम्भवति । एवं च तद्बिन्दुतः एव सूर्यसिद्धान्तग्रन्थस्यास्य त्रिप्रश्नाधिकारोक्तविधिना याम्योत्तरप्राच्यपररेखासाधनं कुर्यात् । तत्र चन्द्रग्रहणे पूर्वदिशि स्पर्शः पश्चिमदिशि च मोक्षः। परन्तु अर्कग्रहणे तद् विपर्ययात् नाम सूर्यस्य पश्चिमतः स्पर्शः पूर्वतो मोक्षश्च सम्भवति | तदुक्तं यथा –

**"सुसाधितायामवनौ बिन्दुं कृत्वा ततो लिखेत् ।[३]**
**सप्तवर्गाङ्गुलेनादौ मण्डलं बलमाश्रितम् ।**
**ग्राह्यग्राहकयोगार्धसम्मितेन द्वितीयकम् ।**
**याम्योत्तरा प्राच्यपरासाधनं पूर्ववद् दिशाम् ।**
**प्रागिन्दोर्ग्रहणे पश्चान्मोक्षोऽर्कस्य विपर्ययात्"**॥ इति ।

अत्र ग्राह्यबिम्बं स्थिरमित्यामनीय ततः यावदन्तरे यस्यां दिशि ग्राहकस्य केन्द्रतः ग्रहस्य स्पर्शमध्यमोक्षाश्चेति कालस्य साधनक्रमं रेखागणितस्य साहाय्येन अवगन्तुं विधिः प्रोक्तः । तत्र चन्द्रग्रहणे ग्राह्यश्चन्द्रः, ग्राहिका भूमिः । सूर्यग्रहणे च सूर्यः ग्राह्यः, ग्राहकः चन्द्रः । अत्र परिलेखनक्रमे प्रतिपादित 49 अङ्गुल प्रमाणकव्यासार्धेन वृत्तिनिर्माणस्य कारणं किमिति जिज्ञासा जागर्ति । तस्य समाधानं इत्थं निवेदयामि ।



ISSN : 2320-740X

स्फुटबलनस्य ज्यायाः कृते सप्ततिभिः भक्ते सति अस्य ज्यायाः परिमाणम् अङ्गुलेषु आयाति । यद्यपि त्रिज्यामानं प्रायः 49 अङ्गुलात्मकमिति परिगण्यते । त्रिज्यामानं 3438 कलासु भवति तत्कृते 70तः भक्ते सति 49 भवति । अतः पूर्वोक्तश्लोके 49 अङ्गुलमानेन बलनाश्रितं वृत्तं विलिखेदित्युक्तम् । यद्यपि भास्करप्रभृतयो आचार्याः वलनाश्रितवृत्तस्य निरूपणक्रमं न प्रोचुः । परन्तु समावृत्तस्य प्राच्यपरयाम्योत्तरयोः दिशि चिह्नं कृत्वा स्फुटवलनस्य परिमाणस्य कोणदिश्यनुसारेण परिलेखनक्रमं निरूपयामासुः । तद्यथा –

**"ग्राह्यार्धसूत्रेण विधाय वृत्तं मानैक्यखण्डेन च साधिताशम् ।**[४]

**बाह्येऽत्र वृत्ते वलनं ज्यकावत् प्राक्चिह्नतः स्पर्शभवं हिमांशोः ॥**

**सव्यापसव्यं खलु याम्यसौम्यं मोक्षं तदा पश्चिमतश्च देयम् ।**

**रविग्रहे पश्चिमपूर्वतस्ते विक्षेपदिक्चिह्नत एवमाध्यम् "**॥ इति ।

यद्यपि पूर्वोक्तश्लोके समासवृत्तपरिलेखनक्रमं किञ्च ग्राह्यबिम्बवृत्तस्य (अर्थाद् यस्मिन् ग्राह्यबिम्बवृत्ते ग्रहणं सम्भवति) परिलेखनक्रमं प्रतिपादितश्चेदपि सुस्पष्टतया तयोः वृत्तयोः परिमाणं कियद्भवेदिति नोक्तमस्ति ग्रन्थे । यदि सप्ततिकलानां कृते एकमङ्गुलमिति मत्वा समासवृत्तग्राह्यबिम्बवृत्तयोर्लेखनं क्रियते तदा ग्राह्यबिम्बवृत्तस्य व्यासार्ध 16 कलाः अथवा एकाङ्गुलस्य चतुर्थांशापेक्षयापि अल्पो भवति । यद्यपि समासवृत्तं प्रायः एकाङ्गुलपरिमितं भवति । तस्मात् पूर्वोक्तद्वयोः वृत्तयोः प्रमाणं 70 कलानां कृते एकमङ्गुलमिति गणनया अस्माकं कार्यं न सेत्स्यति तादृशसन्दर्भे चन्द्रग्रहणाधिकारोक्त 26 श्लोके निरूपितङ्गुलपरिमाणस्य ग्रहणं क्रियते तदा कदाचिद् तदङ्गुलमानं ग्राह्यमिति प्रतिभाति । तद्यथा –

**"सोन्नतं दिनमध्यर्धदिनार्धाप्तं फलेन तु ।**[५] **छिन्द्यात् विक्षेपमानानि तान्येषामङ्गुलानि तु "**।। इति ।

तस्मात् कलात्रयस्यैव कृते एकमङ्गुलमिति मत्वा तदनुसारेण पूर्वोक्तयोः द्वयोः वृत्तयोः लेखनं कार्यम् । अथ वलनवृत्ते वलनदानप्रकारः निरूप्यते –

चन्द्रग्रहणे चन्द्रस्य स्पार्शिकं वलनं उत्तरवलनञ्चेत् प्राचीबिन्दुतः उत्तराभिमुखं दक्षिणं चेत् दक्षिणाभिमुखं ज्ञेयम् । परन्तु मौक्षिकं वलनं पश्चिमचिह्नात् उत्तरञ्चेद्दक्षिणतः दक्षिणञ्चेदुत्तरतो देयम् । अर्कग्रहणे स्पार्शिकं वलनं वलनवृत्ते परिचमबिन्दोरुत्तरं चेदृक्षिणतो दक्षिणं चेदुत्तरतो ज्यावद्देयम् । मौक्षिकं वलनं तु पूर्वचिह्नाद यथाशं ज्यावद्देयम् । उक्तञ्च –

**"यथादिशं प्राग्रहणं वलनं हीमदीधितेः ।**[६] **मौक्षिकं तु विपर्यस्तं विपरीतमिदं रवेः "**॥ इति ।

अथ मानैक्यार्धे शरदानविधिः प्रोच्यते । वलनवृत्ते स्पार्शिको मौक्षिको यो वलनाग्रबिन्दुः तस्मात् वृत्तकेन्द्रं यावत् सूत्रं नयेत् । तत्सूत्रं मानैक्यखण्डव्यासार्धोत्पन्नं द्वितीये समाससंज्ञके वृत्ते यत्र संस्पृशेत् तत्र स्पर्शकालिको मोक्षकालिकश्च शरौ देयौ। पुनः मानैक्यार्धवृत्ते यत् स्पार्शिकं मौक्षिकं च शराग्रचिह्नं तस्मात् मध्यबिन्दुः यावत् सूत्रं



ISSN : 2320-740X

प्रविशेत् । तत् सूत्रं ग्राह्यमानार्धोत्पन्नं तृतीयं वृत्तं यत्र बिन्दौ संस्पृशति तस्मात् क्रमेण स्पर्शमोक्षौ विनिर्दिशेत् । तदुक्तं यथा –

**"वलनाग्रान्नयेन्मध्यं सूत्रं तद् यत्र संस्पृशेत् ।[७] समासाख्ये ततो देयौ विक्षेपौ ग्रासमौक्षिकौ ।**

**विक्षेपाग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत् । तद्ग्राह्यबिन्दुसंस्पर्शाद् ग्रासमक्षौ विनिर्दिशेत् "**॥ इति ।

अथ उपक्रमेऽस्मिन् शरदाने वैशिष्ट्यं मध्ये वलनदानप्रकारश्च निगद्यते । सूर्यग्रहणस्य परिलेखे विक्षेपाग्रबिन्दुं तस्यामेव दिशि कुर्यात् यस्यां दिशि चान्द्रक्षरो वर्तते । परन्तु चन्द्रग्रहणे विक्षेपाग्रस्य बिन्दोर्दिशा चन्द्रशरस्य दिशातो विपरीतं भवति । एवमेव चन्द्रग्रहणे परिलेखे मध्यवलनस्य मध्यविक्षेपस्य च दिक्समता भवेत्तदा तन्मध्यवलनं दत्तशरदिक्चिह्नात् पूर्वाभिमुखं देयम् । वलनविक्षेपयोर्दिग्भेदे पश्चिमाभिमुखं देयम् । सूर्यग्रहणे तु मध्यवलनविक्षेपयोः समदिक्त्वे पश्चान्मुखं भिन्नदिक्त्वे प्राङ्मुखं वलनं देयम् । तदुक्तं यथा –

**"नित्यशोऽर्कस्य विक्षेपाः परिलेखे यथादिशम् ।[८] विपरीताः शशाङ्कस्य तद्वशादथ मध्यमम् ॥**

**वलनं प्राङ्मुखं देयं तद्विक्षेपकता यदि । भेदे पश्चान्मुखं देयमिन्दोर्भानोर्विपर्ययात् "**॥ इति ।

अथ मध्यग्रहणपरिलेखनमुच्यते – मध्यग्रहणकालिकवलनचिह्नं वलनवृत्ते यत्र ततः ग्राह्यकेन्द्रान्तं सूत्रं प्रवेशयेत् । तत् सूत्रं मध्यसूत्राख्यं कदम्बसूत्रं भवति । ततः तेन समसूत्रेण वलनग्रचिह्नाभिमुखं (मध्यबिन्दुतः) मध्यग्रहणकालिकं गणितागतं शरं नयेत् । अथ तत्र मध्यसूत्रं यद्विक्षेपाग्रं, तद् ग्राहककेन्द्रं भवति । ततः ग्राहकबिम्बदलव्यासार्धेन ग्राहकवृत्तं लिखेत् । ग्राहकवृत्तेन यावन्मितं ग्राह्यवृत्तं छेदितं भवति तावन्मितं ग्राह्यबिम्बं अन्धकारमयेन च्छादकेन आच्छादितं ग्रासमानं भवेत् । तदुक्तं यथा –

**"वलनग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत्।[९] मध्यसूत्रेण विक्षेपं वलनाभिमिखं नयेत् ॥**

**विक्षेपाग्रां लिखेद् वृत्तं ग्राहकार्धेन तेन यत् । ग्राह्यवृत्तं समाक्रान्तं तद्ग्रस्तं तमसा भवेत् "**॥ इति ।

अधुना भूमिगतपरिलेखे दिग्व्यत्यासो भण्यते । ग्रहणपरिलेखं यदि पृथिव्यां भित्तौ फलकादौ च दैवज्ञेन कर्तव्यञ्चेत् पूर्वापरकपालयोर्ग्रहणस्य परिलेखदिशा व्यत्यासः कार्यः । अर्थाद् यदि आकाशे पूर्वकपाले ग्रहणं तदा भूमौ पलके वा परिलेखनविधौ पूर्वस्थाने पश्चिमः पश्चिमे पूर्वः । उत्तरे याम्यः याम्ये उत्तरेति व्यत्यासेन दिग्व्यवस्था चिन्त्या । तदुक्तं यथा –

**"छेद्यकं लिखता भूमौ फलके वा विपश्चिता ।[१०] दिशां विपर्ययः कार्यः पूर्वापरकपालयोः "**॥ इति ।

अथ कियत्प्रमाणं ग्रहणं नादेश्यमित्यपि प्रसङ्गेऽस्मिन् विनिवेद्यते । चन्द्रस्य सुखदृश्यत्वात् निर्मलत्वाच्च बिम्बमानस्य द्वादशभागोऽपि दृश्यते । अत एव यदि चन्द्रस्य द्वादशांशादल्पं ग्रहणं भवेत्तदा तन्नादेश्यमित्यूचुः । सूर्यस्य तेजस्तैक्ष्ण्यात्

दुर्दशनत्वाच्च कलात्रयमङ्गुलमितमपि ग्रस्तं जनाः नावलोकयितुं पारयन्तीति रवेरङ्गुलादल्पो ग्रासो नादेश्यौ इति ब्रुवन्ति ।


ISSN : 2320-740X

उक्तञ्च—

**"स्वच्छत्वाद् द्वादशांशेऽपि ग्रस्तश्चन्द्रस्य दृश्यते ।[११] लिप्तात्रयमपि ग्रस्तं तीक्ष्णत्वाच्च विवस्वतः "**॥ इति।

ग्रन्थस्यास्य सूर्यसिद्धान्तस्य टीकाकर्तृणां रङ्गनाथमाधवपण्डितप्रभृतीनां मतेन चन्द्रबिम्बमानस्य द्वादशभागेऽपि ग्रस्ते सति स दृश्यमाणो भवतीत्याशयः । परन्तु भास्करब्रह्मगुप्तप्रभृतयः आचार्याः चन्द्रस्य बिम्बमानं 16 भागापेक्षया अल्पे ग्रस्ते

सति तद्ग्रहणं न दृश्यमाणं भवतीति मुक्तकण्ठेन प्रतिपादितवन्तः । एवमेव द्वादशभागापेक्षया अल्पग्रस्तसूर्यग्रहणमपि लोकैर्द्रष्टुं न शक्यत इति सयुक्तिकं निरूपितवन्तः । तदुक्तं यथा —

**"इन्दोर्भागः षोडशःखण्डितोऽपि तेजःपुञ्जच्छन्नभावान्न लक्ष्यः ।[१२]**

**तेजस्तैक्ष्ण्यात् तीक्ष्णगोर्द्वादशांशो नादेश्योऽतोऽल्पो ग्रहो बुद्धिमद्भिः "॥ इति।**

**"वलनादिशशिवदन्यद् ग्रहणं तैक्ष्ण्याद्रवेरनादेश्यम् ।[१३] द्वादशभागादूर्ध्वं स्वच्छत्वात्षोडशमिन्दोः "**॥इति।

इत्थं सूर्यचन्द्रग्रहणयोः छेद्यकसाधनोपायः इति विषयस्य समासेन निरूपणं कृतमिति शम् ।

पादटिप्पणी —

1. प्र.मा.अ.1.श्लो.सं. — 9
2. सू.सि.छे.अ.श्लो.सं — 1
3. सू.सि.छे.अ.श्लो.सं — 2, 3
4. सि.शि.च.अ.अश्लो.सं — 26, 27
5. सू.सि.च.अ.श्लो.सं – 26
6. सू.सि.छे.अ.श्लो.सं – 05
7. सू.सि.छे.अ.श्लो.सं — 6, 7
8. सू.सि.छे.अ.श्लो.सं — 8, 9
9. सू.सि.छे.अ.श्लो.सं — 10, 11
10. सू.सि.छे.अ.श्लो.सं – 12
11. सू.सि.छे.अ.श्लो.सं – 13
12. सि.शि.च.अ.श्लो.सं – 37
13. ब्र.सि.सू.ग्र.अ.श्लो.सं — 20

सन्दर्भग्रन्थः —


1. प्रश्नमार्गः
2. सूर्यसिद्धान्तः
3. सिद्धान्तशिरोमणिः
4. ब्राह्मस्फुटसिद्धान्तः


***

## योग: योगाङ्गानि च

**डा. सि. एस्.एस्.नरसिंहमूर्तिः**

व्याकरणविभागाध्यक्षः

भगवान् पतञ्जलि: योगशास्त्रस्य प्रवर्तक: । असावादिशेषावतार इति भारतीया: मन्वते । अतोऽसौ सहस्रफणिरिति विज्ञायते । अञ्जले: पतित: = पतञ्जलिरिति व्युत्पत्त्यर्थ: । गोनर्ददेशीयया गोणिकया



ISSN : 2320-740X

सूर्यायार्घ्यप्रदानसमये अञ्जले: पतित इत्यैतिह्यं कथयन्ति जनाः । असौ पतञ्जलि: चतुर: ग्रन्थान् रचयामास । ते यथा – १.योगसूत्राणि, २.व्याकरणमहाभाष्यम्, ३.चरकसंहिता, ४.परमार्थसार: इति । चरकसंहिताया: कर्ताऽयमेवेत्यत्र नास्ति संशीति: । आह चरकसंहिताया: व्याख्यायां चक्रपाणिदत्त: –

**पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतै: । मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नम: ॥ इति॥**

अस्यैव चरक इत्यनर्थान्तरं विद्यते । अज्ञात: चर: = चरक इति "अज्ञाते(पा.सू.५–३–७३)" इति पाणिनीयेन चरशब्दादज्ञातार्थे स्वार्थे कप्रत्यये निष्पद्यते । परमार्थसारोऽपि पतञ्जलिकर्तृकमेव । उक्तञ्च वैयाकरणनागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायाम् – "तदुक्तं परमार्थसारे पतञ्जलिना" इति । ग्रन्थेऽस्मिन् निर्गुणाद्वैतसिद्धान्त: प्रतिपादित: ।

सम्प्रति योगसूत्राणि विचारयाम: । अध्यायात्मकोऽयं ग्रन्थ: । अत्राध्याये चत्वार: पादा: विद्यन्ते । प्रथमपादे – ५१, द्वितीयपादे – ५५, तृतीयपादे – ५४, चतुर्थपादे –३४ सूत्राणि सन्ति । आहत्य १९४ सूत्राणि भवन्ति। समाधि – साधन– विभूति– कैवल्यनाम्ना पादानि व्यवाह्रियन्त ।

योगोऽपि कापिलमेवानुसरति । तच्च शास्त्रं पञ्चविंशति तत्त्वानि बोधयति । इदमपि शास्त्रं तथैव कथयति । परं पुरुषापेक्षया ईश्वरमिदं दर्शनमङ्गीचकार – क्लेशकर्मविपाकाशयैरपरामृष्ट: पुरुषविशेष ईश्वर: (यो.सू.१–२४) । अचेतनस्य प्रधानस्य चेतनसम्बन्धेन विना परिणामं न सम्भवति, ईश्वरानुग्रहाभावे समाधिर्न लभ्यते, अतस्तदर्थं पुरुषापेक्षया ईश्वरं स्वीचकार पतञ्जलि: । अत एवास्य सेश्वरसांख्यमिति नाम्ना व्यवाहरन् दार्शनिका: । सांख्यदर्शने शुद्धकर्माणि ज्ञानसाधनाय प्रोक्तानि, अत्र तावत् पुरुषस्य मोक्षसाधनाय योग: पार्थक्येन न्यरूपयत् । अत इदं दर्शनान्तरं भवति ।

युज समाधाविति धातो: घञ्प्रत्यये योग: इति रूपनिष्पत्ति: भवति । युज्यत इति योग: । युजिर् योगे इति धातोरपि योग इति रूपं भवति, परन्तु न तस्यात्र ग्रहणम् । यतो योगाङ्गेषु समाधिरप्यन्यतमं भवति । अङ्गी भवति योग: । अङ्गाङ्गिनोरभेदविवक्षायां समाध्यर्थकयुजधातोरपि प्रयोग: कर्तुं शक्यते । "योग: कर्मसु कौशलम्" इत्यत्र योगशब्दोऽन्यार्थक: । योगश्चित्तवृत्तिनिरोध:(१–२) इति योगलक्षणं पतञ्जलिरवोचत् । योगोऽयमात्मविद्याया: साधनमिति उपनिषत्सु प्रोक्तम् । चित्तवृत्तिनिरोधरूपयोगाभावे आत्मविद्या न सिद्ध्यति । अत आत्मविद्यायै योगोऽत्यन्तमुपकरोति । भाष्यकर्ता भगवान् व्यास: योग:= समाधिरित्यवोचत् ।

## योगस्य निर्वचनानि

१.याज्ञवल्क्यस्मृतौ योगलक्षणमेवमुवाच याज्ञवल्क्य: –

"**संयोगो योग इत्युक्तो जीवात्मपरमात्मनो:**" । (इदं योगफलं भवति, आयुर्वै घृतमितिवत्)

२. व्यास: लिङ्गपुराणे योगलक्षणमेवं लिलेख –

**सर्वार्थप्राप्तिरात्मनो योग उच्यते** ॥ (इदं योगस्यैकं कारणं भवति)


ISSN : 2320-740X

३. अग्निपुराणे एवमकथयद् व्यासमहर्षि: –

**आत्ममानसप्रत्यक्षा विशिष्टा या मनोगति: । तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥**

(प्रथमलक्षणे यदुक्तं तदेवात्राप्युक्तम्)

४. स्कन्दपुराणे भगवान् व्यास एवमुवाच –

**यत्समत्वं द्वयोरत्र जीवात्मपरमात्मनो: । स नष्ट: सर्वसंकल्प: समाधिरभिधीयते ॥**

**परमात्मात्मनोर्योऽयमविभाग: परन्तप । स एव तु परो योग: समासात्कथितस्तव ॥**

५. देवीभागवतपुराणे –

**ऐक्यं जीवात्मनोराहु: योगं योगविशारदा: ।** (७–३५–२)

६. कूर्मपुराणे एवमलेखीत् व्यास: –

**मय्येकचित्तता योगो वृत्त्यन्तरनिरोधत: ।** (वृत्तिनिरोध एवेति)

७. हठयोगप्रदीपिकायाम् एवमुक्तम् –

**सलिले सैन्धवं यद्वत् साम्यं भजति योगत: । तथात्ममनसोरैक्यं समाधिरभिधीयते ॥**

(४–५, इदमपि फलमेव भवति)

८ श्रीमद्भगवद्गीतायाम् एवं सूचयामास व्यास: –

अ) **तं विद्यात् दु:खसंयोगवियोगं योगसंज्ञितम् ।**

**स निश्चयेन योक्तव्यो योऽनिर्विण्णचेतसा ॥** (६–२, दु:खवियोग: योगसाधनफलं भवति, न लक्षणम्)

आ) **सिद्ध्यसिद्ध्यो: समो भूत्वा समत्वं योग उच्यते ।** (२–४८)

इ) **योग: कर्मसु कौशलम्** (२–५०)

९.योगवासिष्ठे योगलक्षणमेवं निर्दिष्टम् –

**संसारोत्तरणे युक्तिर्योग इत्यभिधीयते ॥**

१०. मैत्रायण्युपनिषदि एवमसूच्यत –

**सर्वभावपरित्यागो योग इत्यभिधीयते ।** (६–२५)

११. आचार्य गौडपाद: माण्डूक्यकारिकायामेवमवादीत् –

**सर्वाभिलापविगत: सर्वचिन्तासमुत्थित: । सुप्रशान्त: सकृज्ज्योति: समाधिरचलोऽभय: ॥** इति॥

१२. कठोपनिषदि एवं व्यलोक्यत –

**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ॥**

योगाङ्गानि –

योगाङ्गान्यष्टौ विद्यन्ते । तानि यथा – १.यम:, २.नियम:, ३.आसनम्, ४.प्राणायाम:, ५.प्रत्याहार:,


ISSN : 2320-740X

६.धारणा, ७.ध्यानम्, ८.समाधिः ।

१.यमः – अयम् अहिंसा– सत्य–अस्तेय–ब्रह्मचर्य–अपरिग्रह भेदेन पञ्चधा वर्तते ।(अस्तेयम् = चौर्याकरणम्)

२.नियमः – अयमपि शौच– सन्तोष–तप– स्वाध्याय– ईश्वरप्रणिधानभेदेन पञ्चधा विद्यते । शौचं बाह्याभ्यन्तरभेदेन द्विविधः।

३. आसनम् – निश्चलेन सुखेनोपवेशनमेव आसनमित्युच्यते । आस्यतेऽत्रेत्यासनम् । पद्मासनम्, वीरासनम्, भद्रासनम्, स्वस्थिकम्, दण्डासनम्, पर्यङ्कम्, क्रौञ्चनिषदनम्, हस्तिनिषदनम्, उष्ट्रनिषदनम् इत्यादीनि सन्ति ।

४. प्राणायामः – आसनेषूपविश्य उच्छ्वासनिश्वासाभ्यां गतिनिरोधः । कर्मजन्यपापहरणे एष उपकरोति । पापमेव संसारबीजं भवति। तन्नाशेन विवेकज्ञानं वर्धते ।

५. प्रत्याहारः – प्रत्याहरणम् = प्रत्याहारः । इन्द्रियाणि विषयेभ्यः परावृत्य अत्र चित्तस्वरुपमनुकरोति । चित्तस्य स्थैर्ये इन्द्रियाणि तत्रैव तिष्ठन्ति । विषयोन्मुखानि न भवन्ति । अनेनेन्द्रियाणि वशीकृताः भवन्ति ।

६.धारणा – चित्तस्य नाभिचक्रे वा हृत्पुण्डरीके, मूर्ध्नि, ज्योतिश्चक्रे, नासिकाग्रे, जिह्वाग्रे वा बन्धनं धारणेत्युच्यते ।

७. ध्यानम् – धारणाद्ध्यानं सिद्ध्यति । ज्ञानस्यैकाग्रता नाम ज्ञानान्तरेणापरामृष्टसदृशप्रवाहो ध्यानं भवति ।

८. समाधिः – तदेव ध्यानं ध्येयवस्तुद्वारा आकाररूपेण प्रत्ययात्मकस्वरूपेण शून्य इव भवति यदा स समाधिरिति व्यवह्रियते।

एतेषु अष्टसु आदितः पञ्च बहिरङ्गानि भवन्ति । युज्यते अनेनेति करणे घञि योगसाधनानामेतेषां ग्रहणम् । अन्तिमानि त्रीणि अन्तरङ्गानि भवन्ति । इमानि त्रीणि असम्प्रज्ञातसमाधिरिति व्यवहरन्ति । योजनम् = योगः इति भावे घञि अमीषां ग्रहणं सिद्ध्यति । एतान्यष्टावपि प्रकृते स्तथा पुरुषस्य च भेदज्ञानाय साधनानि भवन्ति । तादृग्ज्ञानमेव "विवेकख्यातिरिति नाम्ना व्यवहरन्ति । उक्तञ्च – योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः (यो. सू. २–२८) ।

चित्तवृत्तिनिरोधायोपाया अमी योगदर्शने स्पष्टीकृताः । ते यथा – प्रमाणम्, विपर्ययः, विकल्पः, निद्रा, स्मृतिरिति ।

***

# रोजर्समहोदयस्य व्यक्तित्वविकासवादविचारः

**डा. चन्द्रकान्तः**

सहायकाचार्यः, शिक्षाशास्त्रिविभागः

कार्लरान्सं रोजर्सनामकः मनोविज्ञानी अमेरिकादेशस्य शिकागोनगरस्य इल्लिनोयिस्नामकोपनगरस्य ओक्पार्कक्षेत्रे 1902 तमे वर्षे जनवरीमासस्याष्टमदिनाङ्के (8–1–1902) जनिमवाप्नोत् । तस्य परिवारः



ISSN : 2320-740X

सम्प्रदायपूर्णः आसीत् । तस्य परिवारे दुष्टप्रवृत्त्यर्थं किञ्चिदप्यवसरः नावर्तत । परिवारसदस्याः सर्वेऽपि सदा स्वकार्येषु रताः भवन्ति स्म ।

रोजर्समहोदयस्य पिता वृत्तौ कृषिकश्चेदपि प्रवृत्त्या वैज्ञानिकप्रयोगकर्ताप्यासीत् । रोजर्समहोदयः षट्सु पुत्रेषु चतुर्थः पुत्रोऽवर्तत । बाल्यादारभ्य कुशाग्रमतिरयं पितुरुद्देश्यपूरणार्थं धनार्जनोद्देश्येन छागकुक्कुटसूकरादिप्राणिविशेषाणां परिपालनप्रवृत्तिमानजायत । पितुः मार्गदर्शने वैज्ञानिकरीत्या कृषिकार्यस्य ज्ञानं समपादयत् । तस्मिन् पठनविषये महती आसक्तिरासीत् । बाल्ये एव मारिषस्महोदयेन लिखितम् "Feeds & Feeding" इति पुस्तकं पठित्वा तत्रत्यं वैज्ञानिकप्रयोगपरिज्ञानमप्यासादयत् । रोजर्समहोदयः उच्चशिक्षार्थं विस्कोन्सिन् विश्वविद्यालयं (Wisconsin University) प्राविशत् । तत्र वैज्ञानिककृषिविषयं स्व्यकरोत् ।

1928 तमे वर्षे कोलम्बिया विश्वविद्यालयात् एम्. ए. पदवीमवाप्नोत् । चिकित्सामनोविज्ञानविषये 1931 तमे वर्षे डाक्टरेट्पदवीमप्यवाप्नोत् । 1945 तमवत्सरः अस्य जीवने महत्त्वपूर्णो वर्तते । अस्मिन् वर्षे शिकागोविश्वविद्यालयः तस्य विचारानुसारं कौन्सलिङ्गकेन्द्रं स्थापयितुमवसरमकल्पयत् । 1957 तमवर्षपर्यन्तं निर्देशकरूपेण तस्मिन् केन्द्रे उत्तमसेवामकरोत् । अस्मिन् समये एव (1951) "client centered Therapy नामकं ग्रन्थं प्राकाशयत् । 1961 तमे वर्षे " On becoming a person नामकमन्यदेकं ग्रन्थं प्रकाशितवान् । 1963 तमे वर्षे ला. जोल्ला क्यालिफोर्नियामध्ये विद्यमानां संस्थां "Western Behavioral Science institute नामिकां प्रविष्टवान् । 1969 तमे वर्षे पुनः "Freedom to learn" नामकं ग्रन्थं, 1970 तमे वर्षे "Cart Rogers on Encounter Groups" नामकं ग्रन्थं, 1972 तमे वर्षे "Becoming Partners, Marriage and Its Alternatives" नामकं ग्रन्थञ्चालिखत् । तदनन्तरकाले तेन लिखितः "Theory of self" नामकः ग्रन्थः जगत्प्रसिद्धोऽभूत् । तेन प्रतिपादिताः व्यक्तित्वविकासव्यक्तित्वसंरचनाव्यक्तित्वगतिशीलताविषयाः मनोविज्ञानक्षेत्रे महत्त्वपूर्णं स्थानमलभन्त ।

**व्यक्तित्वविकाससिद्धान्तः**

अस्मिन् विषये सः स्वकीयं विशिष्टं विचारं प्रास्तौत् । अन्यमनोविज्ञानिनां चिन्तनवत् विकासस्य निर्दिष्टश्रेण्याः प्रतिपादनं विहाय पृथग्विचारमुपस्थापयत् । यथा –

१. विकासस्य निरन्तरता (Continuity of development)

२. शरीरस्य रचना स्वत्वञ्च (organism & self)

३. शरीररचना स्वानुभवश्च (organism and self experience)

४. शरीररचना आत्मगौरवञ्च (organism and self regard)

५. स्थितिस्थापकत्वम् (Flexibility)


ISSN : 2320-740X

६. वैयक्तिकाभिरुचेः महत्त्वम् (Importance of Individuality)

१. **विकासस्य निरन्तरता** (Continuity of development) – रोजर्समहोदयः विकासस्य नैरन्तर्यमाग्रहपूर्वकं प्रत्यपादयत् । तस्यानुसारं व्यक्तिः स्वत्त्वं (self) सम्पादयितुम् अव्याहतं प्रयत्नं विदधाति । स्वजीवने व्यक्तिः एकमेवानुभवम् अप्राप्य बहुविधं नानाप्रकारकमनुभवं प्राप्नोति । यदि ते ह्यनुभवाः सर्वे योग्याश्चेत् तान् सर्वानपि परामर्शार्थमेकत्रीकरोति । एवं प्रकारेण व्यक्तिः स्वत्त्वं सम्पादयति । यदि एकवारं स्वत्त्वस्य स्वरूपमात्मसात् करोति तर्हि तदनन्तरमङ्गीकृतानि बाह्यवस्तूनि जागरूपकतया प्रत्यक्षीकरोति । अन्यानि वस्तूनि तिरस्करोति । एतादृशीं प्रक्रियां रोजर्समहोदयः सङ्केतानामभ्यासः (Symbolization) (सङ्केतनम्) इत्यब्रवीत् ।

२. **शरीररचना स्वत्त्वञ्च** (organism and self) – प्रायः सर्वेऽपि व्यक्तित्वस्य सिद्धान्ताः स्वत्त्वं (Self) परितः परिभ्रमन्ति ।रोजर्समहोदयानुसारं स्वत्त्वं (Self) स्थिरं न वर्तते । तन्निरन्तरं परिवर्तनशीलं भवति। तद् प्रतिव्यक्ति भिन्नं भवति । व्यक्तेः स्वकीयदृष्टिकोणः एव तस्याः स्वत्त्वं वर्तते । व्यक्तेः अनुभूतिं वर्तमानानुभवं भविष्यस्य प्रतीक्षाञ्च आधृत्य वर्तते । शरीरं स्वत्त्वञ्च व्यक्तेः आनुवंशिकप्रवृत्तिभिः सम्बद्धञ्चेदपि सामाजिकवातावरणेनाधिकं प्रभावितं भवति । अतः शरीरसंरचनास्वत्त्वयोः मध्ये अन्तरं वर्तत इति प्रतिपादयति ।

३. **शरीरसंरचना स्वानुभवश्च** (organism and self experience) – व्यक्तेः विकासः निरन्तरप्रक्रिया वर्तते। एकेन पक्षेण आनुवंशिकप्रवृत्तिद्वारा स्वयं विकासः जायते । अन्येन पक्षेण वैयक्तिकवातावरणसामाजिकानुभवाभ्यां जायते । स्वत्त्वस्य निर्माणन्तु व्यक्त्यन्तरेण क्रियमाणमौल्यमापनस्य परिणामेन जायते । अतः अनुभवस्वत्वाभ्यां मौल्यानि विकसन्ति । व्यक्तेः वर्तनं स्थिरं भवेत् । अतः तेन व्यक्तिविशेषेण मनोभावविषये मनोप्रवृत्तिविषये, मनोप्रेरणाविषये च जागरूपकेण भाव्यम् ।

४. **शरीररचना आत्मगौरवञ्च** (organism and self regard) – आत्मगौरवं नियमरहितं भवति । प्रत्येकं व्यक्तिविशेषः भिन्नः भवति । व्यक्तिः नियमरहितं धनात्मकं गौरवम् अनुभवति चेत् क्लेशः न भवति । आत्मगौरवं यदा अनुभवति तदा मनोवैज्ञानिकरीत्या सामञ्जस्यं सम्पादयितुं प्रवृत्तो भवति । तथैव सम्पूर्णरूपेण कार्ये प्रवृत्तिं दर्शयति ।

५. **स्थितिस्थापकत्वम्** (Flexibility) – रोजर्समहोदयस्य अभिप्रायानुसारं व्यक्तेः विकासे स्थितिस्थापकत्वं भवेत् । यस्मिन् समये सः व्यक्तिविशेषः काञ्चित् समस्यां समाधातुं प्रयतते । तस्मिन् समये सः सर्जनात्मकताम् उत्पादकताञ्च प्राप्नोति । साधारणः कश्चित् पुरुषः यदा पक्वतां प्राप्नोति तदा कार्यनिर्वहणसमर्थः, सर्जनात्मकः, कष्टसहिष्णुश्च जायते ।


ISSN : 2320-740X

६. **वैयक्तिकतायाः महत्त्वम्** (Importance of individuality) – रोजर्समहोदयः वैयक्तिकाभिरुचिं स्वकीये व्यक्तित्वविकाससिद्धान्ते प्राधान्येन प्रतिपादयति । एतदर्थमेव मनोवैज्ञानिकचिकित्सा (Psycho–Therapy) नामिकां पद्धतिं अभ्यवर्धयत् । अस्याः नामाङ्कनं क्लैंट् थेरेपि (Client Therapy) इत्यकरोत् । अत्र "Client" इत्यस्य रोगी इत्यर्थः । अस्यां चिकित्सायां रोगी कथमपि भयपूर्णं वातावरणं न अभिमुखीकरोति । अत्र वैद्यः अथवा चिकित्सकः मनोवैज्ञानी रूग्णेन सह सौहार्देन व्यवहरति । तत्परिणामतः रोगी मुक्तभावेन चिकित्सकस्य सविधे स्वाभिप्रायम् अभिव्यनक्ति । एवं प्रकारेण रोजर्स–महोदयः व्यक्तित्वविकासविचारं प्रत्यपादयत् । अस्य सिद्धान्तः अन्येषां सिद्धान्तानामपेक्षया भिन्नः वर्तते इति वक्तुं शक्यते ।

उपयुक्तग्रन्थसूची

1. 2011– एस्. के मङ्गल – शिक्षामनोविज्ञान – PHI Learning Private Limited, New Delhi – 01
2. 2008 – डा. एस्. एस्. माथुर – शिक्षामनोविज्ञान – Agarwal Publication Agra –07
3. 2000 – मदनमोहन झा – प्रयोगात्मकं शिक्षामनोविज्ञानम् – श्रीमती पूनमझा, प्रकाशन पुरी, ओडिशा।
4. 2009 – N. B. Kongawada shakshanika manovijnana (Kannada), Vidyanidhi Prakashan Gadag.
5. 2010 – डा. एस्. पी. गुप्ता – उच्चतरशिक्षा मनोविज्ञान – शारदा पुस्तकभवनम्, इलहाबाद ।

***

# स्वामिविवेकानन्दमहोदयस्य शिक्षादर्शनम्

**डा. रामचन्द्रुल बालाजी**

सहायकाचार्यः,शिक्षाशास्त्रविभागः

स्वामिविवेकानन्दस्य जन्म १८६३ तमे वर्षे, जनवरीमासस्य द्वादशतमे दिनाङ्के प्रातः कालेऽभवत् । तस्मिन् दिने पौषसङ्क्रान्तिरासीत् । तस्य जन्मस्थलं बङ्गालप्रान्तस्य कलकत्तानगरस्य 'सिमुलियापल्ली' इति नामकमासीत् । तस्य पितुर्नाम श्री विश्वनाथदत्त आसीत् । सः तदानीन्तनः प्रसिद्धो न्यायवादी आसीत् । तस्य क्षत्रियकुलो बङ्गालप्रान्ते प्रख्यात आसीत् । तस्य गृहस्य वातावरणमतीव धर्मानुप्राणितमासीत् । वीरेश्वरस्य शिवस्य भक्त्या समुद्भवात् मात्रा भुवनेश्वरीदेव्या तस्याभिधानं 'वीरेश्वर' इति निश्चितम् । ततः नामकरणवेलायां तन्नाम 'नरेन्द्रनाथः' इति निर्धारितम् ।


ISSN : 2320-740X

विवेकानन्दः स्वानुभूतस्य ज्ञानस्य शिक्षां सहजतयैव प्रदत्तवान् । स वेदान्तस्य व्यावहारिकं स्वरूपं स्वीकृतवान् । स मानवसेवामेव ईश्वरसेवां मनुते स्म । सत्यनिष्ठतायाम् आध्यात्मिकतायां चेत्यनयोरभिन्नत्वं मनुते स्म । स अनेकताष्वप्येकतां पश्यति स्म । तन्मते स एव शान्तिमधिगच्छति यस्तु वैविध्येऽपि ऐक्यस्य साक्षात्कारं करोति । तन्मते आत्मा एव मनसा शरीरे कार्यं विदधाति । स सर्वान् धर्मान् प्रति सदैव समादरं प्रकटितवान् । परं स्वामिविवेकानन्दः स्वकीयं वेदान्तस्याद्वैतमतमेव सार्वभौमिकं विज्ञानधर्मं मनुते स्म ।

स्वामी विवेकानन्दः वेदान्तदर्शनस्य पुनर्ब्याख्याम् आधुनिकदृष्ट्या अकरोत् । तथैव निराशावकुण्ठनयोर्मध्ये विद्यमानभारतीयजनतां प्रति नवीनमार्गं प्रदर्शितवान् । स्वामिविवेकानन्दानुसारम् आध्यात्मिकोन्नत्यपेक्षया देशस्योन्नतिः आवश्यकी । यावत् पर्यन्तं प्रत्येकं भारतीयस्य जीवनस्तरोन्नतिः नैव भवति, यावत् जीवनसङ्घर्षणे सन्नद्धः नैव भवति, तावत् पर्यन्तम् आध्यात्मिकोन्नतिविषयकं वचनं निस्सारं भवति । विवेकानन्दः शिक्षायाः उद्देश्यानि एवं वदति –'या शिक्षाप्रणाली जनसामान्यस्य जीवनसङ्घर्षणेन साकं योद्धुं क्षमताप्रदाने सहायिका न भवति, या मनुष्यस्य नैतिकबलस्य एवं सेवाधर्मस्य, मनुष्ये सिंहसदृशसाहसस्य च विकासं न करोति, सा शिक्षा योग्या भवति किम् ? एवमेवान्यस्मिन् स्थले एवं वदति– एषा उच्चशिक्षा भवतु न भवतु वा, अनया का हानिर्भवति? एतदधिकं समीचीनं भवति, यदि जनेभ्यः किञ्चित् साङ्केतिकशिक्षा मिलति, यया जनाः उपाध्यर्थम् इतस्ततः भ्रमणापेक्षया यस्मिन् कस्मिन्नपि कर्मणि लग्नाः भूत्वा जीविकोपार्जनं कर्तुं शक्नुयुः ।

**शिक्षायाः परिभाषा –**

स्वामी विवेकानन्दानुसारं शिक्षायाः व्याख्या शक्तेः विकासरूपेण कर्तुं शक्यते । शिक्षाद्वारा मनुष्ये अन्तर्निहितपूर्णतायाः विकासः भवति । वेदान्तदर्शनानुसारं प्रत्येकस्मिन् बालके, अनन्तज्ञानं (Omnipotence) एवम् अनन्तव्यापकता (Omnipresence) इत्यादिशक्तयः विद्यन्ते । परन्तु तस्य उपर्युक्तशक्तिविषयकं ज्ञानं न भवति । शिक्षाद्वारा बालकस्य एतासां शक्तीनां प्रत्ययः कार्यः । तथा बालकस्य उत्तरोत्तरविकासार्थं सहायता भवति । स्वामिविवेकानन्दमते शिक्षा मानवानां पूर्णतायाः अभिव्यक्तिः । श्रीविवेकानन्दः नव्यवेदान्ते एवम् अभिव्यनक्ति– शिक्षाद्वारा मनुष्यनिर्माणं भवतीति । समस्ताध्ययनानाम् अन्तिमलक्ष्यं मानवस्य विकासः । यस्याध्ययनद्वारा मनुष्यस्य सङ्कल्पशक्तेः प्रवाहस्य संयमनद्वारा प्रभावोत्पादकरूपेण निर्माणं कर्तुं शक्यते सा एव शिक्षा । गान्धिमहोदयवत् स्वामीविवेकानन्दोऽपि तथ्यात्मकज्ञानमथवा सूचनाः शिक्षारूपेण न मनुते, स्वामी लिखति – 'शिक्षा नाम केवलं (ज्ञान) परिचयसमुच्चयः अथवा विषयसङ्ग्रहो वा नास्ति, येन अस्माकं मस्तिष्कं पूर्णं भवति, एवम् आजीवनपठनेनापि जीवनमार्गप्रदर्शनं नैव लभ्यते । अस्माभिः तेषां भावाः, विचाराः च आत्मसात्करणीयाः भवन्ति, यैः अस्माकं जीवननिर्माणं भवति, मनुष्यत्वस्य चरित्रस्य च निर्माणं भवति । यदि शिक्षा विषयसङ्ग्रहणमात्रं करोति चेत्, पुस्तकालयः सर्वेभ्यः महान् विश्वकोषः, ऋषिः अपि भवितुमर्हति' ।


ISSN : 2320-740X

**शिक्षायाः उद्देश्यानि –**

स्वामिनो नव्यवेदान्तानुसारं शिक्षायाः उद्देश्यं मनुष्यान्तर्निहितपूर्णताभिव्यक्तिः अस्ति । पूर्णता स्वाभाविकरूपेण मनुष्येषु वर्तत एव, परन्तु शिक्षाद्वारा अस्याः अनावरणं मात्रं करणीयम् । अपूर्णस्य पूरणं बाह्यप्रयत्नेभ्यः नैव शक्यते । शिक्षायाः अस्यान्तिमोद्देश्यस्य प्राप्त्यर्थम् अस्य विश्लेषणं लक्ष्यरूपेण अथवा ध्येयरूपेण स्वीकर्तुं शक्यते ।

1. **शारीरकपूर्णता** – पूर्णताप्राप्त्यै प्रथमलक्ष्यं (ध्येयं) शारीरिकस्वस्थ्यम् । श्रीस्वामिनः विचारे शारीरिकदुर्बलता अस्माकं पूर्णताम् अत्यन्तं बाधते । सः वदति – प्रथमतः अस्माकं युवकाः सबलाः भवेयुः । धर्मः अनन्तरविषयः भवति । यदि शरीरस्वास्थ्यं सम्यग् भवति चेत् भवान् गीतापठनापेक्षया पादकन्दुक (Foot Ball) क्रीडनेन स्वर्गनैकट्यं प्राप्तुं शक्नोति । स्वस्य पादस्योपरि दृढतापूर्वकं स्थातुं शक्नोति । यदि त्वं स्वान्तःकरणे मानवशक्तेः अनुभवं कर्तुं शक्नोषि, तर्हि त्वम् उपनिषदाम् एवम् आत्मनः महत्त्वम् अधिकसमीचीनरूपेण ज्ञातुं शक्नोषि ।

2. **जीवनसङ्घर्षणार्थं सन्नद्धता** – स्वामिमतानुसारं शिक्षायाः द्वितीयं लक्ष्यं – बालकानां जीवनसङ्घर्षार्थं सन्नाहः । जीवननिर्माणार्थं साङ्केतिकी एव वैज्ञानिकशिक्षा आवश्यकी । स्वामिनां चिन्तनानुसारं यः कोऽपि प्रकृतेः विरुद्धं सङ्घर्षं करोति, तस्य चैतन्यस्य विकासः भवति । यत्र चेष्टा पुरुषार्थो वा भवति, तत्र जीवनस्य चिह्नं भवति, चेतनायाः प्रकाशश्च वर्तते । स्वामी भारतीयेषु एतादृशसङ्घर्षाभावम् अवलोकितवान्। अतः स्वामी लिखति अद्यतन काले त्वं जडतुल्यः जातः । बहु प्राचीनकालादारभ्य त्वं हीनः, त्वम् अशक्तः, त्वयि या कापि शक्तिर्नास्ति, एतादृशवादान् श्रुत्वा श्रुत्वा एवमेव सञ्जाताः सर्वे ।

   जीवनसङ्घर्षणनिर्माणान्तर्गतरूपेण आजीविकाशिक्षायाः समावेशोऽपि भवति । स्वामिमतानुसारं तत्कालीनशिक्षा मनुष्ये केवलं बाह्यपरिवर्तनम् उत्पादयति । परन्तु मनुष्यस्य आजीविकोपार्जनकरणे अशक्ता भवति। जीवनसङ्घर्षसन्नाहस्य प्रतिफलं उत्पादनरूपेण प्रस्फुटितं भवितव्यम् ।

3. **राष्ट्रियतायाः एवम् अन्ताराष्ट्रियतायाः विकासः** – स्वामी विवेकानन्दः राष्ट्रियता – अन्ताराष्ट्रियतयोर्मध्ये विरोधाभासं न पश्यति । नव्यवेदान्तानुसारं सम्पूर्णमानवतायाम् एकत्वं विद्यते । परन्तु अस्य विकासः क्रमशः भवति । स्वामिमतानुसारं शिक्षायाः एकं लक्ष्यं राष्ट्रियभावनायाः राष्ट्रियगौरवस्य विकासः । विवेकानन्दः वदति – हे वीर ! साहसस्य अवलम्बनं कुरु । गर्वेण वदतु अहं भारतीयोऽस्मि, सर्वे भारतीयाः मे भ्रातरः । भवान् उच्चैः वदतु यत् मूर्खभारतीयः, ब्राह्मणभारतीयः चण्डालभारतीयः सर्वे मम भ्रातरः सन्ति। भारते दीनदुःखिजनैस्साकम् एकीभूय गर्वेणोच्चैः वदतु – प्रत्येकं भारतवासी मम भ्राता । भारतीयाः मे प्राणाः । भारतस्य देवी देवताः मम ईश्वरः । भारतसमाजः मम बाल्यस्य डोला, तारुण्यस्य उद्यानवनं,


ISSN : 2320-740X

वार्धक्यस्य काशी भवति । सोदर! वद भारतस्य मृत्तिका मम स्वर्गः, भारतस्य कल्याणमेव मम कल्याणम् अहर्निशं वाक्यमिदं कण्ठस्थं भवतु । हे! गौरीनाथ! मह्यं मनुष्यत्वं ददातु । मम दुर्बलतां, कापुरुषतां च दूरं करोतु, मातः! मां मानवं कुरु ।

4. **चरित्रविकासः** – स्वामिमतानुसारं शिक्षायाः चतुर्थं लक्ष्यं वर्तते नैतिकचरित्रस्य विकासः । स्वामी वदति– अद्यतनकाले चरित्रवतोः स्त्रीपुरुषयोः आवश्यकता वर्तते । यस्य कस्यापि राष्ट्रस्य विकासः तस्य सुरक्षा अधिकतया

चरित्रवतां नागरिकाणामुपरि निर्भरं भवति । यदि वयं भावि नागरिकाणां कृते शिक्षां दद्मः चेत् तत् सुदृढतया चरित्रनिर्माणमित्याधारेण स्यात् । एवं चरित्रनाशात् सर्वमपि नष्टं भवति ।

**छात्रस्वरूपम् –**

अस्य मतानुसारं शिक्षा बालकस्य जन्मसिद्धः अधिकारः भवति । यस्य कस्यापि राष्ट्रस्योन्नतिः तस्य राष्ट्रस्य जनताशिक्षायाः उपरि निहिता भवति, अयं वदति – जनतायाः शिक्षा, बुद्धिविकासानुसारेणैव देशस्य विकासो भवति । देशस्य पुनरुत्थानार्थं जनसाधारणशिक्षा अनिवार्या इति । स्वामी मनुते, "मम विचारे जनसाधारणस्य अवहेलना महत् राष्ट्रियं पापमेवमस्माकं पतनस्य कारणं भवति । यावत्पर्यन्तं भारतीयसामान्यजनस्य शिक्षा, समीचीनाहारः समीचीनसुरक्षा च न दीयेत तावत्पर्यन्तं सर्वोत्तमराजनैतिककार्यमपि व्यर्थं भवति" । विवेकानन्दानुसारं प्रत्येकस्मिन् अनन्तज्ञानमन्तर्निहितं भवति । बालकः अनन्तज्ञाननिधिः भवति। शिक्षाद्वारा बाह्यात् ज्ञानस्यारोपणं कर्तुं न शक्यते । शिक्षा बालके विद्यमानज्ञानस्य केवलमनावरणं करोति । बालकस्य विकासार्थमथवा तस्य प्रगत्यै बलात् प्रयासः न कर्तव्यः । बालकबालिकयोः समक्षं सदा विध्यात्मकविचाराणां प्रस्तुतीकरणमावश्यकम् । निषेधात्मकविचाराः दौर्बल्यं जनयन्ति । छात्रस्य शिक्षा तस्यान्तरिकावश्यकतानुसारं निश्चेतव्या । शिक्षां प्राप्तुं सर्वेभ्यः समानावकाशः दातव्यः । अस्माकं देशे स्त्रीशिक्षाविषये विद्यमानभेदभावकारणात् अस्माकं हिन्दुसमाजे स्त्रीणां शिक्षाविषये नैर्लक्ष्यं सम्प्राप्तम् । स्वामिमतानुसारं राष्ट्रियोन्नत्यै स्त्रीशिक्षा अत्यन्तमावश्यकी । सः वदति प्रथमतया स्त्रीभ्यः शिक्षां ददातु, तदा ताः वक्ष्यन्ति ताभ्यः किं सौकर्यमावश्यकमिति ।

शिक्षायां विद्यमानलैङ्गिकभेदभावः आर्थिकसामाजिककारणेष्वपि भेदभावं जनयति । शिक्षासौकर्यं सर्वेषां कृते समानरूपेणोपलब्धं स्यात् । दरिद्रतायां शिक्षाप्राप्तेः सम्भावना अधिकतया भवति । स्वामी वदति प्रपञ्चे महाचरित्रवतां पुरुषाणामध्ययनेन एवं वक्तुं शक्यते यत् अधिकतया सुखापेक्षया दुःखपूर्णपरिस्थितयः एव महत्त्वकारिकाः । सा दरिद्रता आसीत् यया सम्पन्नतायाः अपेक्षया तेभ्यः अधिकज्ञानाय अवसरः दत्तः । एतादृशतुलनायां तस्य हृदयगततेजसः प्रकटनं भवति ।


ISSN : 2320-740X

**गुरुशिष्ययोः सम्बन्धः –**

स्वामिविवेकानन्दानुसारं शिक्षाग्रहणार्थं प्रथमनियमोऽयमस्ति, शिक्षार्थिनां हृदये शिक्षकं प्रति श्रद्धा आवश्यकी। स्वामी वदति– शिक्षार्थिनां हृदये शिक्षकं प्रति श्रद्धा, विनम्रता, समर्पणाभावः, सम्मानभावना आवश्यकं वर्तते। विना एतान् गुणान् कोऽपि विकासः न भवति। येषु देशेषु शिक्षकशिक्षार्थिनोः सम्बन्धस्योपेक्षां कुर्वन्ति तत्र शिक्षकः केवलं व्याख्यातृ रूपेण मात्रमवशिष्यते। तत्र शिक्षकः शतरूप्यकेभ्यः स्वकोशपूरणार्थं मात्रं यतते, छात्रः शिक्षकव्याख्यानात् स्वमस्तिष्कस्य पूरणार्थं यतते। एवमुभावपि स्वस्वमार्गेषु चलतः। इतोऽप्यधिकतया उभयोर्मध्ये कोऽपि सम्बन्धः न भवति। स्वामिविवेकानन्दानुसारं गुरुकुलं शिष्यशिक्षकयोर्मध्ये उचितसम्बन्धस्थापने अनुकूलं भवति। पूर्वकालिकगुरुकुलपद्धतेः वर्तमानस्थित्यनुसारं संशोधनं कृत्वा पुनारचना करणीया इति। स्वामी वदति– मम विचारानुसारं शिक्षायाः अर्थः गुरोः कुलवासः। यस्य चारित्र्यं जाज्वलमानाग्नितुल्यं भवति, तेन साकं सहवासी शिष्यः बाल्यावस्थातः भवितव्यः। येन सहवासेन उच्चतमशिक्षायाः सजीवादर्शाः शिष्यस्य समीपे भवेयुः।

स्वामिनः कृते दृढविश्वासः वर्तते, यत् चरित्रवतः गुरोः आदर्शजीवनस्यानुकरणद्वारा बालकेषु अन्तः स्रोतसः देवत्त्वस्य जागरणं कर्तुं शक्यते। स्वामी विवेकानन्दः विद्यार्थिदशायां ब्रह्मचर्यपालनं मुख्यमिति अकथयत्। तस्य मतानुसारं ब्रह्मचर्यावस्थायां बालकैः तेषां मनोवाणिकर्मभिः ब्रह्मचर्यपालनं कर्तव्यम्। अनेन सङ्कल्पशक्तिः दृढा भवति। आध्यात्मिकशक्तेः आविर्भावः भवति। सूक्ष्मतत्त्वानाम् अवगमने हृदयङ्गमाय च मेधोत्पत्तिः भवति तथा वाग्मितादिशक्तीनां विकासः भवति।

**पाठ्यचर्चा**

प्रत्येकं देशस्य कश्चन सांस्कृतिकविशेषः भवति, यः पाठ्यक्रमनिर्माणस्य धरातलप्रदानं करोति। भारतीयसंस्कृतेः आधारः अध्यात्मविचारः। अपि च आध्यात्मिकविचाररहितः यः कोऽपि पाठ्यक्रमः सार्थकः न भवितुमर्हति। जीवनं परिपूर्णं कर्तुं शिक्षायाः आधारः आध्यात्मिकता भवितव्या। अस्माकं शिक्षा, बुद्धिः एवम् अस्माकं विचारः इति सर्वं पूर्णरूपेण आध्यात्मिकं भवति। स्वामी अध्ययनं तपोरूपेण चिन्तयित्वा हिन्दूनां कृते ध्यानोन्मुखतां वैज्ञानिकान्तर्दृष्टेरुपलब्धौ सहायकरूपेण अवगतवान्। स्वामिविवेकानन्दानुसारं धर्मः शिक्षायाः आत्मा भवति। परन्तु धर्मस्य परिभाषा व्यापकरूपेण भवति। यस्य कस्यापि सम्प्रदायविशेषस्य धर्म इति संज्ञादानम् उचितं न भवति। अस्य दृष्टौ धर्मः एकं साधनं भवति, एकानुभूतिः भवति, आत्मसाक्षात्कारः च भवति। स्वामी धर्मनिरपेक्षपाठ्यक्रमस्य कल्पनामपि न करोति। हृदयस्य शिक्षायै पाठ्यक्रमे धर्मस्य कृते उचितस्थानं प्रदेयं भवति। धर्मस्य शिक्षा पाठ्यक्रमे अन्यविषयरूपेण न भवितव्या। पाठ्यक्रमस्यान्यविषयैः मनसः बुद्धेश्च परिष्कारः भवति। परन्तु धर्मः हृदयं समुन्नयति। स्वामिचिन्तनानुसारम् अत्यधिकमानसिकप्रशिक्षणात् अधर्ममनुष्याणां निर्माणं भवति। पाश्चात्यशिक्षायाम् एकदोषः भवति यत् इयं मनुष्यम् अत्यन्तं


ISSN : 2320-740X

स्वार्थिनं करोति । बुद्धिः व्यक्तिं तस्याः सर्वोच्चस्तरं प्रति न प्रापयितुं शक्नोति, तादृशस्तरं प्रति हृदयं प्रापयति, हृदये ज्ञानस्य प्रकाशः भवति । अतः हृदयस्य परिष्कारः आवश्यकः । ईश्वरः हृदयस्य माध्यमात् एव अस्माकं सन्देशं ददाति ।

स्वामिमतानुसारमाध्यात्मिकतायास्साकं विज्ञानस्य एवं साङ्केतिकशिक्षायाः च समन्वयः अपेक्षितो वर्तते । पाश्चात्यविज्ञानस्य भारतीयवेदान्तेन साकं समन्वयः क्रियते चेत् जगति सुखं समृद्धिः शान्तिश्च उत्पद्यन्ते इति स्वामी विश्वसिति। विज्ञानद्वारा मानवजीवनम् अनेकक्लेशेभ्यः मुक्तं भवति । अपि च जीवनस्य सौकर्याणामुपलब्धावपि विज्ञानस्य योगदानं वर्तते । परन्तु वेदान्तचिन्तनाभावे एतत् विज्ञानं विनाशकारकं, स्वार्थवर्धकं च भवितुमर्हति । अतः वेदान्तविज्ञानयोः योगेन मनुष्यस्य चिन्तनं विवेकयुक्तं भवति । तेन मानवतायाः अधिकसुखं च मिलति । स्वामिमतानुसारं वेदान्तेन साकं भारतीयजनतायै सम्पन्नता समृद्धिः च आवश्यकी, यत् विज्ञानसमन्वयीभूतौद्योगीकरणात् आनेतुं शक्यते । अतः पाठ्यक्रमे वैज्ञानिक–साङ्केतिक–औद्योगिकशिक्षायै महत्त्वपूर्णस्थानं दातव्यम् । शिक्षायाः पूर्णतायै शिक्षायां कलानाम् उपेक्षा न कर्तव्या । स्वामी वदति– एशियावासिनाम् आत्मा कलामयः भवति । एते कलारहितवस्तूनाम् उपयोगं न कुर्वन्ति । कला अस्माकं धर्मस्य एकाङ्गं भवतीति ते जानन्ति ।

अयं भारतीयजीवनस्य सर्वभागेषु कलात्मकताम् अपश्यत् । एवं शिक्षायां कलासाधनार्थं स्थानं दातव्यम् इति बलेनोक्तवान् । भाषाध्यापनदृष्ट्या स्वामिनां विचारः व्यावहारिकः एवं समन्वयवादी च भवति । पाश्चात्त्यादर्शाः भारतीयानाम् अनुपयोगिनः इति चिन्तयन्नपि विज्ञानशिक्षार्थम् आङ्ग्लभाषा आवश्यकी इति अवोचत् । स्वामी देशस्य अखण्डतायै सर्वमान्यभारतीयभाषायाः आवश्यकतां प्रतिपादितवान् । अनया दृष्ट्या सर्वेभ्यः बालकेभ्यः अन्तःप्रादेशिकविनिमयार्थं सार्वदेशिकभाषाभ्यसने उपदेशमदात् । सामान्यज्ञानार्थं मातृभाषां सर्वापेक्षया शक्तिमयमाध्यमत्वेनाभ्युपगतवान् । एवं प्रारम्भिकशिक्षायां माध्यमरूपेण मातृभाषाद्वारा अध्यापने बलं दत्तवान् । मातृभाषायां शिक्षा प्रादेशिकभाषाणाम् उन्नत्यै आवश्यकी भवति चेदपि स्वामी संस्कृतभाषां सर्वोपरि मनुते । तस्य मतानुसारं संस्कृतस्य ध्वनिमात्रम् अस्माकं जातेः कृते शक्तिं क्षमतां, प्रतिष्ठां च प्रददाति । स्वामी वदति केवलं प्रादेशिकभाषामाध्यमेन शिक्षाप्रदानं, विचारावगमनं वा शिक्षा न भवति। किन्तु संस्कृतेरपि प्रदानावश्यकता वर्तते । यद्यपि समाजः विकासम् औन्नत्यं वा प्राप्नोतु नाम परन्तु यावत् जनसामान्ये संस्कृतभाषायाः प्रचारः नैव क्रियते तावत् समाजस्य विकसितावस्थायां स्थायित्वं न भवति । अनेन मानसिक–बौद्धिक–आध्यात्मिकशिक्षया साकं शारीरिकशिक्षायाः अपि समानमहत्त्वं दत्तम् । अयम् आध्यात्मिकबलेन साकं शारीरिकबलमपि आवश्यकमिति मन्यते। यूनां सम्मुखे भाषणदानसमये एकवारं स्वामी अवोचत् — यत् गीतायाः मर्म ज्ञातुं शारीरिकशक्तिः आवश्यकी। शक्तिरेव जीवनं परमसुखम् अजरम्, अमरजीवनं च भवति । दुर्बलतैव मृत्युः । इयं कदापि दुर्गमपीडा वर्तते ।


ISSN : 2320-740X

**शिक्षणविधिः** – स्वामिविवेकानन्दानुसारं ज्ञानप्राप्तेः एकमात्रम् विधिः भवति एकाग्रता । यावती एकाग्रतायाः शक्तिः भवति, तावदधिकं ज्ञानं प्राप्तुं शक्यते । किमुत पादुकापरिष्कारकर्तापि (Polisher) एकाग्रताकारणादेव स्वकार्यं सम्यक् कर्तुं प्रभवति। एवं पाचकोऽपि एकाग्रताकारणादेव स्वादु पाकं कर्तुं प्रभवति । एकाग्रतातः अतिरिक्तरूपेण, अनासक्तिः (Detachment) अपि अत्यन्तप्रबला शक्तिः भवति । (अनासक्तेरभावे एकाग्रता नायाति) स्वामी लिखति – "शिक्षायाः मूल्यं तथ्यानां सङ्ग्रहो न । किन्तु एकाग्रता इति मन्ये यदि पुनः मया शिक्षा प्राप्तव्या भवति चेत् एकाग्रता – अनासक्तिरूपशक्तिदायस्य विकासद्वारा एवं मनोरूपस्य निर्दोषयन्त्रस्य साहाय्येन इच्छामात्रात् तथ्यानां सङ्कलनं कर्तुं शक्नोमि' ।

स्वामी आधुनिकभारतीयपरिस्थितीनां प्राक्कल्पनारूपेण यत् समन्वयकारिदृष्टिकोणेन प्रस्तुतवान् तस्मिन् बहु किमपि अद्यतनपरिस्थितिषु ग्रहणीयमस्ति । वास्तवरूपेण वेदान्तज्ञानयोः समन्वयस्य एतादृशी आवश्यकता प्रबलरूपेण कदापि नासीत् तादृशी आवश्यकता अधुना वर्तते । स्वामिविवेकानन्दस्य विचारः सार्वभौममहत्त्वसम्बन्धी भवति । स्वामिनं केवलं हिन्दूदार्शनिकः इत्युक्त्वा तस्य विचाराणां सङ्कीर्णतायाः सीमायाम् आबन्धनम् उचितं न भवति । स उवाच – 'वयं मानवनिर्माणस्य धर्मं वाञ्छामः । वयं मनुष्यस्य निर्माणकरणरूपसिद्धान्तम् इच्छामः, एवं वयं मानवस्य सर्वाङ्गीणनिर्माणस्य शिक्षाम् अभिलषाम' इति ।

उपयुक्तग्रन्थसूची


1. भारतीयदर्शन – डा. बलदेव उपाध्याय
2. शिक्षा की दार्शनिकपृष्ठभूमी – डा. लक्ष्मीलाल. के ओड
3. विश्व की श्रेष्ठ शिक्षाशास्त्री – डा. रामशकल पाण्डेय
4. शिक्षायाः दार्शनिकाधाराः – डा. सोमनाथ साहु
5. दार्शनिकी शिक्षाधारा – डा. रामचन्द्रुल बालाजी
6. भारतीयाः शिक्षाशास्त्रिणः – डा. लोकमान्यमिश्रः


***

# पश्य मृगो धावति इति वाक्यार्थविचारः


**डा.चन्द्रशेखर भट्टः**

सहायकाचार्यः,व्याकरणविभागः


**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः । फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥**

धातुः फलव्यापारयोः वाचकः । कर्तृकर्मसङ्ख्याकालाः तिङर्थः । कर्तृप्रत्ययसमभिव्याहारे आख्यातार्थकर्तुः धात्वर्थव्यापारे विशेषणतया अन्वयः । एवं कर्मप्रत्ययसमभिव्याहारे आख्यातार्थकर्मणः


ISSN : 2320-740X

धात्वर्थफले विशेषणतया अन्वयः । तिङर्थसङ्ख्यायाः समानप्रत्ययोपात्तकर्तृकर्मणोरन्वयः । धात्वर्थापेक्षया प्रत्यासत्त्यतिशयसत्वात् । अत्र च आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति आख्यातार्थकर्तृकर्मजन्योपस्थितिः हेतुः इति कार्यकारणभावः सम्पन्नः । आख्यातार्थकालस्य प्रधानीभूते धात्वर्थव्यापारे अन्वयः । एवञ्च तिङर्थः सर्वात्मना विशेषणमेव । धात्वर्थव्यापार एव प्रधानम् । चैत्रस्तण्डुलं पचति इत्यत्र शाब्दबोधः एकत्वसङ्ख्याविशिष्टचैत्राभिन्नकर्तृकः तण्डुलाश्रयविक्लित्त्यनुकूलो वर्तमानकालिको व्यापार इति । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानम्' इति न्यायेन प्रत्ययार्थस्यैव प्राधान्यं बोध्यते, धात्वर्थप्राधान्ये तन्न्यायविरोधोऽस्ति । परन्तु सः न्यायः उत्सर्गः, आख्यातादन्यत्र पाचकः औपगवः इत्यादौ तस्य न्यायस्योपयोगः। तिङन्ते तु "भावप्रधानमाख्यातम्" इति निरुक्तवचनं प्रमाणं धात्वर्थव्यापारस्य प्राधान्ये। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाता इत्युपक्रम्य भावप्रधानमाख्यातम् इति आख्यातलक्षणं, सत्वप्रधानानि नामानि इति नामलक्षणं च निरूपितं निरुक्तकारेण । प्रकृतिः प्रत्ययो विभक्तिरित्येतावन्नाम । सत्ता, द्रव्यं, लिङ्गं सङ्ख्येति नामार्थः इति तद्भ्याष्यात् सुबन्तं नामपदेन बोध्यते, आख्यातपदेन तिङन्तं बोध्यते । "आख्यातमाख्यातेन क्रियासातत्ये" इति वार्तिके तिङन्ते एवाख्यातशब्दप्रयोगाच्च । न्यायवार्तिककारेण "ते विभक्त्यन्ताः पदम्" इति न्यायसूत्रविवरणे द्वयी विभक्तिः स्वादयः, तिबादयश्च। तत्र स्वाद्यन्तं नाम, तिबाद्यन्तमाख्यातम् इति साक्षादुक्तम् । अतश्च निरुक्तवाक्ये आख्यातशब्देन तिङन्त एव ग्राह्यः। ततश्च तिङन्ते भासमानानां पदार्थानां मध्ये भावः प्रधानम् इत्युक्तं भवति । एवञ्च निरुक्तवचनेन प्रत्ययार्थप्राधान्यबोधकस्मृतिः सङ्कोच्यते । फलव्यापारौ धात्वर्थः इत्युक्तत्वात् धात्वर्थफलापेक्षया व्यापारस्य प्राधान्यं बोधयेत् तद्वचनम् इति यद्युच्यते तर्हि महाभाष्यकारवचनं मानमिति वक्तव्यम् । तथा हि – भूवादिसूत्रे भाष्ये भाववचनो धातुरिति न्यासे कथं भाववचनाः पचादयः इति प्रश्नं विधाय 'यदेतेषां भवतिना सामानाधिकरण्यं पचति भवति, पक्ष्यति भवति, अपाक्षीत् भवति इत्युक्तम् । तदग्रे किम्सम्बन्धमूलकोऽयं पचति भवति इति प्रयोगः इत्याशङ्क्य (का तर्हीयं वाचो युक्तिः पचति भवतीति) समाहितम् – एषैषा वाचो युक्तिः पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति इति । पचति इत्यत्र तिङन्ते व्यापारप्राधान्याभावे तिङर्थविशेषणत्वे स्वोत्तरतिङर्थे विशेषणतया अन्वितस्य धात्वर्थस्य अन्यत्र विशेषणत्वासम्भवेन पचति भवति इति भाष्यप्रयोगो न सङ्गच्छेत । किञ्च ह्रस्वो नपुंसके प्रातिपदिकस्य इति सूत्रस्थं रमते ब्राह्मणकुलम् इति क्रियाप्रधानम् इति च वचनमत्र प्रमाणम् ।

यदि 'प्रकृतिप्रत्ययौ-----' इति प्रत्ययार्थप्राधान्यबोधकन्यायः सार्वत्रिकः स्यात् तर्हि आख्यातार्थस्य कर्तुः प्राधान्यात् तस्य च देवदत्तादिभिः सह अभेदान्वयेन चैत्रः पचति इत्यादिवाक्ये विक्लित्यनुकूलवर्तमानकालिकव्यापाराश्रयाभिन्नः चैत्रः इति बोधापत्त्या प्रथमान्तपदार्थस्य प्राधान्यं स्यात् । [नैयायिकास्तु आख्यातार्थः कृतिरित्युक्त्वा प्रथमान्तस्य मुख्यत्वमभ्युपगच्छन्ति ।] आख्यातार्थः कर्ता इति स्वीकारेऽपि तद्विशेष्यकः प्रकृत्यर्थव्यापारप्रकारको बोधो न स्वीकार्यः । प्रत्ययार्थप्रकारकप्रकृत्यर्थविशेष्यक एव


ISSN : 2320-740X

बोधः स्वीकार्यः । अन्यथा पश्य मृगो धावति, इत्यत्र एकवाक्यता न स्यात् । एतादृशप्रयोगाणां सत्वे 'क्रियापि कृत्रिमं कर्म' इति भाष्यवचनं गमकम् । प्रकृत्यर्थविशेष्यकबोधे तु एकत्वसङ्ख्याविशिष्टमृगाभिन्नाश्रयकं वर्तमानकालिकं यद्धावनं तत्कर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनम् इति एकवाक्यता लभ्यते । प्रत्ययार्थविशेष्यकबोधे तु धावनक्रियाश्रयाभिन्नो मृगः, दर्शनानुकूलक्रियाश्रयाभिन्नस्त्वम् इति बोधापत्त्या एकमुख्यविशेष्यकबोधजनकत्वरूपमेकवाक्यत्वं न स्यात् ।

नन्वस्तु प्रत्ययार्थप्रकारकप्रकृत्यर्थविशेष्यको बोधः, तावता भावप्रधानमाख्यातम् इति निरुक्तमविरुद्धं भवति । परन्तु तिङन्ते विशेष्यतया उपस्थितव्यापारस्य आश्रयतासम्बन्धेन प्रथमान्तार्थे अन्वयोऽस्तु इत्यपि वादो न युक्तः । 'यत्रोभे भावप्रधाने भवतः' इति निरुक्तविरोधो भवति । यत्र वाक्ये उभे नामाख्याते भवतः तत्र ते भावप्रधाने भवत इत्यर्थः।

किञ्चैवं धावनक्रियाविशेष्यस्य मृगस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीया स्यादेव । न चेष्टापत्तिः, पश्य मृगो धावति इत्यादि स्वारसिकप्रयोगाणामेव विलयापत्तिः । अत एव लटः शतृशानचौ इति सूत्रे लकारार्थकर्तृप्राधान्ये अपचदोदनं देवदत्तं पश्य इति प्रयोगः आपादितः । यद्यपि धावति इत्यत्र तिङा धात्वर्थधावनव्यापाराश्रयकर्तुरुक्तत्वेन मृगशब्दात् प्रथमा प्राप्ता सा च अन्तरङ्गा तथापि प्रधानक्रियानुरोधेन कर्मत्वे द्वितीयैव स्यात् । एवञ्च 'धावति मृगं पश्य' इति प्रयोगापत्तिः ।

नन्वेवम् अप्रथमासामानाधिकरण्ये शतृशानचोः नित्यत्वात् लादेशेषु वासरूपविधेरभावाच्च ईदृशः प्रयोगो न भवति खलु ? अत्रोच्यते – शतरि सत्यपि द्वितीया तु स्यादेव । तथा च धावन्तं मृगं पश्य इत्येव स्यान्न त्वभीष्टः प्रयोगः ।

प्रत्ययार्थप्रकारकप्रकृत्यर्थविशेष्यकबोधस्वीकारे तु प्रकृत्यर्थे विशेषणतया अन्वितस्य अन्यत्र विशेषणतयान्वयाभावेन कर्मत्वाद्यप्राप्तौ अनभिहितशक्त्यन्तरावेशाभावेन प्रातिपदिकार्थे प्रथमायां प्रथमान्तेनैव सामानाधिकरण्यात् न शतृप्रसङ्गः नापि द्वितीयापत्तिश्च । किञ्च लडन्तप्रयोगे अप्रथमासामानाधिकरण्ये सति शतुः प्राप्तावपि अपाक्षीत् देवदत्तोऽवेहि इत्यादौ तु तन्नास्त्येव।

ननु यत्तच्छब्दयोरध्याहारेण द्वितीयापत्तिः नास्ति । तथा च यो धावति मृगः तं पश्य इति पश्य मृगो धावति इत्यत्र दोषाभावः । पाको भवति इत्यर्थे पचति भवति इति नेष्यत एव इति चेत् उच्यते – अध्याहारो न युक्तः । एकवाक्यतया अन्वये सम्भवति अध्याहारेण वाक्यभेदे गौरवम् । किञ्च एतादृशस्थले अध्याहारस्य भूवादिसूत्रभाष्यस्य एवं शतृसूत्रभाष्यस्य च विरोधो भवति । किञ्च ऋषीणामेकवाक्यतया बोधे साधुत्वस्य इच्छासत्वे तत्र अस्मदादीनामनिच्छायाः अकिञ्चित्करत्वात् ।


ISSN : 2320-740X

धात्वर्थमुख्यविशेष्यकबोधवादिनां वैयाकरणानां मते तु पश्य मृगो धावति इत्यत्र धात्वर्थधावनस्य दर्शनक्रियायां कर्मत्वेन अन्वयः । तस्य च प्रातिपदिकत्वाभावात् द्वितीयापत्तिः नास्ति । एवञ्च प्रथमान्तमुख्यविशेष्यकबोध इति नैयायिकानामाघोषो न युक्तः ।

न च योऽश्वमेधेन यजते स ब्रह्महत्यां तरति इति वाक्यात् अश्वमेधयागकर्ता यः स ब्रह्महत्यातरणकर्ता इति बोधोदयात् क्रियाविशेष्यकशाब्दबोध इति सिद्धान्तभङ्गः इति वाच्यम्, तत्रापि यत्कर्तृका यागक्रिया तत्कर्तृका तरणक्रिया इत्यर्थः इति सिद्धान्तभङ्गाभावात् ।

***

# निर्गुणब्रह्मोपासनम्

**डा. गणेश ईश्वर भट्टः**

सहायकाचार्यः, वेदान्तविभागः

परमपुरुषार्थो मोक्षः आत्मज्ञानैकलभ्य इति **तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय** (श्वे. उ. ६–१५) इत्यादिश्रुतीनामाघोषः । तच्च ज्ञानं श्रवणादिसाधनानुष्ठानेन जायते, **आत्मा वा अरे द्रष्टव्य** इत्यात्मदर्शनमनूद्य, **श्रोतव्यो मन्तव्यो निदिध्यासितव्य** (बृ.उ.२–४–५) इति श्रवणादीनां विधानात् । श्रवणाद्यनुष्ठानं च चित्तैकाग्र्यमपेक्षते । तथा च श्रुतिः **श्रवणायापि बहुभिर्यो न लभ्यः** (क.उ.१–२–७) **दृश्यते त्वग्र्यया बुद्ध्या** (क.उ. १–३–१२) इत्यादिः । अतः चित्तैकाग्र्यसम्पादनद्वारा ब्रह्मविद्योपकारित्वात् उपनिषत्सु बहुत्र उपासनानि विहितानि दृश्यन्ते । यथोक्तं छान्दोग्यभाष्ये –**उपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वात् अद्वैतज्ञानोपकारकाणि आलम्बनविषयत्वात् सुसाध्यानि** (छा. उ. भाष्योपोद्घातः) इति । शास्त्रेषु उपासनानि प्रायः सगुणब्रह्मविषयाणि उपादिष्टानि । अतः निर्गुणब्रह्म ज्ञेयमेव, न तु तस्य उपासनं सम्भवतीति बहवो मन्यन्ते । किन्तु योगिवर्याः ब्रह्मानुभवसम्पन्नाः विद्यारण्यमुनयः ध्यानदीपे निर्गुणब्रह्मोपासनं शास्त्रसम्मतम्, सम्भवति च तदिति सयुक्तिप्रमाणम् उपापादयन् । तदिह किञ्चित् प्रस्तूयते ।

तथा हि साङ्ख्यं योगश्चेति ब्रह्मावाप्तौ मार्गद्वयम् । तत्र बुद्धिमान्द्यादिप्रतिबन्धरहितस्य श्रवणादिद्वारा ब्रह्मसाक्षात्कारो झटिति सिद्ध्यतीति साङ्ख्यमार्गः मुख्यः कल्पः । यस्तु तस्मिन् मार्गे असमर्थः, तेन योगशब्दितं निर्गुणब्रह्मोपासनम् उपादेयम्। तथा चोक्तम् –

**ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितम् । महावाक्यैस्तथाऽप्येतद्दुर्बोधमविचारिणः ॥**

**अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाऽप्यसम्भवात् । यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् ॥**

(पं.द. ९–२०,५४) इति ।



ISSN : 2320-740X

उपासनानि संवादिभ्रमवत् सफलानि भवन्ति । तथा हि भ्रमो द्विविधः संवादिभ्रमः विसंवादिभ्रमश्चेति । यथा दीपप्रभायां मणिभ्रमः विसंवादी, तज्जन्यप्रवृत्त्या मणेरलाभात् । मणिप्रभायां मणिभ्रान्तिस्तु मणिं प्रापयतीति सः संवादिभ्रमः । विवृतञ्चैतद्ग्रन्थकारेण–

**गोदावर्युदकं गङ्गोदकं मत्वा विशुद्धये । सम्प्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः ॥**

**ज्वरेणाप्तः सन्निपातं भ्रान्त्या नारायणं स्मरन् । मृतः स्वर्गमवाप्न्तोति स संवादिभ्रमो मतः ॥ (पं.द. ९–०८,०९)** इति ।

यथेमे दृष्टान्ताः, तथैव ब्रह्मोपासना अप्रमा सत्यपि ब्रह्मप्रमोत्पादकत्वात् मुमुक्षुणा अनुष्ठेया । आदौ वेदान्तेभ्यः ब्रह्म प्रत्यगभिन्नं सच्चिदानन्दात्मकमिति परोक्षतया ज्ञात्वा, ततः अपरोक्षज्ञानोत्पत्तये तद्ब्रह्म शास्त्रोक्तरीत्या उपासनीयम्। तच्चोपासनं सगुणस्येव निर्गुणस्यापि ब्रह्मणः समानम्, मनोवृत्त्यावृत्तिरूपस्य उपासनस्य उभयत्रापि सम्भवात् ।एतच्च निर्गुणोपासनं श्रुतिस्मृत्योः दृश्यत एव । **तत्कारणं साङ्ख्ययोगाभिपन्नम्** (श्वे.उ.६–१३) इति श्रुतिः। स्मृतिश्च **यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ (भ.गी.५–५)** इति ।

अत्र साङ्ख्यशब्दस्य वेदान्तविचार इत्यर्थः । योगो नाम निर्गुणब्रह्मोपासनम् । एतयोः फलैक्यादेव ऐक्यमभिहितम् । योगशब्दस्य समाध्यर्थकयुज्धातोः निष्पन्नत्वात्, समाधेश्च ध्यानस्य परिपाकावस्थारूपत्वात् योगशब्दस्य ध्यानापरपर्याये उपासने प्रयोगः न विरुद्ध्यते । न चात्र योगशब्दः सगुणब्रह्मोपासनपर इति वाच्यम् । निर्गुणब्रह्मविद्याया हेतुत्वेन प्रयुक्तस्य तस्य निर्गुणोपासनपरत्वस्यैव युक्तत्वात् । न च तथापि उदाहृतस्मृतौ प्रयुक्तस्य योगशब्दस्य कर्मयोगार्थकत्वाद् उपासनापरत्वमसिद्धमिति वाच्यम् । रूढ्या ध्यानार्थकस्यैव योगशब्दस्य कर्मपरत्वाभावेन भगवता कर्मविषये उदाहृतत्वेन तस्य कर्मयोगपरत्वोपपत्तेः ।

एतच्छ्रुतिस्मृतिव्यतिरेकेण अन्यत्रापि निर्गुणोपासनं श्रूयते । यथा प्रश्नोपनिषदि **परं चापरं च ब्रह्म यदोङ्कारः** (प्र.उ.५–२) इति प्रणवोपासनं प्रकृत्य, एकमात्रद्विमात्रयोः ओङ्कारयोः उपासनं विधाय ततः श्राव्यते – यः पुनरेतं त्रिमात्रेणोङ्कारेण परं पुरुषमभिध्यायीत (प्र.उ.५–५) इति । विचारितं चैतत् **ईक्षतिकर्मव्यपदेशत्सः** (ब्र.सू. १–३–१३) इत्यधिकरणे । तद्यथा – प्रागुक्ते वाक्ये किं परं ब्रह्म अभिध्यातव्यतया उपदिश्यत उत अपरं ब्रह्म इति संशय्य, **स सामभिरुन्नीयते ब्रह्मलोकम्, स तेजसि सूर्ये सम्पन्नः** (प्र.उ. ५–५) इति देशपरिच्छिन्नस्य फलस्य श्रुतत्वात् अपरं ब्रह्म इति प्रापय्य, परं ब्रह्मेति सिद्धान्तितम् । अभिध्यातव्यस्य पुरुषस्य वाक्यशेषे साक्षात्करविषयता उपदिष्टा **स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते** (प्र.उ. ५–५) इति । ध्यानस्य आरोपितवस्तुविषयकत्वसम्भवेऽपि दर्शनस्य तु प्रमात्वेन विषयसत्यता अपेक्ष्यते । अतः ईक्षणविषयभूतं परब्रह्मैव ध्यानस्यापि विषयः, ध्यानदर्शनयोः कार्यकारणभूतयोः एकविषयत्वस्य अवश्यं वक्तव्यत्वात् । तस्मात् परं ब्रह्मैव ध्यानविषयः । एवमस्मिन्नधिकरणे निर्गुणस्य परब्रह्मणः ध्येयत्वं सूत्रभाष्यकाराभ्यां निरूपितम् ।


ISSN : 2320-740X

एवमन्यत्रापि प्रायः प्रणवोपासनानि निर्गुणब्रह्मविषयाणि । यथा तापनीयश्रुतौ **देवा हवै प्रजापतिमब्रुवन्नणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्व** (नृ.ता.उ.९) इति । अत्र आत्मन ओङ्कारगम्यत्वात् तत्सामनाधिकरण्यं श्रुतम् । **एतद्ध्येवाक्षरं ब्रह्म ह्येतदेवाक्षरं परम्** (क.उ.१–२–१६) इति काठकश्रुतिः **ओमित्येतदक्षरमिदं सर्वम्** (मा.उ.१) इति माण्डूक्यश्रुतिः । **ओमित्येवं ध्यायथात्मानम्** (मु.उ. १—३–१३) इति मुण्डकश्रुतिः । इयांस्तु विशेषः– तापनीयमाण्डूक्यश्रुत्योः अहंग्रहरूपं निर्गुणोपासनं साक्षादवगम्यते । प्रश्नकठश्रुत्योस्तु ओङ्कारे निर्गुणब्रह्मदृष्टिविधानात् निर्गुणोपासनं सम्भवतीति एतावदेव ज्ञायत इति । एवमेव ब्राह्मवासिष्ठकल्पपञ्चीकरण आत्मगीताद्यार्षग्रन्थेष्वपि निर्गुणब्रह्मोपासनानुकूलानि वचनानि दृश्यन्ते । अमृतबिन्दूपनिषदि अन्यासु उपनिषत्सु च निरूपितः योगाभ्यासोऽपि इममर्थं द्रढयति । अतः यथा अनेकशाखासु विप्रकीर्णानां पदार्थानाम् उपसंहारेण् कल्पसूत्रेषु अग्निहोत्राद्यनुष्ठानं निर्धार्यते, तथैव उक्तग्रन्थानाश्रित्य सम्प्रदायविद्भ्यः निर्गुणोपासनं ज्ञात्वा कर्तव्यम् ।

किञ्च गुणोपसंहारपादे यथा सगुणब्रह्मोपसनाङ्गतया गुणोपसंहार उक्तः, तथैव निर्गुणब्रह्मणोऽपि धर्माणाम् उपसंहारो दर्शितः । यथा आनन्दादयः प्रधानस्य (ब्र.सू.३–३–११) इत्यधिकरणे भावरूपाणं धर्माणां परिच्छेदः सूत्रितः । आनन्दरूपत्वम्, विज्ञानघनत्वम्, सर्वगतत्त्वम्, सर्वात्मत्वमित्येवं निर्गुणब्रह्मधर्माः सर्वे सवत्र उपसंहर्तव्याः,उपास्यस्य ब्रह्मण एकत्वात् इति निर्णीतम् । ततः **अक्षरधियां त्ववरोधः** ...... (ब्र.सू. ३–३–३३) इत्यधिकरणे अभावरूपाणां धर्माणाम् उपसंहारो दर्शितः । तत्र पूर्वोक्तेनैव हेतुना **यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम् (१–१–६) अस्थूलमनणु** (बृ.उ.३–८–८) इत्यादिश्रुत्युक्तानां गुणानाम् अवरोधः साधितः । यदि निर्गुणब्रह्मण उपासनमेव न स्यात्, तर्हि तस्मिन् पादे निर्गुणब्रह्मधर्माणाम् उपसंहारनिरूपणमिदम् अप्रसक्तं स्यात् । न च आनन्दादिगुणानाम् उपसंहारे उपास्यं तद्ब्रह्म निर्गुणमेव न स्यादिति वाच्यम् । तेषामुपास्यकोटौ अप्रवेशात् । तथा हि अत्र आनन्दादीनाम् उपसंहारो नाम तद्वाचकशब्दानम् उच्चारणम् । उपाधिविशिष्टचैतन्यवाचकैः आनन्दादिपदैः स्थौल्याद्यभावविशिष्टचैतन्यवाचकैः अस्थूलादिपदैश्च उपस्थापितेषु सर्वेषु वाच्यार्थेषु अनुगतं लक्ष्यं यदखण्डैकरसं ब्रह्म, तदहमस्मीति उपासनं सम्भवति । उक्तं च –

**आनन्दादिभिरस्थूलादिभिश्चात्माऽत्र लक्षितः । अखण्डैकरसः सोऽहमस्मीत्येवमुपासते ॥** (पं.द.९–७३) इति ।

अत्राशङ्का स्यात् – **तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते** (के.उ.१–१–४) इति श्रुतिः परब्रह्मण् उपस्यत्वं निषेधति। अतः न परं ब्रह्म उपास्यमिति । उच्यते – एवं सति **अन्यदेव तद्विदितात्** (के.उ.१–१–३) इति श्रुतेः ब्रह्मणः वेद्यत्वमपि न सिद्ध्येत् । अतः वेद्यत्वम् उपास्यत्वं वा परमार्थतः ब्रह्मणि नास्तीति श्रुतीनामर्थो वर्णनीयः । एवं सति ब्रह्मवेदनमिव ब्रह्मोपासनमपि श्रुतिसिद्धमिति समानम् । अतः मुमुक्षुः नैरन्तर्येण आमरणं निर्गुणोपासननिष्ठो भवेत् ।


ISSN : 2320-740X

निर्गुणोपासनस्य स्वसमानविषयकप्रमाजननसामर्थ्यं युज्यतेऽपि । तद्यथा – कश्चित् पाणौ पञ्च वराटकाः पिधाय अन्यं पृच्छति मम हस्ते कति वराटका इति । तदा अन्यः सङ्ख्याविशेषज्ञानाभावेऽपि दैवयोगात् पञ्च वराटका इति प्रतिवचनं ददौ। अत्र मूलप्रमाणाभावेऽपि विषयाबाधमात्रात् प्रामाण्यमक्षतम् । एवमेव तत्त्वनिर्णायकप्रमाणपूर्वकत्वाभावेऽपि प्रकृतनिर्गुणोपासनं यथार्थं भवितुमर्हति । यथा दहराद्युपासने जीवेश्वराभेदनिर्णयाभावेऽपि शास्त्रबलादेव स्वस्य सगुणेश्वरात् अभेदः चिन्त्यते, एवमेव शास्त्रबलादेव निर्गुणोपासनं क्रियते । दृष्टान्ते तावत् सगुणेश्वरस्य ध्येयत्वात् तद्विषयकः साक्षात्कारो जायते । इह तु निर्गुण्स्यैव ध्येयत्वात् निर्गुणविषयक एव साक्षात्कार उत्पद्यते । स च विषयाबाधात् श्रवणादिप्रणालीजन्यसाक्षात्कारवत् प्रमात्मक एव भवति। निर्गुणोपासनस्य साक्षात्कारजनने क्रमश्चोक्तः –

**निर्गुणोपासनं पक्वं समाधिः स्याच्छनैः शनैः । यः समाधिर्निरोधाख्यः सोऽनायासेन सिद्ध्यति ॥** (पं.द. ९–१२६) इति ।

निर्गुणोपासनेन सविकल्पस्य ततो निर्विकल्पस्य च समाधेः सिद्धौ असङ्गचैतन्यमात्रम् अवशिष्यते । तद्विषयकप्रत्ययनां निरन्तरम् आवर्तनात् तत्त्वमस्यादिवाक्यं निष्प्रत्यूहम् अहं ब्रह्मास्मीति साक्षात्कारं जनयति । किञ्च **यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्** (भ.गी.८–६) इति स्मृतौ, **यच्चित्तस्तेनैष प्राणमायाति** (छा.उ.६–१५–२) इति श्रुतौ च मरणकालिकान्त्यप्रत्ययात् भाविजन्म निर्दिष्टम् । अतः यथा सगुणोपासकस्य मरणावसरे सगुणब्रह्मसाक्षात्कारो जायते, तथैव निर्गुणब्रह्मोपासकस्य निर्गुणप्रत्ययः उत्पद्यते । स च सवासनामविद्यां समूलकाषं कषति । तदा निर्गुणोपासकः निर्गुणब्रह्मात्मना तिष्ठति । इदमेव ब्रह्मात्मना अवस्थानं मुक्तिरित्युच्यते । तथा च तापनीयश्रुतौ **चिन्मयो ह्ययमोङ्कारश्चिन्मयमिदं सर्वं तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्म भवति य एवं वेद** (नृ.ता.८) इति ओङ्कारोपासनस्य मोक्षः फलत्वेन श्रुतः । न चैतावता ज्ञानस्यैव मोक्षसाधनत्ववादिशास्त्रविरोधः, निर्गुणब्रह्मोपासनस्य ज्ञानोत्पत्तिद्वारा मोक्षहेतुत्वोपगमात् ।

यदि मरणात्पूर्वं ज्ञानं नोत्पन्नम्, तर्हि ब्रह्मलोकं गतस्य ज्ञानोत्पत्तिः निश्चिता । प्रश्नोपनिषदि च त्रिमात्रस्य ओङ्कारस्य उपासकः ब्रह्मलोकं गत्वा तत्र तत्त्वज्ञानं प्राप्नोतीति अर्थो वर्णीतः । तथा च तत्रत्या श्रुतिः **स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते** (प्र.उ.५–५) इति । ब्रह्मलोकं गतः उपासकः हिरण्यगर्भादपि उत्कृष्टं निरुपाधिकं चैतन्यं साक्षात्करोतीति तदर्थः । ईक्षत्यधिकरणभाष्येऽपि इदं वाक्यं क्रममुक्तिपरमिति प्रपञ्चितम् । अप्रतीकालम्बनान्नयतीति **बादरायण उभयथाऽदोषात्तत्क्रतुश्च** (ब्र.सू. ४–३–१५) इत्यधिकरणे ये आत्मत्वेन ब्रह्म उपासते, तेषामेव ब्रह्मलोकगमनमिति यः सिद्धान्तः दर्शितः, सोऽपि इममर्थम् उपोद्बलयति । तथा च यदा कदाचित् निर्गुणोपासनं ब्रह्मसाक्षात्कारद्वारा मुक्तिहेतुः भविष्यति । तदुक्तम्–

**इह वा मरणे वाऽस्य ब्रह्मलोकेऽथ वा भवेत् । ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणम् ॥** (पं.द.९–१५०) इति ।

एवं निर्गुणोपासनस्य सर्वोत्कृष्टत्वात्, ये मुमुक्षवः एतत्त्यक्त्वा उपायान्तरम् आश्रयन्ते, ते शोचनीयाः ।


ISSN : 2320-740X

तदप्युक्तम् –

**उपेक्ष्य तत्तीर्थयात्राजपादीनेव कुर्वताम् । पिण्डं समुत्सृज्य करं लेढीति न्याय आपतेत् ॥** (पं.द. ९–१३०) इति ।

यद्यपि सगुणोपासनमेव आधिक्येन क्रियमाणं दृश्यते, तथापि नैतावता निर्गुणोपासनं शास्त्रविहितम् अविहितं भवति। लोके हि उत्कृष्टमप्युपायं हित्वा तदितरेषु जनाः प्रवर्तमाना दृश्यन्ते । यथा उत्कृष्टस्यापि सगुणोपासनस्य कालान्तरभाविफलत्वात् वश्यादिकारकेषु मन्त्रेषु ऐहिकफलप्रदत्वम् अतिशयं मत्वा मूढाः तत्र प्रवर्तन्ते । ततोऽपि मूढतराः नियमापेक्षान् सगुणोपासनानि त्यक्त्वा नियमनिरपेक्षेषु कृष्यादिकर्मसु प्रवर्तन्ते । नैतावता शास्त्रविहिते मन्त्रजपानुष्ठाने सगुणोपासने वा विद्वद्भिरन्यैः प्रवृत्तिः परित्यज्यते । एवमेव, सांसारिकफलेप्सूनां निर्गुणोपासने अप्रवृत्तावपि मुमुक्षुभिः निर्गुणोपासनं न परित्यज्यते । अतः साङ्ख्यमार्गे गन्तुमसमर्थैः योगशब्दितं निर्गुणोपासनं कर्तव्यमिति ध्यानदीपकाराणाम् आशयः ।

आधारग्रन्थाः


१. पंचदशी, (सं–वासुदेवशास्त्री भारतीयविद्याप्रकाशन, दिल्ली)

२. ईशादिदशोपनिषदः, (सं –गोविन्दशास्त्री, मोतिलाल बनारसीदास, देहलि)

३. ब्रह्मसूत्रशांकरभाष्यम्, (सं –आचार्य जगदीश शास्त्री, मोतिलाल बनारसीदास)

४. ब्रह्मसूत्रशांकरभाष्यम् (भामतीकल्परुपरिमलोपेतम्), (राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली)

५. सिद्धान्तलेषसंग्रहः, (सं – भाऊ शास्त्री वझे, चौखाम्बा संस्कृतसंस्थानम्, वाराणसी)

६. उपनिषद्भाष्यम्, (सं – सुब्रह्मण्यशास्त्री, महेश अनुसन्धान संस्थानम्, वाराणसी)

७. श्रीमद्भगवद्गीताभाष्यम्, (सं – श्रीहरिकृष्णदास गोयन्दक, गीत प्रेस् गोरखपुर)


***

# रत्नमन्विष्यते


**डा. राघवेन्द्रभट्टः**

साहित्यविभागाध्यक्षः


लेखकैः Facebook इत्याख्ये जालपुटके **राघवीयम्** इत्यभिधानेन प्रासङ्गिकानि मुक्तकानि विरच्यन्ते । तत्र विविधप्रसङ्गेषु रचितानां तेषामिह सार्थः सङ्ग्रहः कृतो वर्तते ।

**क्षुधातृषार्ता जननीं स्मरन्ति ।**

**मातस्त्वत्कृपया लोके लेखनी सम्प्रवर्तते । तृप्येद्धस्ताक्षरेणैव सा मे ते न कृपा यदि ॥१॥**

हे अम्ब ! शारदे ! तव कृपया जनानां लेखनी लेखनकर्मणि प्रवर्तते । तव कृपा यदि न भवति तर्हि उद्योगिनो मम लेखनी प्रतिदिनमुपस्थितिसाक्षिकेण हस्ताक्षरमात्रेण धन्यतां यायात् !!



ISSN : 2320-740X

**मातर्मे लेखने शक्तिं वर्धयाशु सरस्वति । नो वर्धयसि चेन्नूनमपूर्णं तव पुस्तकम् ॥ २॥**

जननि ! शारदे ! मम लेखने सामर्थ्यं सपद्येव समेधय । यदि तत्सामर्थ्यं न वर्धयसि तर्हि अहं लेखितुं न प्रभविष्यामि। तेन सारस्वतं पुस्तकं पूर्णं न स्यात् ।

**सूनृता वाणी माता**

**वचश्शौचं मनुष्याणां स्वास्थ्यं वर्धयति ध्रुवम् । यत्तु नश्येन्निजस्येव परेषां हानिकारकम् ॥३॥**

सर्वेऽपि मानवाः वाचां शौचं संरक्षेयुः । तत् तेषां सर्वविधस्वास्थ्यं निश्चयेन वर्धयति । यदि कस्यचन वाक्शौचं नष्टं भवति तर्हि नष्टशौचस्य तस्य ततोऽन्येषाञ्च स्वास्थ्यनाशो भवति ।

**दुर्योजनः**

**अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः । स एव यद्ययोग्यस्स्यान्नरत्वं तत्र दुर्लभम् ॥४॥**

लोके कस्मिन्नपि कर्मणि न कश्चित् जनोऽयोग्यो वर्तते । कार्यसंयोजकस्य दौर्लभ्यात् क्वचित् सः अयोग्य इव लक्ष्यते। यदि संयोजक एव अयोग्यो वर्तते तर्हि तस्मिन् मनुष्यत्वमेव दुर्लभमिति मन्तव्यम् ।

**अकालवृष्टिः !**

**अकालवर्षया भूमिस्तप्ता भवति शीतला । परन्त्वल्पक्षणेनैव तपेत्सा पूर्वतोऽधिका ॥५॥**

आतपेन तप्ता भूमिः ग्रीष्मकालिकया वृष्ट्या शीतला भवति । परन्तु क्षणाभ्यन्तर एव सा भूमिः पूर्वकालापेक्षयापि अधिकतया तप्ता भवति । क्षणिकफललाभेन तत्काले सौख्यमनुभूयते चेदपि सपद्येव तस्य ह्रासो भवति इति भावः। समासोक्तिः ।

**संस्कृतविभूतिः**

**भुञ्जानः संस्कृतान्नं यः संस्कृतान्पीडयेत्सखे! । तेषां हृत्तापतपनात् क्रूरोऽसौ भस्मसाद्भवेत् !! ॥६॥**

संस्कृतसंबद्धया जीविकया जीवन् जनः संस्कृतं संस्कृतज्ञांश्च साक्षात्परम्परया वा पीडयति चेत् तेषां हृदयपरितापाग्निना असौ नृशंसो भस्मसाद्भवेत् ।

**शिक्षकश्च ?**

**चरणे द्वे शिक्षकस्य पठनं लेखनं तथा । एकेन रहितः खञ्जो द्वाभ्यान्तु पङ्गुरेव सः ॥७॥**

शिक्षकस्य पठनं लेखनञ्चेति पादद्वयं वर्तते । तयोरन्यतरस्याभावे सः खञ्जो भवति । द्वयोस्तु पुनः पङ्गुरेवेत्यर्थः ।

**अनुत्तमः शिक्षकः**

**आत्मानं पण्डितम्मन्यो राजनीतौ विचक्षणः । अलसः ख्यातिलुब्धश्च चत्वारः शिक्षकाधमाः ॥८॥**

पण्डितमानी, राजनीतौ चतुरः, अलसः, कीर्तिलोलुपश्चेति एते चत्वारः वराः शिक्षका न, अपितु शिक्षकावरा भवन्ति।

**दुर्जनस्वभावः**

**शतधा ताडितो धूर्तः कुकार्यान्न निवर्तते । अपि किं सम्प्रहारेण तैलपायी न जीवति? ॥९॥**


ISSN : 2320-740X

असकृत् सन्ताडनेनापि यथा तैलपो न म्रियते तथा कुकर्मसु प्रवृत्तो दुर्जनः बहुवारं प्रहतोऽपि अकार्यकरणान्न विरतो भवति ।

**प्रशंसन्ति कलौ धूर्ताः प्राज्ञे प्रत्यक्षताङ्गते । गते परोक्षं निन्दन्ति काले तं विस्मरन्ति च ॥१०॥**

दुर्जनाः सन्निहितं विद्वांसं स्तुवन्ति । परोक्षं गतं तमेव निन्दन्ति स्मरणीये काले विस्मरन्त्यपि । कलिकालो मलीमसः!

**भवेदयनमार्जवम्**

**ऋजु गच्छन्नरो लक्ष्यं विलम्बेनापि यास्यति । मध्येमार्गं वक्रगस्तु क्लिन्दते मद्यपो यथा ॥११॥**

ऋजुमार्गावलम्बी जनः लक्ष्यप्राप्तौ विलम्बितः स्यात् । तथापि तन्मार्गेण गच्छति चेत् निर्भीकः स लक्ष्यं प्राप्नोति । वक्रमार्गमनुसरति चेत् पीतमदिर इव मार्गे एव पतेत् । कार्यसाधकाः सन्मार्गगामिनो भवेयुरित्यभिप्रायः ।

**क्रोधोऽविवेको गर्वश्चाभिध्या निर्दयतात्रपा । षडेते बान्धवास्तेषां येऽधर्मार्जितसम्पदः ॥१२॥**

ये जना अधर्मेण धनमर्जयन्ति तेषां रोषः, अविवेकः, अहङ्कारः, परद्रव्यापेक्षा, अकारुण्यम्, निर्लज्जता चेति षड् बान्धवा भवन्ति।

**भ्रष्टाचारो न्यायागारे निर्णीतश्चेदक्षम्यो यः । कर्ता तस्यात्याज्यो दण्ड्यो नीतौ लोकश्रद्धा तेन ॥१३॥**

न्यायालये अक्षम्यः अपराधः सप्रमाणं निर्णीयते चेत् ततःपरं सापराधो जनः नियमेन दण्ड्येत । तदैव दण्डनीतिविषये जनेषु विश्वासः तिष्ठति ।

**किमाचरसि ?**

**चरधातो ! तव प्रीतिरत्याङोरधिका कुतः ? । व्युपाङ्सम्प्रेषु या न्यूना महानर्थो भवत्यतः ॥१४॥**

हे ! गतिभक्षणार्थक चरधातो, तव 'अति आङ्' इति संयुक्ते उपसर्गद्वये कस्मात् कारणादधिका प्रीतिर्वर्तते? तादृशी प्रीतिः वि उप आङ् सम् प्र इत्येतेषु न वर्तते । तस्मादेव हेतोः लोके अनर्थो महान् सम्भवति । विचारः, उपचारः, आचारः, सञ्चारः, प्रचारः न्यूनः । तदपेक्षया जगति अत्याचारः अनारतं जायत इत्यर्थः ।

**स्वामी रामः**

**रामस्य सङ्कीर्तनतत्पराश्चेद्धर्मानुगाः संयमिनो भवन्ति । सीतायुतो रावणसोदरीं वा नान्यां वियोगेऽपि ददर्श मानी ॥१५॥**

श्रीरामस्य नामोच्चारणं मनो निर्मलीकरोति । अतो जनास्तत्सङ्कीर्तनपरा धर्मपथगामिनश्च भवेयुः । तेन ते इन्द्रियनिग्रहणे समर्था भविष्यन्ति । एकपत्नीव्रतस्थो रामः वनवासावधावात्मानं वरीतुकामां शूर्पणखां 'कृतदारोऽस्मि भवति भार्येयं दयिता मम' इत्युक्त्वा विजहौ । कालान्तरे परित्यक्तसीतोऽपि स नान्यामकामयत । सोऽयं रामो निजभक्तान् संयमधनान् करोतीत्यर्थः ।


ISSN : 2320-740X

**कलिकौतुकम् !**

**निन्द्ये निषिद्धे व्यसने निमग्नो मर्त्यः समाजे निजगौरवार्थम् ।**
**वेषं धरन्सज्जनधार्मिकादेर्जुगुप्सते दोषशतं स्वकीयम् ॥ १६॥**

गर्हिते निषिद्धे च कार्ये व्यापृतो जनः समाजे आत्मगौरवस्य रक्षणार्थं साधुरिव, धार्मिक इव, दानशील इव वा नटन् स्वीयान् नानादोषान् आच्छादयति ।

**सदसद्भेदः**

**आचर्य पापं नृवराः स्मरन्ति सीदन्ति शोचन्ति निवारयन्ति ।**
**स्थित्वैव धूर्तास्तु सतां समूहे कुर्वन्ति पापानि सदेति चित्रम् ! ॥१७॥**

सज्जनाः अनवधानेनापि कृतं पापकार्यं सलज्जं स्मरन्ति, तत्कर्मणः सङ्कुचन्ति, पश्चात्ताप–मनुभवन्ति,आयतौ तादृशं पुनः न करिष्यन्ति च । दुर्जनास्तु सज्जनानां समवाये वसन्त एव सदा पापकार्याणि कुर्वन्तीति आश्चर्यम् ।

**आचारवान्भव ।**

**अमितदुराचारः सगुणोऽपि भवति जनो निन्द्यो जनतायाम् ।**
**गदशमने ज्यायोऽपि विवेकी लशुनकुलं दुर्गन्धि जहाति ॥१८॥**

नानादुराचारं कृतवाञ्जनो दयादिभिर्गुणैर्युक्तोऽपि समाजे निन्दाभाग् भवति । विवेकी जनो रोगापहारकमपि लशुनं चिरदुर्गन्धप्रसारीति न सेवते ।

**हन्त! पराधीनता !!**

**लोकाद्भीतिमुपागतः कपिरहं शाखां समालम्बितः जीवामि स्म सुखेन तत्र कतिधा कालेन चिन्तां विना ।**
**सद्यस्तर्कविदा तरोःशिरसि सावच्छेदके पातितः तन्मे मर्कटजन्म मास्तु भगवन् ! गच्छामि लोकान्तरम् ॥१९॥**

वृक्षस्य अग्रावच्छेदेन संयोजितः कपिरेवं विलपति । मनुष्याद्भीतो मर्कटोऽहं वृक्षस्य शाखामाश्रित्य बहोः कालात् सुखेन जीवामि स्म । सम्प्रति 'अग्रावच्छेदेन कपिसंयोगी वृक्षः' इति वदता तार्किकेण तत्रैव स्थिरीकृतोऽस्मि । अतः हे देव ! वृक्षस्याधः संयोगमलभमानतया प्राप्तपारतन्त्र्यस्य मम जीवनापेक्षया मरणमेव वरमिति । अन्योक्तिरियम् । स्वतन्त्रतया जीवितस्य देशवृद्धिव्याजेन राजनेतृभिर्बलान्नगरमानीय स्थापितस्य वनवासिनो जनस्य त्रासभावोऽभिव्यज्यते ।

**दौर्जन्यम्**

**रे रे पातकिनो मदान्धकिटयो नक्तञ्चरा रक्तपाः ! सीमातिक्रमणं विधाय मुहुराक्रम्य स्थलं भारतान् । किं मुग्धान् हथ? धिग्धिगस्तु हृदयं युष्माकमश्मोपमम् कार्गिल्–युद्धजयध्वजं यमनिभं ब्रह्मोस् दवं वर्षति !!! ॥२०॥**


ISSN : 2320-740X

बत! युद्धविरामनियमोल्लङ्घनशीलाः पापाः! रे पातकिनः ! दुर्मदाः! सूकराः! रक्तपाः! दैत्याः! सीमानमतिक्रम्य भारतदेशस्य स्थलमाक्रामथ किम्? साधून् भारतीयान् मारयथ किम्? शिलासदृशं युष्माकं हृदयं प्रति धिक्कारोऽस्तु। युष्माभिःसह सन्धिरकिञ्चित्करः । अतःभूतपूर्वस्य कार्गिल्–युद्धविजयस्य पताकेव विद्यमानं अन्तकसदृशं ब्रह्मोस् नामकमायुधं दावानलं पातयति ।

**निशाचरा ! मुहूर्तकं यथेच्छमद्य नृत्यतां नवाजये मही न वस्तदुत्तरं प्रदाय रे ।**

**प्रियान्धका रविप्रभारतेश आशुगोत्करः प्रतिष्ठते रणं नरेन्द्र एष पाकशासनः ॥ २७ ॥**

रे राक्षसाः! आतङ्कवादिनः! अद्य क्षणकालं ससन्तोषं नृत्यं कुरुत, पुनस्तत्र नावसरं लभेध्वम् । रे नवाज ! हीन ! मही– कश्मीरभूमिः वो युष्माकं न वर्तते। अतः आजये युद्धार्थमपि न । तस्माद् (अस्माकं प्रश्नानां) उत्तरं समाधानम् उत्तरदेशञ्च प्रदाय विसृज्य, येम आत्मानं नियन्त्रयथ । (नवाज–येम–हीन । न–वा–जयेम) वा अथवा (दि विकल्पयसि य तर्हि) जयेम विजयं वयं प्राप्नुयाम । रे प्रियान्धकाः अन्धकारप्रियाः अन्धकासुरबन्धवः इति वा, सूर्यवत्प्रकृष्टस्य भारतस्य ईशः, सूर्यप्रभायां रतेशो वा, आशुगोत्करः– सायुधहस्तः, अविलम्ब्य गमनशीलः, उपरि कृतहस्तो वा, एषः पाकशासनः पाकान् –पाकीस्थानीयान् पाकं तन्नामकं दैत्यं वा शास्तीति, नरेन्द्रः–मोदी इन्द्रश्च, रणं युद्धक्षेत्रं प्रतिष्ठते ।

**दीपावली**

**आसारपातावनतोत्तमाङ्गाः पाश्चात्यवात्याहतकम्पमानाः ।**

**तद्भारतस्नेहविवृद्धगावः कश्मीरदीपाः सततं ज्वलन्तु ॥२१॥**

अतिवर्षणाद् अधःकृतशिखाः, पश्चिमायाः जञ्झावातेन सन्ताडिताः तेन कम्पमानाः, भारततैलेन प्रसृतप्रकाशाः, कश्मीरदेशीया दीपा अनवरतं ज्वलन्तु । अतिवृष्टिकारणात् उत्थातुमशक्ताः, पश्चिमदेशस्य आक्रमणेन भीताः, स्वदेशीयानां मैत्र्या समृद्धभुवः कश्मीरवासिनो बान्धवाः सुखेन जीवन्तु इति अर्थान्तरम् । श्लेषानुप्राणितातिशयोक्तिः।

**द्वैधीभावः**

**आत्मीयस्य जनस्य चेष्टितमतिप्रियमिति भासते निन्द्यं वास्तु तथापि मान्यमखिलं यदवधि सौहृदम् ।**

**शीर्षाच्चेद्गलितं गतं पदतलं यदपि विधेर्वशात् प्राग्वृत्तं तदरातिभावमयते विलपति सौहृदम् ॥२२॥**

इष्टजनस्य योग्यः अयोग्यश्च निखिलो व्यवहारः तावत्पर्यन्तं मान्यः प्रियतमश्च भवति यावत्पर्यन्तं मैत्री स्थास्यति । दौर्भाग्यवशात् मैत्री प्रणश्यति चेत् पूर्वघटितः सर्वो व्यवहारः वैरे पर्यवस्यति। तदा आत्मीयता रोदिति ।

**स्वच्छभारतम्**

**स्वच्छं भारतमद्य वाञ्छसि यदि स्वच्छन्दतां यन्त्रय स्वान्तं शोधय नाशयालसमतिं कायं पुनः क्षालय ।**

**वस्त्रं धारय निर्मलं निजगृहं निश्शोध्यकं भावय नान्यं शोचय देशदीपनविधौ शौचापदेशात्सखे ॥२३॥**


ISSN : 2320-740X

सखे! स्वच्छं भारतमिच्छसि चेत् स्वच्छन्दव्यवहारं नियमय । मनःशौचं कुरु । आलस्यं त्यज । शरीरं निर्मलं कुरु। शुद्धं वसनं धारय । स्वसदनं मलिनरहितं सम्पादय । राष्ट्रप्रकाशने कार्ये शौचव्याजेन इतरान् जनान् न खेदय । एवमाचरसि चेद्भारतं स्वयं स्वच्छं भविष्यति ।

**मुमुक्षुमानी**

**रे रे मानुष दुर्मते! जडतनो! त्वं मोक्षमाप्नोषि किम् ? अर्थे दत्तमनाः सदा कृपणतामालम्ब्य धर्माच्च्युतः।**
**कामे मज्जनमाचरन् कलुषिते मोहे महा सागरे लीनो मित्रकलत्रपुत्रसहितो भूमिं पुनर्लप्स्यसे ॥२४॥**

रे नर ! त्वं परमपुरुषार्थं मोक्षं न यास्यसि । कुत इति चेत् सर्वदा अर्थावाप्तौ तत्परः, कदर्यः सन् धर्मकार्यात् प्रच्युतः, रागमोहादिना कालुष्यङ्गते भवाब्धौ कामपरश्च वर्तसे । अतः पत्नीपुत्रादिभिः सह पुनर्जन्म प्राप्स्यसि ।

**सुमनोमार्गः**

**अज्ञानेन कृतं कर्म जीवने दुःखहेतुकम् । प्राज्ञैरुक्तेन मार्गेण गन्तव्यं सुखमिच्छता ॥२५॥**

मनुष्यः अज्ञात्वा कार्याणि करोति चेत् ततो दुःखमनुभवति । अतः सुधीभर्निर्दिष्टं मार्गं विदित्वा अनुसरेत् । तेन सुखं प्राप्नोति।

**रत्नाकरः**

**शतानि सूत्राणि भवन्तु सिद्ध्यै संस्कार एवेह तु कल्पवृक्षः।**
**तद्वाञ्जनो नन्दयति स्ववंशं देशञ्च लोकं कुरु तत्र बुद्धिम् ॥२६॥**

आत्मनः कुलस्य देशस्य च सर्वविधोन्नतये अनेके उपाया भवन्तु । तेषु संस्कारः प्रथमोपायः । मनुष्यः संस्कारवान् भवेत् । तेन लोके समस्या न भवन्ति । भवन्ति चेदपि तत्परिहारः सुकरः ।

***

# ज्ञानसूचनयोः प्रसारणस्य प्राचीनप्रविधयः

**डा. हरिप्रसाद के.**

सहायकाचार्यः, शिक्षाशास्त्रविभागः

शैक्षिकप्रविधिः इति शैक्षिकक्षेत्रे यद्यपि आधुनिककाले प्रयुज्यमानः सम्प्रत्ययः वर्तते तथापि सः सम्प्रत्ययः आधुनिककाले निष्पन्नः इति तु नास्ति । इत्युक्ते प्राचीनकाले अपि शैक्षिकलक्ष्यानि साधयितुं केषाञ्चन प्रविधीनाम् उपयोगं प्राचीनाः मनीषिणः अवश्यं कुर्वन्ति स्म । एते प्रविधयः स्वरूपतः आधुनिकप्रविधिभ्यः किञ्चित् भिन्ना इव दृश्येरन्, किन्तु प्रविधिस्वरूपमनाश्रित्य तु न वर्तन्ते एव । किञ्च ते प्रविधयः ज्ञानसूचनयोः प्रसारणे अत्यन्तं सहकारिणः आसन्निति निष्चप्रचं वक्तुं शक्यते । ते तु इत्थं वर्तन्ते –

- संहितादि–अष्टौ पाठाः


ISSN : 2320-740X

- शास्त्रार्थसभाः
- वादविवादगोष्ठ्यः
- भागवतादिप्रवचनम्
- मन्दिराणां निर्माणम्
- नित्याग्निहोत्रम्
- शुल्बसूत्रादीनां दैनन्दिनयागेषु प्रयोगं कृत्वा ज्यामिति–गणितादीनां संरक्षणम् इत्यादयः ।

क्रमशः एतेषां विचारम् अधुना कुर्मः ।

- **संहितादि–अष्टौ पाठाः**

प्राचीनकालादारभ्य वेदाध्ययनाध्यापनार्थं संहितादयः अष्टौ पाठप्रकाराः उपयुज्यमानाः सन्ति । वेदानां संरक्षणम् अनेन क्रमेण भवति । प्राचीनकाले तु पुस्तकादीनां अभावकारणात् वेदानां संरक्षणार्थं अनुसृतः अत्यन्तं वैज्ञानिकः प्रविधिः भवति संहितादीनां अष्टपाठानां माध्यमेन वेदानाम् अध्यापनम् अधयनञ्च । प्राचीनकाले अध्येयविषयः सर्वोऽपि कण्ठस्थीकृत्य हृदि स्थाप्यते स्म । यतो हि –

**पुस्तकस्था तु या विद्या परहस्तगतं धनम् । कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥**

इति प्राचीनाः सम्यक् जानन्ति स्म । यद्यपि पुस्तकानां आविष्कारः अर्वाचीनकाले जातः तथापि विद्यायाः संरक्षणार्थं अत्युत्कृष्टः प्रविधिः संहिताद्यष्टौ पाठप्रकाराः इत्येतत् केनापि निराकर्तुं न शक्यते । एतस्य अनुसरणम् आधुनिकविद्यालयेषु RCRT(Recitation, Comprehension, Recalling,... ) इति प्रविधिमाध्यमेन कुर्वाणो वर्तन्ते । तथापि आधुनिकप्रपञ्चे एतादृशः कोऽपि प्रविधिः नाविष्कृतः यन्माध्यमेन एकस्य सम्पूर्णग्रन्थस्य ह्रस्वदीर्घादिभेदानापि अपरित्यज्य हृदि स्थापनं शक्यं भवेत् । एतस्य इदं तु प्रधानं कारणं यत् अस्माकम् आविष्कारादिकं सर्वमपि अस्माकं बाह्यसामर्थ्यवर्धनार्थं वा तत्सौविध्यवर्धनार्थं वा अभवत् न तु आभ्यन्तरसामर्थ्यवर्धनार्थम् इति ।

- **शास्त्रार्थसभाः**

प्राचीनकालादारभ्य अयं कश्चन प्रविधिः ज्ञानसूचनयोः प्रसारणार्थं उपयुज्यमानं वर्तते इति न केनापि अविदितं वर्तते। शास्त्रार्थसभामाध्यमेन शास्त्रे निहितानि गूढतत्वानि प्रकाशपथं आनीयन्ते सभासु । सामान्यजनानां अनेन कोऽपि लाभः नास्ति, प्रसारणं तु सामान्यजनानां मध्ये किल कर्तव्यम् ? इति नाशङ्कनीयम् । यतो हि सामान्यजनानां गभीरविषयेषु प्रवृत्तिर्न भवति रुचिरपि न भवति । गभीरविषयेषु सूक्ष्मेक्षिकया विचारस्तु विद्वद्भिरेव कर्तव्यः, न तु सामान्यैः । सामान्यैस्तु तस्य फलमात्रं प्राप्तव्यमस्ति । यथा सामान्यजनां कृते तु पुत्र्याः विवाहार्थं उत्तमः मुहूर्तः अपेक्ष्यते न तु सूर्यसिद्धान्तः लीलावती वा । यथा वा उपयोगार्थं जनानां कृते विद्युत् आवश्यकी न तु


ISSN : 2320-740X

$E = MC^2$ इति शक्तिसूत्रस्य प्रामाण्यम् । शास्त्रार्थसाभाः अपि आहत्य सामान्यजनानां मध्ये न भवति चेदपि शास्त्राणां सर्वेषां गतिः लोककल्याणं मनसि निधाय एव भवति ।

- **वादविवादगोष्ठ्यः**

यथा लोके वयं युद्धरङ्गे द्वयोः योधयोः मध्ये प्रवर्तमानम् आयोधनं परिशीलयाम चेत् इदं ज्ञायते यत् विजयप्राप्त्यर्थम् अनुस्रियमाणा विभिन्नाः युद्धोपायाः के भवन्ति इति । इत्युक्ते केवलं एकेन खड्गेन युद्धं क्रियते चेदपि विजयप्राप्त्यर्थं तु अवश्यमेव विनूतनप्रहारप्रकाराः अनुसरणीयाः आविष्कर्तव्याश्च, तथैव सारस्वतप्रपञ्चे अपि ज्ञानस्य प्रसारणार्थं नूतनांशस्य आविष्करणार्थ च वादविवादगोष्ठ्यः अत्यन्तं उपकारिकाः भवन्ति । अत एव उच्यते “वादे वादे जायते तत्त्वबोधः” इति । प्राचीनकाले गुरुकुलेषु गुरुकुलाद्बहिश्च एतदर्थं अवसरः आसीत् । विजयप्राप्तिः, पराजयान्निवृत्तिः इत्येते प्रधानप्रेरकतत्वे एव तत्त्वबोधस्य निष्पादनार्थं/मन्थनार्थं वादिप्रतिवादीन् प्रवर्तयतः । अतः एतादृशप्रविधिमाध्यमेन विद्यमानस्य तत्त्वस्य दाढर्येन सह नूतनतत्त्वस्य आविष्कारोऽपि सम्भवति ।

- **भागवतादिप्रवचनम्**

भारते प्राचीनकालादारभ्य सामान्यजनानां सामाजिक–सांस्कृतिक–बौद्धिक–सांवेगिक–चारित्रिकादिविकासार्थं उपयुज्यमानः अत्यन्तं सुलभः सरलश्च प्रविधिः अस्ति भागवतादिप्रवचनम् इति । जनानां अनेन पुराणेतिहासादीनां ज्ञानं मनोरञ्जनेन सहैव भवति । किञ्च “रामादिवत्प्रवर्तितव्यं न रावणादिवत्” इत्यादिव्यावहारिक–चारित्रिक–नैतिकादिज्ञानमपि जनानां भवति । आधुनिकशिक्षायां एतस्य प्रविधेः सर्वेषु स्तरेषु अनुपयोगः एव समाजस्य सामाजिकचारित्रिकादिह्रासतायाः प्रमुखं कारणम् अस्ति इत्येतत् अविप्रतिपन्नमस्ति ।

- **मन्दिराणां निर्माणम्**

मन्दिराणां निर्माणेन विज्ञानस्य विद्यायाः कलायाश्च प्रसारः भवति । प्राचीनकाले मन्दिराणां निर्माणवेलायां अत्यन्तं अवधानं दीयते स्म । तत्र अत्यन्तं वैज्ञानिकी रीतिः अनुस्रियते स्म । मन्दिरनिर्माणमेव बहूनां शिल्पिनां अध्ययनक्षेत्रम् आसीत्। तत्रैव ते प्रशिक्षणं प्राप्नुवन्ति स्म । यथा – कर्नाटकस्थ– बेलूरुमन्दिरस्य निर्माणार्थं त्रयाणां राज्ञां जीविताविधिः अपेक्षितः आसीत् । तावति काले त्रिसन्ततेः जनाः तच्छिक्षणं प्रशिक्षणं च प्राप्य तत्रैव मन्दिरनिर्माणकार्ये संलग्नाः भूत्वा निवृत्ताः भवन्ति स्म । एवमेव भारते कियन्ति मन्दिराणि निर्मितानि स्युः यानि च कति जनानां अध्ययनक्षेत्रं कार्यक्षेत्रञ्चाभविष्यत् ।

मन्दिराणि चित्रकलायाः आश्रयस्थानानि आसन् । भारते अजन्ता–एल्लोरा–गुहान्तर्गतमन्दिरेषु अत्यद्भुतानि चित्राणि निर्मितानि वर्तन्ते यानि सहस्रवर्षेभ्योऽपि अनपहतस्वप्रकाशानि वर्तन्ते ।

एतदतिरिच्य शिल्पकला, काष्टशिल्पम्, वस्त्रविन्यासः, आभूषणनिर्माणकला, केशविन्यासकला, शास्त्रीयनृत्यकला इत्येतत् सर्वमपि विद्यायाः संरक्षणार्थं प्रसारार्थं च उपयुक्तस्य प्राचीनप्रविधेः उदाहरणं भवति ।


ISSN : 2320-740X

एवमेव अग्निहोत्रादीनां माध्यमेन शुल्बसूत्रादीनां प्रयोगं कृत्वा ज्यामिति–गणितादीनां संरक्षणं क्रियते स्म । इत्थं प्राचीनकाले ज्ञानसूचनयोः प्रसारणार्थं विविधाः प्रविधयः उपयुज्यन्ते स्म ।

***

# आयुर्वेदे स्वास्थ्यसम्पादनम्

**डा. रामचन्द्रःजोयिसः**

सहायकाचार्यः, साहित्यविभागः

**सुखार्ताः सर्वभूतानां मताः सर्वाः प्रवृत्तयः । सुखं च न विना धर्मः तस्मात् धर्मपरो भवेत् ॥**

इत्युक्तिः अष्टाङ्गहृदये प्रसिद्धा । सुखं च आरोग्यवतः जनस्यैव भवति । आरोग्यसिद्धिस्तु –

**नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः । दाता समः सत्यपरः क्षमावान् आप्तोपसेवी च भवत्यरोगी ॥**

इति कारिकोक्तक्रमेण सम्भवतीति अष्टाङ्गहृदये प्रोक्तम् । स्वस्य कृते हितं मितं च आहारं यः स्वीकरोति, स्वानुकूलं विहारं यः समाचरति, कर्मेन्द्रिय–ज्ञानेन्द्रियाणां शमनविषये अत्यादरं यो न प्रकटयति, दाने मनःपूर्वकं ददाति यः, सकलान् अपि जन्तून् यः समानतया पश्यति, सर्वदा यः सत्यमार्गमनुसरति, परेषां दोषाणां विषये यः क्षमाशीलः, आप्तानां तेषां वचनानि च योऽनुसरति स नीरोगीति चोच्यते ।

आयुर्वेदोत्पत्तिः उद्देश्यं च – 'ब्रह्मा स्मृत्वा आयुषो वेदम्' इत्युक्तत्वात् ब्रह्मणः स्मरणेनैव आयुर्वेदोत्पत्तिं वदन्ति । भूलोके पुनः देवतामुखेनाथवा ऋषिमुखेन आयुषो वेदस्यागमनं वदन्ति ।

स्वस्थस्य स्वास्थ्यसंरक्षणम् । आतुरस्य विकारप्रशमनमित्यायुर्वेदस्योद्देश्यम् । स्वस्थस्तु –

**समदोषः समाग्निश्च समधातुमलः क्रियः । प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥**

इत्युक्तलक्षणलक्षितो भवति । अत्र दोषाः वात–पित्त–श्लेष्मरूपाः । स्वस्थशरीरसंरक्षणार्थं वातपित्तश्लेष्मणां कार्यं मुख्यतममस्ति।

स्वास्थ्यसंरक्षणोपायाः

१. दिनचर्या (Daily regimens) – प्रातरुत्थानात् आरभ्य दिवसे रात्रौ वा क्रियमाणानां कर्मणां विस्तृतं विवरणमत्र समुपलभ्यते ।

२. ऋतुचर्या – वसन्त–ग्रीष्मादि ऋतोरनुगुणं आहारविहारयोः उपदेशोऽत्र समस्ति ।

३. संधारणम् (Natural Urges.........) – शरीरस्य काले काले उत्पद्यमानानां बुभुक्षापिपासादीनां विचारः तन्निरोधे को दोषः, अकाले उत्पाद्यते यदि अपायः कः इति विवेचनमत्र विहितम् ।

४. आहारः – यस्याहारस्य सेवनया न केवलम् शरीरे अपि तु मनसि च धातुसाम्यं तथा पुष्टिं च तनोति स एवाहारः इत्युच्यते । त्रिविधोऽयमाहारः –


ISSN : 2320-740X

a. स्वस्थहितः – सर्वेषु कालेषु देशेषु च यो रक्षति स एव स्वस्थहितः । यथा – तण्डुलं, गोधूमः, दुग्धम्, घृतं, मुद्गः, मधु, आमलकं सैन्धवलवणं, दाडिमफलादिकम् ।

b. शमनः – सशीरोत्पन्नान् दोषान् यः समस्थितिम् आनयति स इत्यर्थः । यथा – जीरकाः, मेथिकाः, कुस्तुम्बुरी, कृष्णमरीचाः, शुण्ठी, लशुनादिकम् ।

c. कोपनः – समस्थितौ विद्यमानान् दोषान् यः उद्रेचयति स इत्यर्थः । यथा – तैलभर्जिताः पदार्थाः, टमाटर, पर्युषितमन्नम् इत्यादिकम् । अपक्वाहारस्तु आमेत्युच्यते । गीतायामपि –

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।**

**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः । कट्वाम्ललवणात्युष्णतीक्ष्णरूक्षविदायिनः ।**

**आहाराः राजसस्येष्टा दुःखशोकमयप्रदाः । यातयामं गतरसं पूतिपर्युषितं च यत् ।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥**

इत्युक्तक्रमेण प्रकृतेरनुगुणम् आहारसेवनक्रमः प्रोक्तः । अष्टाङ्गहृदये भोजनकालः प्रोक्तः यथा –

प्रसृष्टे विण्मूत्रे, हृदि सुविमले, विशुद्धे च उद्गारे, क्षुदुपगमे तथा देहे च सुलघौ एव कर्तव्यमिति अष्टाङ्गहृदये प्रोक्तम् । भावप्रकाशनिघण्टावपि – याममध्ये न भोक्तव्यम्, यामद्वयं न लंघयेत् ॥ इत्यप्युक्तम् ।

भोजनविधिरपि तत्रैव यथा – काले, क्षुद्वान्, सात्म्यं, शुचि, हितम्, स्निग्धं, उष्णं, लघु, स्नानात्परं धौतपादकराननः, षड्रसम्, मधुरप्रायं, नातिद्रुतविलम्बितं तथा तन्मनाः सन्तः कुर्युरित्युक्तम् ।

भोजनप्रमाणं तु – **अष्टौ ग्रासाः मुनेर्भक्ष्याः षोडशारण्यवासिनाम् । द्वात्रिंशच्च गृहस्थस्य अनियतं ब्रह्मचारिणाम् ॥**

धर्मशास्त्रेषु तु – द्रव्यदुष्टं, भावदुष्टं, दृष्टिदृष्टं, कालस्पर्शसंस्कारदेशस्वामिप्रभृतिभिर्दुष्टं भोजनं न विधेयमिति प्रोक्तम्। उपनिषत्सुद– 'आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः', 'स्मृतिप्रतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' इत्यादिक्रमेण आहारनिर्माणस्याथवा तत्सेवनविधानस्य नियतः क्रमः प्रतिपादितः । आहारस्य स्वीकारे अध्यशनात्यशनादि विरुद्धक्रमाः वर्णिताः । भोजनकाले जलं सेवन्ते केचन सोपि क्रमः कीदृशः स्यादिति वर्णयति तद्यथा –

**अत्यम्बुपानात् विषमाशनाच्च संधारणात् स्वप्नविपर्ययाच्च ॥**

आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंरक्षणार्थम् । प्राणाः रक्ष्याः तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम् इत्येव संगमयन् लेखनात् विरम्यते ॥ इति शम् ॥

***


ISSN : 2320-740X

# विरोधाधिकरणम्

**डा. सूर्यनारायणभट्टः**

मीमांसाविभागाध्यक्षः

द्वादशायात्मकं मीमांसाशास्त्रम् । शास्त्रस्यास्य प्रमेयो भवति धर्मः । प्रमेयसिद्धिस्तु प्रमाणाधीना । तदर्थं प्रमाणनिरूपणं प्रथमाध्याये क्रियते इति प्रथमाध्यायः प्रमाणाध्याय इति प्रसिद्धः । अतः प्रथमाध्यायस्य धर्मप्रमाणनिरूपणं विषयः । तत्रापि प्रथमपादे विधिवाक्यस्य प्रामाण्यं निरूपितम् । द्वितीयपादे विधिसन्निधौ श्रुतानामर्थवादानां प्रामाण्यं साधितम् । तृतीयपादे वेदातिरिक्तधर्मप्रमाणं निरूप्यते । तत्र स्मृतिः आचारः इति तयोः प्रामाण्यनिरूपणं तृतीयपादस्य विषयः । प्रथमतः स्मृतेः प्रामाण्यं निरूप्यते । पूर्वस्मिन् पादे अर्थवादमन्त्रप्रामाण्यं निरूप्य ततः स्मृतिप्रामाण्यं निरूप्यते इति वर्तते सङ्गतिः । स्मृतयस्तावद् वेदमूलाः भवन्ति । तत्र वेदभागेषु क्वचिद् अर्थवादो वा मन्त्रो वा स्मृतेः मूलं प्रमाणं भवितुमर्हति । एवं पूर्वं निरूपिताः अर्थवादाः मन्त्राश्च स्मृतेः मूलभूताः भवन्तीति कृत्वा उपजीव्याः । विधिस्तु मूलभूतः भवत्येव । परं तु कुत्रचित् मन्त्रार्थवादोन्नीतार्थमूलकत्वं स्मृतेर्भवति । यथा **धन्वन्निव प्रपा असि** इत्ययं मन्त्रः प्रपा कर्तव्या प्रपा प्रवर्तयितव्या इत्यादिस्मृतेः मूलम् । अर्थवादा अपि मूलं भवन्ति । अतः स्मृतीनां मन्त्रार्थवादमूलकत्वमपि वर्तते इति प्रामाण्यं सिध्यति । तस्मात् मन्त्रार्थवादयोः उपजीव्यत्वं स्मृतेश्च उपजीवकत्वम् इति पूर्वं मन्त्रार्थवादौ निरूपितौ सम्प्रति स्मृतिः निरूप्यते । स्मृतिशब्देन न केवलं अष्टादशस्मृतयः गृह्यन्ते । परन्तु

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥**[१]

इति वेदातिरिक्तः सर्वेऽपि प्रमाणभूतो ग्रन्थः स्मृतिः इत्यनेन परिगृह्यते । **अस्मदादीनां प्रत्यक्षेषु परोक्षेषु च नानावेदेषु विप्रकीर्णस्य अनुष्ठेयार्थस्यैकत्र सङ्क्षिप्यमाणत्वात् एतासां सर्वासामपि स्मृतीनां वेदमूलकत्वसम्भवात् प्रामाण्यमिति** प्रथमाधिकरणे निरूप्य द्वितीयं विरोधाधिकरणं समारभ्यते ।

पूर्वाधिकरणे वेदमूलकत्वेन स्मृतेः प्रामाण्ये सिद्धे – स्मृतेः वेदविरोधः यत्र वर्तते तदानीं प्रामाण्यं वर्तते न वा इति विचार्य अस्मिन् अधिकरणे निर्धार्यते । पूर्वाधिकरणे स्मृतित्वावच्छेदेन यत् प्रामाण्यमुक्तं तस्य वेदविरोधे सति प्रामाण्यं नास्तीतिनिरूपणात् आपवादिकी सङ्गतिः । पूर्वाधिकरणसिद्धन्तमेव क्वचित् कारणान्तरात् सिद्धान्ती एव निराकरोति इति द्वयोः सिद्धान्तयोः अत्र सम्बन्धः । पूर्वम् उत्सर्गो निरूपितः इदानीं तु अपवादो निरूप्यते इति स्थितिः । अधिकरणस्यास्य विषयस्तु **औदुम्बरी सर्वा परिवेष्टयितव्या**[2] इति स्मृतिवाक्यम् । इदं हि वाक्यं **औदुम्बरीं स्पृष्ट्वा उद्गायेत्**[3] इति स्पर्शनश्रुत्या विरुध्यते । **अष्टचत्वारिंशत् वेदब्रह्मचर्यं चरेत्**[4] इति स्मृतिः "**जातपुत्रः कृष्णकेशः अग्नीनादधीत**"[5] इति प्रत्यक्षश्रुत्या विरुध्यते । एकस्मिन् प्रयोगे विरुद्धयोः द्वयोः अनुष्ठानं न सम्भवत्येव । अतः कस्य वा अनुष्ठानं कस्य वा त्यागः इति संशयस्तु जायते । विरोधे सति विकल्पेन अनुष्ठानं वा, विरोधपरिहारेण


ISSN : 2320-740X

द्वयोरपि अनुष्ठानं वा, प्रयोगभेदेन उभयानुष्ठानसम्भवात् उभयोः प्रामाण्यं वा, प्रत्यक्षश्रुत्या अनुमितश्रुतेः बाधात् बाध्यबाधकभावो वा इति नैकविधः भवति सन्देहः ।

यद्यपि औदुम्बरी सर्वा वेष्टयितव्या इति वेष्टनस्मृतिः साक्षात् श्रुत्यक्तमर्थं न निषेधति । परं सर्ववेष्टने कृते स्पर्शः न सम्भवतीति विरोधः अर्थाल्लभ्यते । स्पर्शो न कर्तव्यः इति नोच्यते स्मृत्या इति आर्थिको विरोधः भवति । यदा सर्ववेष्टनं क्रियते तदा औदुम्बर्याः स्पर्शो न भवति । यदि स्पर्शः कर्तव्यः तर्हि सर्ववेष्टनं न सम्भवति इति आर्थिकः विरोधः । अतः विरुद्धस्मृतेः प्रामाण्यं सम्भवति उत नेति विचारः क्रियते ।

**पूर्वपक्षः –**

अष्टकाः कर्तव्या इत्यादिषु यथा मूलश्रुतिः उपलभ्यते तथैव औदुम्बरी सर्वा वेष्टयितव्या इत्यत्रापि स्मृतित्वसामान्यात् प्रामाण्यं वक्तुं शक्यते । यया रीत्या तत्र मूलश्रुतिः अनुमिता सा रीतिः अत्रापि अविकला वर्तते। अष्टकाः कर्तव्याः इत्यादिस्मृतिः शिष्टत्रैवर्णिकपरिग्रहीता, मन्वादिप्रणीता च वर्तते । यदि इदमपि स्मृतिवाक्यं तस्यामेव कोटौ वर्तते तर्हि इदमपि शिष्टपरिग्रहीतं मन्वादिप्रणीतं च स्यात् । किमपि न्यूनता वा वैकल्यं वा नास्त्येव। अतः तद्वदत्रापि श्रुतिकल्पकत्वमस्त्येवेति प्रामाण्यं सम्भवत्वेव । तदा इयं शङ्का तु जागर्ति । यदा प्रत्यक्षश्रुतिविरोधो वर्तते तदा प्रत्यक्षश्रुतिविरुद्धा श्रुतिः कथं अनुमातुं शक्यते ? प्रत्यक्षश्रुत्या एव बाधो भवेत् इत्युक्ते उच्यते – अनुमेया श्रुतिः प्रत्यक्षश्रुतिविरुद्धार्थिका इति नोच्यते परं तु विरुद्धार्थिकापि सा श्रुतिः अनुमातुं शक्यते । यतः ग्रहणश्रुतिः अग्रहणश्रुतिः इति ग्रहणश्रुतिसत्यामेव अग्रहणश्रुतिरपि वर्तते । तद्वदेव स्पृष्ट्वा उद्गायेत् इति श्रुतौ सत्यामेव तद्विरुद्धापि अनुमातुं शक्यते । श्रुतिकल्पनायां तु अयं विरोधः प्रतिबन्धको न भवति । अतः बाधकाभावात् कल्पयितुं शक्यते । तर्हि यदि विरुद्धं श्रुतिद्वयं तदा किमनुष्ठेयमिति जिज्ञासायां तत्र विकल्पः इति सिद्धमेव । विप्रतिषेधेन उभयमपि सिध्यति अप्रमाणमिति तु न भवति अत्रापि विकल्पेन विरोधः परिहर्तुं शक्यते । यथा ग्रहणं कर्तव्यमिति एकं वाक्यं ब्रवीति न कर्तव्यमिति अपरं वाक्यं कथयति । तदा तु स्वेच्छाया विकल्पः । तर्हि कदाचित् एवं शङ्का स्यात् । यदि इयं रीतिः अत्र कल्प्यते तर्हि श्रुत्या लिङ्गस्यापि बाधः न स्यात् । यतः तत्रापि विरुद्धश्रुतिः सम्भाव्यते। ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यनेन वाक्येन श्रुत्या ऐन्द्र्या विनियोगे सत्यपि सामर्थ्यरूपलिङ्गवशात् अन्यापि श्रुतिः कल्पयितुं शक्यते इति कृत्वा इन्द्रोपस्थाने विनियोगः स्यात् तथा च श्रुत्या लिङ्गस्य बाधो न कर्तव्यः । यतः विकल्पेन परिहारः भवितुं शक्यते । इत्याक्षेपे सः बाधः अन्यादृशः, तादृश बाधः अत्र वक्तुं न शक्यते । श्रुत्या लिङ्गस्य बाधः कीदृशः इति चेत् सः अप्राप्तबाधः इति कथ्यते । श्रुत्या मन्त्रस्य विनियोगे कृते मन्त्रस्य विनियोगाकांक्षा निवर्तते इति कृत्वा आकांक्षामूलकं यत् लिङ्गेन कल्पनं तत् निवर्तते इति कृत्वा लिङ्गस्य प्रवृत्तिरेव नास्ति इति अप्राप्तबाधः । परमत्र तथा नास्ति । औदुम्बरीं स्पृष्ट्वा उद्गायेत् इति श्रुतिः स्पर्शं साक्षात् विधत्ते तेन स्मृतेः मूलाकांक्षा न निवर्तते । अतः अस्याः स्मृतेः किं मूलमिति आकांक्षा वर्तते एव । अतः आकांक्षावशात् अन्या श्रुतिः कल्पयितुं शक्यते ।


ISSN : 2320-740X

ननु तर्हि विरोधात् स्थितस्य अप्रामाण्यबुद्धिजननरूपः बाधः भवितुमर्हति । अप्रामाण्यं ज्ञाप्यतामिति चेत् तदपि न सम्भवति । यदि वह्निः उष्णो भवति तर्हि शीतो न भवति शीतो भवति चेत् उष्णो न भवति । अनयोः विरोधो वर्तते इति एकेनैव भवितव्यम् । तथात्र परिहर्तुं अशक्यो विरोधो नास्ति । अत्र तु विकल्पेन विरोधः परिहर्तुं शक्यः । अतः अस्या अपि स्मृतेः प्रामाण्यमिति पूर्वपक्षे प्राप्ते –

**अभिधीयते** – अत्र सिद्धान्ते भाष्यकारवार्त्तिककारयोः ईषत् भेदः दृश्यते – **आदौ भाष्यकारमतम्** – अनुमानेन वा अर्थापत्या वा यः अर्थः अवगन्तव्यः तत्र जिज्ञासा अपि कारणं, जिज्ञासा नास्ति चेत् अनुमानं न प्रवर्तते । यथा धूमं दृष्ट्वा अनन्तरं वह्निरस्ति वा न वेति सन्देहो जायते अनन्तरं जिज्ञासा भवतीति व्याप्त्यादिज्ञानेन सः वह्निमनुमिनोति। यदि जिज्ञासा नास्ति स निवर्तते । प्रकृते तु औदुम्बरी वेष्टनीया वा न वेष्टनीया वा इति सन्देहे प्रत्यक्षश्रुत्या यदा स्पर्शः विहितः तदा औदुम्बरी न वेष्टनीया इति निश्चयस्य विद्यमानत्वात् एतद्विषये जिज्ञासा एव न जायते । अतः औदुम्बरी न वेष्टयितव्या इति अर्थस्य निश्चितत्वात् जिज्ञासा एव नास्तीति मूलकल्पनमेव न सम्भवति । अतः श्रुतिमूलकत्वकल्पनहेतोः अभावात् पूर्वाधिकरणसिद्धान्तविरोधात् अस्याः स्मृतेः प्रामाण्यं नास्तीति भाष्यकाराणामाशयः । **"अशक्यं च स्पृशता वेष्टयितुम् वेष्टयता वा स्प्रष्टुम् । अतः वेष्टयेत् स्पृशेदिति अशक्यविधानात् न तावदुभयोरपि प्रामाण्यं सम्भवतीति अन्यतरस्य बाधः । श्रुतिस्तु प्रबला अतः स्मृतिरप्रमाणम्'**[6] **इति ।**

अन्यदपि भाष्यकारकृतमेकमधिकरणं वर्तते । **हेतुदर्शनाच्च** इति सूत्रेण तदारभ्यते । परम् उभयस्मिन्नपि अधिकरणे वार्त्तिककारणां विप्रतिपत्तिः वर्तते । एतावता याः स्मृतयः प्रत्यक्षश्रुतिविरुद्धार्थं बोधयन्ति ताः अप्रमाणमिति ज्ञातम् । परं तु याः तथा प्रत्यक्षश्रुतिविरुद्धमर्थं न बोधयन्ति किन्तुदृष्टमूलकत्वं तत्र सम्भाव्यते ता अपि स्मृतयः अप्रामाणमिति कथयितुमधिकरणान्तरम् आरभ्यते । यथा वैसर्जनहोमीयं वासः अध्वर्युः परिगृह्णाति इति । अस्याः स्मृतेः मूलं श्रुतिः इत्येव इति वक्तव्यमिति नियमो नास्ति । यतो हि अयं स्मृतिप्रणेता इममर्थं प्रत्यक्षेणापि अवगन्तुं प्रभवति । अतः दृष्टविधया अपि स्मृतेः मूलं सम्भवति । यदा मूलान्तरं प्रत्यक्षादि नास्ति प्रमाणं तदैव श्रुतिमूलकत्वम्, तत्तु प्रमाणं भवेत् । परं यदा धर्मप्रामाण्यमपेक्षते तदा श्रुतिमूलकत्वमेव स्यात् ।

वार्तिककारास्तावत् नेदमभ्युपगच्छन्ति । जिज्ञासा अनुमितिं प्रति न कारणम् । अग्निजिज्ञासां विनापि धूमदर्शनात् अस्यानुमानं भवति । ज्ञानसामग्र्यां सम्पन्नायां ज्ञानं स्वयमेव भवति । ज्ञानसामग्रिमध्ये जिज्ञासापि न प्रवेशनीया । तथा च जिज्ञासायाः अभावात् अनुमानं न जायते इति वक्तुं न शक्यते ।

यदि अनुमानं प्रति अनुमेयजिज्ञासाकारणमिति **कृत्वा चिन्ता इति** न्यायेन स्वीकारे सत्यपि, विवेचने क्रियमाणे, अस्याः स्मृतेः मूलं किमिति सन्देहस्तु जायते । किं शब्दस्य जिज्ञासाविशिष्टे शक्तिः । किमिति यदि पृच्छति तस्य जिज्ञासा वर्तते इत्येव अर्थः। किमित्यनेन प्रमाणसामान्यं विषयः । प्रमाणसामान्ये श्रुतिरपि वर्तते । तदानीं अनुमेया श्रुतिः, तद्विषये जिज्ञासा सम्पद्यत एव। अतः श्रुत्यनुमाने बाधकं नास्ति । एवं वैसर्जनहोमीयं वासः अध्वर्युः परिगृह्णाति इत्यत्रापि वार्क्तिककाराः इत्थमाहुः प्रत्यक्षश्रुतिविरोधाभावेऽपि यत्किञ्चित् लोभादिदर्शनं मूलतया


ISSN : 2320-740X

सम्भाव्यते चेत् सर्वत्रापि एवं सम्भावयितुं शक्यते । अष्टका कर्तया इत्यत्रापि लोभ एव मूलमिति वक्तुं शक्यते । तथैव अरुचिवशात् वा आलस्यादिना वा केनचित् कलञ्जभक्षणं न कृतं तद् दृष्ट्वैव न कलञ्जं भक्षयेत् इति स्मृतिः प्रणीता स्यात् । अतः उच्यते –

**प्रसरन्न लभन्ते हि यावत् क्वचन मर्कटाः । नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे** ॥ इति ।

अर्थात् एकस्मिन् उपवने मर्कटस्य कृते एकत्र स्थानं परिकल्प्यते चेत् सः शाखामृगः स्वस्यकृते परिकल्पिते स्थाने एव न तिष्ठति किन्तु सम्पूर्णमुपवनमेव नाशयति तद्वत् स्मृतिसमुदाये कासुचित् श्रुतिविरोधाभावेऽपि लोभादिमूलं सम्भाव्यते तर्हि एतादृश अप्रामाण्यपिशाचिका सर्वत्रैव स्मृतिषु व्याप्नुयात् । अतः प्रकारान्तरेण अत्र चिन्ता कर्तव्या। काश्चन स्मृतयः शिष्टपरिग्रहीताः काश्चन अपरिग्रहीताः । तर्हि किमनुष्ठेयमिति प्रश्ने सर्वा विष्टयितव्या इत्यस्या अपि अनुमितश्रुतिरस्ति । स्पृष्ट्वा उद्गायेदिति प्रत्यक्षश्रुतिरस्ति । प्रत्यक्षानुमेयश्रुत्योर्मध्ये बलाबलं विचार्य अस्माभिः स्वकीयमनुष्ठनं निर्णेतव्यम् । यावत् पर्यन्तं वेष्टयितव्या इति श्रुतिः नोपलभ्यते तावत्पर्यन्तं प्रत्यक्षश्रुत्यर्थ एव अनुष्ठेयः। अनुमितिश्रुत्यर्थः नानुष्ठेयः । यतो हि प्रत्यक्षश्रुतिरेव अनुष्ठाने प्रमाणम् । एवं च प्रामाण्यं तु द्विविधम् भवति विधीवाक्यस्य । अज्ञाताबाधितार्थबोधकत्वलक्षणमेकं प्रामाण्यम् । तत्तु विधिवाक्यसाधारणम्, अपरं यदसाधारणं प्रामाण्यं विधेरेव तत् अनुष्ठानपर्यन्तम् । विधिना विहितं नानुष्ठीयते चेत् तस्य वाक्यस्य अप्रामाण्यमेव कृतं भवति । विधिवाक्यं प्रमाणान्तरवत् न केवलं बोधयति अपि तु प्रवृत्तिमपि जनयति यदि प्रवृत्यनुकूलव्यापाररूपया शब्द भावनया प्रवृत्तिर्न जायते चेत् सा शाब्दीभावना एव न स्यात् । अतः अज्ञाताबाधितार्थबोधकत्वं अनुष्ठापकत्वं च प्रामाण्यं विधिवाक्यस्य वर्तते । तत् प्रमाण्यं इदानीं स्मृतौ नास्ति । यतो हि **विरोधे अनपेक्ष्यं स्यात् असति ह्यनुमानमिति** सूत्रम् । अत्र श्रुतिविरोधे स्मृतेः अप्रामाण्यं सूत्रकारेण प्रोक्तम् अतः सूत्रार्थः कः इति तु स्पष्टीकार्यम्।

श्रुतिमूलकत्वेन अबोधकत्वलक्षणं वा बाधितार्थबोधकत्वलक्षणं वा अप्रामाण्यं वक्तव्यं तत्तु वक्तुं न शक्यते अतः अननुष्ठापकत्वलक्षणमप्रामाण्यं स्मृतेः सूत्रकाराभिमतम् । अतः यावत् पर्यन्तमस्याः स्मृतेः मूलभूतं श्रुतिर्नोपलभ्यते तावत् पर्यन्तमनुष्ठानप्रामाण्यं नास्ति । तावत् पर्यन्तं प्रत्यक्षां श्रुतिमुपलब्धां स्वीकृत्यैवानुष्ठानं करिष्यामः इति सर्वं सुमङ्गलम् ।

**आधारग्रन्थाः**


1. मीमांसासूत्रवृत्तिः
2. भाट्टदीपिका (प्रभावली सहिता)
3. मीमांसाभाष्यम्
4. तन्त्रवार्त्तिकम्


***



ISSN : 2320-740X

# शास्त्रशस्त्रो माघः

**डा. गणेशपण्डितः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः

माघमासस्य पूर्णिमायां मघानक्षत्रस्य संस्थितौ महाकवेर्माघस्य जननमभूत् इति तु सुविदितचरमेव । "माघे मेघे गतं वयः" इतीदं कविवचनं काव्यशास्त्रीयं तदीयं पाण्डित्यमभिव्यनक्ति । न केवलं काव्यशास्त्रे अपि तु समस्तास्तिकनास्तिकदर्शनेषु माघस्य समाना गतिः तलस्पर्शिज्ञानं चाऽसीत् । शिशुपालवधमहाकाव्यस्य अवलोकनमात्रेणैव ग्रामटिकोऽपि वक्तुं पारयति यत् 'शास्त्रशस्त्रो माघः' इति ।

'प्रथमे हि विद्वांसो वैयाकरणाः' इति आनन्दवर्धनाचार्येण ध्वन्यालोके सूपपादितम् । व्याकरणशास्त्रे माघस्य परिपूर्णपाण्डित्यमासीदेव । जन्तूनां नरजन्म दुर्लभमित्यतः यः पुरुषः जात्या क्रियाभिः गुणैर्वा न किञ्चिदपि विशेषकार्यम् आचरति तस्य जन्म संज्ञाशब्द इव व्यर्थतां गच्छति, स तु पुरुषः नामधारणार्थमेव जीवति इति वदन् शब्दशास्त्रनियमान् सप्रसङ्गं व्याख्याति महाकविः । तद्यथा द्वितीयसर्गे –

**असंपादयतः कञ्चिदर्थं जातिक्रियागुणैः । यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ इति ।**

माघस्य सङ्गीतशास्त्रेऽपि रुचिरासीदेव । शिशुपालवधे उद्धवश्रीकृष्णयोः संवादमुखेन तदीयं सङ्गीतशास्त्रीयज्ञानं प्राकटयत् । सप्तस्वराः सङ्गीतशास्त्रे प्रथिताः । किन्तु सप्तानामेव निषादादिस्वराणां विविधप्रकारमेलनेन यथा अनन्तानि गीतानि सङ्गीतज्ञैः गीयन्ते तथैव स्वरव्यञ्जनशब्दसाहाय्यमात्रेणैव पण्डिताः कोटिशः ग्रन्थान् रचयन्ति इति महाकविना निगदितम् । यथोक्तं शिशुपालवधे –

**"वर्णैः कतिपयैरिव ग्रथितस्य स्वरैरिव । अनन्ता वाङ्मयस्यापि गेयस्येव विचित्रता ॥" इति ।**

माघस्तु राजनीतिशास्त्रपारगोऽपि । पार्थिवस्य व्यक्तित्वं निर्धारयति यथा –

**"बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः । चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥" इति ।**

राज्ञः निरूपणप्रसङ्गे चातुर्येण साहित्यशास्त्रीयसिद्धान्तमपि सकाले योजयति महाकविः । यथा कस्यचित् स्थायिभावस्य रसरूपेण परिपाकावस्थायां बहवः विभावानुभावसंचारिणः सहायकाः सञ्जायन्ते, एवमेव विजयार्थिनः नृपस्य बहवः राजानः सहायकाः सम्पाद्यन्ते इति । यथोक्तं तेन –

**स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा । रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ इति ॥**

चतुर्दशसर्गे यज्ञादीनां वर्णनावसरे तदीयं पूर्वोत्तरमीमांसाशास्त्रीयज्ञानं विभातितमाम् । किञ्च द्वितीयसर्गस्यैकनवतितमश्लोकः न्यायशास्त्रीयवैदुष्यं प्रकटीकरोति । अश्वशास्त्रे राजशास्त्रे च महकवेर्माघस्य पर्याप्तपाण्डित्यमासीदित्यपि पञ्चमसर्गस्याध्ययनेन अवगम्यते । सांख्ययोगादिष्वपि दर्शनेषु माघस्य महती गतिरासीदेव । चतुर्थसर्गस्य पञ्चपञ्चाशत्तमश्लोकः प्रमाणमिदं पुष्टीकरोति । एवं सर्वशास्त्रसम्पन्नः आसीत् माघः । अत एव 'शास्त्रशस्त्रो माघः' इतीदं वचनं त्रैकालिकं सत्यमिति शिवम् ॥


ISSN : 2320-740X

**परिशीलितग्रन्थसूची**

शिशुपालवधम् – चौखम्बा प्रकाशन, वाराणसी

शिशुपालवधम् – अनुराधा पब्लिकेशन्स्, नई दिल्ली

प्रबन्धकुसुमाञ्जलिः – इन्दिरा प्रकाशनम्, दरभंगा

***

# ज्ञानं विज्ञानञ्च

**डॉ. वेङ्कटरमणभट्टः**

सहायकाचार्यः, शिक्षाशास्त्रविभागः

ज्ञानमिति पदं ज्ञाधातोः निष्पन्नम् । तस्य अवबोधः, संशोधनम्, अन्वेषणम्, अभिज्ञानं गवेषणमिति बहवो हि अर्थास्सन्ति । बाह्यवातावरणम् आत्मानञ्च अवगच्छतीति ज्ञानपदस्य तात्पर्यम् । शङ्कररामानुजमध्वाचार्याणां दृष्ट्या उपनिषदृष्ट्या च ज्ञानपदस्याभिप्रायः ब्रह्मज्ञानमिति । ज्ञानपदस्य वि इत्युपसर्गयोजनेन विज्ञानमिति पदं सिध्यति । तस्य च विशिष्टं ज्ञानमिति भावः । लौकिकशास्त्रज्ञानमेव विज्ञानमिति आम्रेडितम् । विविधविषयकम् अवगमनम् अवबोधनं विवेकश्चेति नैके अर्थाः विज्ञानस्य प्रतिपादिताः । सैन्स् (Science) इत्याङ्ग्लभाषायां प्रयुक्तम्। बहुप्रकारकं ज्ञानं यः वेत्ति सः विज्ञानीति व्यपदिश्यते । सः प्राकृतिकान्वेषणे सन्ततमात्मानं व्यापारयित्वा बाह्यवातावरणस्य ज्ञानमवाप्नोति । प्रत्येकमपि विषयं सुपरीक्ष्यैव सः ज्ञानं सम्पादयति । तद्यथा

**यथा चतुर्भिः कनकं परीक्ष्यते । निघर्षणच्छेदनतापताडनैः ॥**

**तथा चतुर्भिः पुरुषः परीक्ष्यते । श्रुतेन शीलेन गुणेन कर्मणा ॥** (वृ. चा 5.2)

चतुर्भिः प्रकारैः स्वर्णस्य परिशीलनं क्रियते । पुरुषस्यापि परीक्षणं चतुर्भिः प्रकारैः क्रियते । यत्किमपि वस्तुनः अस्तित्वं वैशिष्ट्यं वा अवगन्तव्यं चेत् प्रयोगनिरीक्षणसन्तुलनपृथक्करणद्वारा एव क्रियते ।

एतावद्विज्ञानिनः बाह्यप्रपञ्चे वर्तमानं वास्तवज्ञानं (Objective Reality) प्राप्नुवन् । किञ्च आत्मनः विषये स्वस्य देहस्य विषये च साम्प्रतमपि अज्ञानिन एव विद्यन्ते । पञ्चाशदुत्तरैकशतं दशलक्षवर्षेभ्यः विकासं प्राप्तवता मस्तिष्केण समेऽपि विषया आत्मसात्कृताश्चेदपि स च मस्तिष्कः स्वविषये ज्ञातुमसमर्थः आसीत् । किञ्चाधुना नरमनोविज्ञानिनां नरजीवशास्त्रज्ञानां च सततप्रयासेन मस्तिष्कः स्वविषये स्वयमेवावगन्तुमुद्युक्तः परं प्राक्तनभारतीयदार्शनिकवरेण्यानां प्रकारेण चैतन्यरूपं कदापि लोकैः दृष्टुं न शक्यते । यतः तच्च चैतन्यं व्यक्तिनिष्ठम् (Subjective Reality) । तच्चैतन्यमवगन्तुं (Consiousness) दर्शनान्येवास्माभिः शरणीकरणीयानि । नान्यः पन्थाः विद्यते । पुनः पुनः अभ्यासः करणीय इति ज्येष्ठानां महापुरुषाणामाशयः।



ISSN : 2320-740X

तैत्तिरियोपनिषदि अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेति पञ्चकोशैर्व्यापृतदेहोयमिति बहुसुन्दरेण व्याख्यातमस्ति । सुखमयं जीवनं यापयितुं क्षणिकसुखाय च मानवेषु केचन अन्नमयवलये एव (Materialism) श्रान्ताः भवन्ति। केचित् अमुम् भौतिकवलयं तीर्त्वा (Vitalism) मनोमयविज्ञानमयपर्यन्तं (Mentalism & intellectulism) गच्छन्ति । कोटिजनेषु केचिदेव आनन्दमयस्थितिं (ecstacy) सम्प्राप्य जीवनसाक्षात्कारमवाप्नुवन्तीति मुनीनां वचनं प्रमाणम् । आचार्यशङ्करभगवत्पादानां ग्रन्थेभ्यः आनन्दगिरिः व्याख्यानानि व्यलेखीत् । तेषु व्याख्यानेषु मनसः विषये उल्लिखितमस्ति मनः स्वप्रकाशयुक्तमिति । देशकालादिकम् अतिक्रम्य गन्तुं सामर्थ्यमस्ति मनसः । तादृशचैतन्यमनः विज्ञातुं सहकरोति विज्ञानम् ।

सामान्यतः विज्ञानं नाम परामर्शज्ञानं, बुद्धिशक्तिः विवेकश्च । गुणदोषयोः विवेचनपुरस्सरं गुणं गृहीतुं विद्यमानसामर्थ्यस्य विज्ञानमिति व्यपदेशः । कदाचन मनसि परिवर्तनं भूत्वा अहङ्कारः समुत्पद्यते । बुद्धेः नियन्त्रणं न भवति । तादृशप्रसङ्गे केवलं ज्ञानेन तज्ज्ञानजन्यशक्त्या च किमपि प्रयोजनं न भवति । तदा विज्ञानस्यैव साहाय्यमपेक्षितम् । यथा गीतायाम्

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पापानं व्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥** (III अ, 41 श्लो)

अस्य श्लोकस्य सारस्तु अत्यन्तमाशाकामौ ज्ञानं विज्ञानं च नाशयतः । बुद्धिमनसोः अन्धकारः भवति । अतः इन्द्रियजयः प्राणतव्य इति गीताचार्येन प्रतिपादितम् । विज्ञानविवेकज्ञानाभ्यां भूयिष्ठं ज्ञानमेव व्यक्तेः प्रोन्नत्यै सहकुरुते । तत्रेद गीतावाक्यं स्पष्टयति यत् 'ज्ञानं विज्ञानसहितं पवित्रमिह विद्यते' । विज्ञानमात्रेणैव नास्माकं सर्वाङ्गीणविकासः जायते । वैज्ञानिकप्रपञ्चस्य तत्त्वानि सुपरिशील्य, विज्ञानस्य व्याप्तिं विज्ञाय उपकरणानि उपयुज्य, अस्माकं देहचित्तं नियम्य च अस्मद्विकासायास्माभिरेव प्रयत्नः विधानीयः । गीतायां इदं पद्यं समुपलभ्यते ।

**उद्धरेदात्मनात्मानं नात्मनमवसादयेत् । आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः ॥**

एतादृशगुणात्मकधनात्मकप्रयत्नैः व्यक्तेः समाजस्य देशस्य वा विकासः अवश्यं सम्भवति । विज्ञानमवगन्तु काचित् पद्धतिराश्रयणीया । कश्चित् तर्कोऽपि विधेयः । युक्तियुक्ततापि एतद्दिशि सहकरोति । भारतीयसाहित्यवाङ्मये युक्तेः कृते विशिष्टमेकं स्थानं वर्तते । सर्वाण्यपि भारतीयदर्शनानि प्रमाणानि निरूपयन्ति । तैः प्रमाणैरेव सत्यान्वेषणं क्रियते । प्रमाणमन्तरा सिद्धान्तः नैव तिष्ठति । प्रमाणान्येव युक्तायुक्तत्वं साधयन्ति ।

अमरकोशे तावत् विज्ञानमिति पदं –

**मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।**

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् (11.1.5.167) इति वर्णितम्स्ति । मोक्षोपयोगिबुद्धिरेव ज्ञानम्। मोक्षानुपयोगिनोः शिल्पशास्त्रयोः ज्ञानं विज्ञानम् । अतः साम्प्रतं भौतिकविद्यां तन्त्रज्ञानञ्च विज्ञानकुक्षौ अन्तर्भावयितुं शक्यते ।


ISSN : 2320-740X

**भारतीयविज्ञानस्य तार्किकं चिन्तनम्**

भारतीयविज्ञानमवगन्तुमस्माभिः प्रसिद्धस्य विज्ञानिनः रवीन्द्रनाथसील्वर्यस्य अभिप्रायः ज्ञातव्यः । तत्र सः विज्ञानस्य क्रमं, प्राथमिकज्ञानस्यावश्यकतां विधानञ्च न्यरूपयत् । भारतीयविज्ञानस्याधारः पाश्चात्यविज्ञानपरम्परया समुपलभ्यते । ग्रीक् दार्शनिकस्य अरिष्टाटल्वर्यस्य तर्केण, यूक्लिड्वर्यस्य ज्यामितिसूत्रेण सिद्धान्तेन च भारतीयवैज्ञानिकधारा तिष्ठति । परमस्मद्देशस्य चार्वाकजैनबौद्धादिनास्तिकदर्शनैः न्यायवैशेषिकसांख्ययोगपूर्वमीमांसा–उत्तरमीमांसेति आस्तिकदर्शनैः काचिद्वैज्ञानिकपद्धतिरवलोक्यते । तथैव पाणिनिना संरचिताष्टाध्याय्यामपि कश्चन सुसम्बद्धः वैज्ञानिकक्रमः विद्यते ।

ज्ञानप्रसाररूपोपदेशग्रन्थस्य शास्त्रमिति व्यपदेशः । कर्तव्याकर्तव्य–साध्वसाधु–योग्यायोग्य चराचरविषयाणां प्रबोधकः ग्रन्थः शास्त्रमित्यभिधीयते । चत्वारो वेदाः पुराणानि, षट् दर्शनानि धर्मनीतिकलादयोऽत्रान्तर्भवन्ति । शास्त्रलक्षणन्त्वित्थमभिहितम् –

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तत् शास्त्रमभिधीयते ॥**

तत्तत्शास्त्रेषु प्राप्तज्ञानपण्डितेभ्यः शास्त्रमभ्यसनीयम् । अर्जुनाय अध्यात्मविद्याबोधनावसरे भगवता श्रीकृष्णेन उच्यते –

**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥** (15.20)

हे पापरहित ! तुभ्यमहं रहस्यं शास्त्रम् उदबोधयम् ।

मुण्डकोपनिषदि शास्त्रविद्यामधिकृत चर्चा वर्तते यत् 'कस्मिन्तु भगवो विज्ञाते सर्वम् इदं विज्ञातं भवति ? ' यस्याः विद्यायाः आत्मसात्करणेन सर्वाः विद्याः ज्ञायन्ते इति शिष्यः गुरुं पृच्छति । गुरुः उत्तरति 'द्वे विद्ये वेदितव्ये। इति हस्म यद् ब्रह्मविदो वदन्ति । परा चैव अपरा च । (मुण्डक ।–।–14)

अपरविद्यायां वेदाः ध्वनिशास्त्रं विधिनियमाः, व्याकरणं, शब्दनिष्पत्तिः लौकिकशास्त्राणि सर्वाणि सम्मिलितानि भवन्ति । पराविद्या नाम आध्यात्मविद्या । आत्माज्ञानमित्यभिप्रायः । अस्मिन् आधुनिके प्रपञ्चे विज्ञानतन्त्रज्ञानकलादिविषयाः अपराविद्यायामन्तर्भवन्ति । अपरविद्यायाः ज्ञानमवाप्य भौतिकप्रपञ्चस्यास्तित्वं विज्ञाय पराविद्या साधनीया इत्याचार्यशङ्करस्याभिप्रायः । साम्प्रदायिकभारतीयानां दृष्टौ कणादस्य पाणिनेश्च ग्रन्थाः वैज्ञानिकक्रमस्य सर्वेषां शास्त्राणां कृते च आधाराः । विषयेऽस्मिन् काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति वाक्यं पुष्टिं जनयति । सर्वविधज्ञानस्यावगमने विज्ञानशाखानामवगमने च काणादपाणिनीयग्रन्था एव सोपानत्वेन तिष्ठन्ति इति समेषां महान् प्रत्ययः । पाश्चात्यतर्कः प्रमेयवाक्यानां समुदायं प्रस्तौति चेत् भारतीयतर्कः ज्ञानमेव प्रधानं प्रमेयमिति मनुते । भारतीयचिन्तनक्रमे तु वाक्यानि यथा प्रधानानि तथैव अर्थोऽपि प्रधानः । इतरभाषासु पदानि वाक्यानि च व्यवहारे वर्तन्ते चेदपि तानि क्वचिदेकमेवार्थं द्योतयन्ति । अतः पाश्चात्यविद्वांस एव केवलं


ISSN : 2320-740X

वाक्यविश्लेषणपुरस्सरं तार्किकविषयज्ञानं प्राप्नुवन्ति । भारतीयपद्धतिमाश्रित्य ज्ञानविश्लेषणेनैव अधिकः लाभः । तेन उत्कृष्टं ज्ञानं वर्धते । ज्ञानमिदं द्वेधा विभज्यते यथार्थ अयथार्थभेदेन ।

इदं हि ज्ञानं सविकल्पकनिर्विकल्पकञ्चेति द्वेधा विभज्यते । सविकल्पकज्ञानं नाम निश्चितज्ञानं भवति । निर्विकल्पकं ज्ञानं किञ्चिदसन्धिग्धमिति । पर्वते धूमं दृष्ट्वा वह्निज्ञानं निर्विकल्पकमित्युच्यते । आधुनिकविज्ञाने वस्तूनि वस्तूनाञ्चास्तित्वं ज्ञातुं यथा निरीक्षणम् अनुमानं (सन्देहः) निर्णय इति सोपानक्रममाश्रित्य वैज्ञानिकप्रयोगाः क्रियन्ते तद्वत् दर्शनेष्वपि प्रमाणपुरस्सरं सिद्धान्ताः समुपस्थाप्यन्ते । भारतीयदर्शनेषु प्रमाणानि निरूपितानि सन्ति । तानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयश्चेति । प्रत्यक्षप्रमाणमिन्द्रियम् । चक्षुरिन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । त्वगिन्द्रियजन्यज्ञानं प्रत्यक्षम् । कञ्चन वृक्षं दृष्ट्वा अन्यःकश्चन वृक्षः एतादृशवृक्षजातौ अन्तर्भवतीति सम्भावनमनुमानम् । कञ्चित्प्रमाणविशेषं वस्तुविशेषं वा दृष्ट्वा तस्य रूपगुणस्वभावान् अवगम्य कालान्तरे तादृशं वस्तुविशेषं प्राणिविशेषं वा अन्यत्रावलोक्य प्राप्तपूर्वानुभवेन इदं तदेवेति ज्ञानमवधारणमुपमानम् । समाचर्यमासम्प्रदाये विधौ च सन्देहः चेत् एतत्सम्बद्धज्ञानिभिस्सह चर्चया एतद्विषयकग्रन्थाध्ययनेन वा समस्यापरिहारोन्वेषणीयः । आप्तवाक्यं शब्दप्रमाणम् ।

चार्वाकाः बौद्धाश्च प्रत्यक्षमनुमानमिति प्रमाणद्वयमङ्गीकुर्वन्ति । जैनाश्च प्रत्यक्षाप्तवाक्यमिति स्वीकुर्वन्ति । नैयायिकाः प्रत्यक्षानुमानोपमानशब्दा इति प्रमाणचतुष्टयमङ्गीकुर्वन्ति । वैशेषिकास्तु प्रत्यक्षानुमानमिति प्रमाणद्वयमङ्गीकुर्वन्ति । प्रत्यक्षानुमानशब्दान् सांख्याः अभ्युपगच्छन्ति । षट् प्रमाणानि मीमांसकैरभ्युपगम्यन्ते । वेदान्तिभिरपि षट् प्रमाणानि स्वीक्रियन्ते ।

भारतीयतर्कशास्त्राधारेण प्रत्येकं ज्ञाने विषयः (Content) भवति । विषयमन्तरा न ज्ञानं बुध्यते । विषयोऽयं बहुप्रकारकः । सर्वोऽपि विषयः विशिष्टः सर्वमपि वस्तु विशिष्टञ्च भवति । यथा घटे घटत्वमस्ति (genus)। घटत्वं विना घटज्ञानं नैव जायते । तस्मिन् वस्तुनि गुणः कर्म च भवतः । अत एव गुणस्वभावाभ्यां वयं वस्तूनां ज्ञानं प्राप्नुमः । नैयायिकानामभिप्रायेण प्रत्येकं पदार्थे वस्तुनि च परस्परं सम्बन्धः वर्तते । सर्वस्यापि पदार्थविशेषस्य गुणविशेषः विद्यते । कदाचिदस्माकमविद्यया रज्जुविशेषे सर्पज्ञानं जायेत इति शम् ।

परिशीलितग्रन्थाः –

१. भगवद्गीता
२. तैत्तिरीयोपनिषत्
३. मुण्डकोपनिषत्
४. सुभाषितरत्नभण्डारः
५. चाणक्यशतकम्
६. अमरकोशः

***


ISSN : 2320-740X

# शक्तिग्रहोपायविमर्शः

**विद्वान् श्यामसुन्दरः**

नव्यन्यायविभाग–सहायकाचार्यः(संविदा)

लोके हि लक्षणप्रमाणाभ्यामेव वस्तुसिद्धिर्भवति नान्यथा, अत एवोक्तम् **मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्**[1] इति । तदनुरोधेन सर्वेऽपि दार्शनिकाः तत्तल्लक्षणवाक्यैः प्रमाणानि प्रतिपाद्य प्रमेयसिद्धिं प्रदर्शयन्ति । प्रमाणपटवो हि नैयायिकाः प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वार्येव प्रमाणानि, अन्यानि तु प्रमाणाभासानि इति नानाविधैः योग्यैः युक्तिजातैः व्यवस्थापयन्ति । तेषु प्रमाणेष्वन्यतमः शाब्दप्रमाकरणीभूतः शब्दः आप्तोच्चरितवाक्यरूपः । यथा **"ज्योतिष्टोमेन स्वर्गकामो यजेत" "नद्यास्तीरे फलानि सन्ति"** इत्यादिः । वाक्यज्ञानानन्तरं पदार्थोपस्थितिद्वारा वाक्यार्थबोधं प्राप्य फलेप्सया तत् प्राप्तुं प्रयतते पुरुषः । न तावत् श्रुतात्सर्वस्मादपि शब्दात् शाब्दबोधो जायते, किन्तु स्वार्थोपस्थापकादेव । तथा च प्रथमं शब्दज्ञानं, ततः वृत्तिज्ञानसहकारेण तत्तच्छब्दार्थोपस्थितिः, ततः शाब्दबोधः इति क्रमः । तत्र पदज्ञानं करणं, पदार्थोपस्थितिरवान्तरव्यापारः, शाब्दबोधः फलं वृत्तिज्ञानादिकं सहकारिकारणम् । तदुक्तं –

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥**[2] इति ।

तत्र पदज्ञानशब्दः आप्तोच्चरिताकाङ्क्षायोग्यतासन्निधिमत्पदकदम्बरूपवाक्यज्ञानपरः, न तु आकाङ्क्षादिरहितवाक्यज्ञानपरः । अतः 'गिरिर्भुक्तं अग्निमान् देवदत्तेन' इति वाक्यं न प्रमाणम् । एवं यथाकथञ्चिदुत्पन्ना पदजन्यपदार्थोपस्थितिः न व्यापारः, अपि तु वृत्त्या पदज्ञानजन्यपदार्थोपस्थितिरेव । अन्यथा घटादिपदात् समवायेन तदाश्रयीभूताकाशस्योपस्थित्या घटादिपदज्ञानात् आकाशविषयकशाब्दापत्तेः । वृत्त्या तु घटादिपदात् घटादेरेवोपस्थितिर्जायते, न त्वाकशस्येति न दोषः । वृत्तिश्च शाब्दधीहेतुपदार्थोपस्थित्यनुकूलः अर्थानुयोगिकपदप्रतियोगिकः, पदानुयोगिकार्थप्रतियोगिको वा पदपदार्थयोः सम्बन्धः । स च शक्तिलक्षणाभेदेन द्विविधः । "इदं पदम् अमुमर्थं बोधयतु" इति "अस्मात्पदादयमर्थो बोद्धव्यः" इति वा सङ्केतः शक्तिरित्यभिधीयते । तया च अर्थप्रतिपादकं शक्तं पदं, तत्प्रतिपाद्योऽर्थः शक्यार्थः इत्युच्यते । लक्षणा च "शक्यार्थसम्बन्धः", तात्पर्याद्यनुपपत्तिमूलकः । तया च "गङ्गायां घोषः" इत्यादौ गङ्गादिपदस्य तीराद्यर्थकत्वं निश्चीयते ।

**शक्तिग्रहोपायाः –**

शक्तिग्रहोपायाश्च व्याकरणम्, उपामनम्, कोशः, आप्तवाक्यम्, व्यवहारः, वाक्यशेषः, विवृत्तिः, प्रसिद्धपदसान्निध्यमिति नानाविधाः भवन्ति । तदुक्तम् –

---

[1] जै.न्या.विवृतिः

[2] न्या.सि.कारिका (८१)



ISSN : 2320-740X

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥**[1] इति ।

**व्याकरणाच्छक्तिग्रहो** यथा – धातु–प्रकृति–प्रत्ययादीनां अर्थविशेषेषु शक्तिग्रहो व्याकरणाज्ञायते । "भू सत्तायां" "डु पचष् पाके" इत्यादिना भू – पचादि धातूनां सत्ता–पाकाद्यर्थे, "वर्तमाने लट्" इत्यादिना लडादीनां वर्तमानकालाद्यर्थे शक्तिर्गृह्यते । बाधके सति क्वचित् त्यज्यते, तद्यथा "चैत्रः पचति" इत्यादौ "लः कर्मणि च भावे चाकर्मकेभ्यः" इत्यादिसूत्रेण आख्यातस्य कर्तृ–कर्म–भावाद्यर्थे शक्तिः प्रतिपादितास्ति । तत्र शक्यतावच्छेदकीभूतकृत्यादीनामानन्त्यात् गौरवमिति, कर्तृत्व–कर्मत्वादावेव आख्यातस्य शक्तिरङ्गीक्रियते नैयायिकैः ।

**उपमानाच्छक्तिग्रहः –** उपमानं सादृश्यज्ञानं, तेनापि शक्तिग्रहो जायते । यथा कश्चित् अज्ञातगवयपदार्थो नागरिकः "गोसदृशो गवयपदवाच्यः" इति आरण्यकपुरुषोपदेशानन्तरं अरण्ये कस्मिंश्चित् पशुविशेषे गोसादृश्यदर्शनान्तरं अयं गवयपदवाच्यः (गवयो गवयपदवाच्यः) इति गवयत्वावच्छिन्ने गवयपदस्य शक्तिं गृह्णाति तच्चोपमानात् ।

**कोशाद्यथा** – अमरकोश–मेदिनीकोशादिभिरपि पदानां शक्तिग्रहो जायते । तद्यथा – **पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः**[2] इति अमरवाक्येन डिम्भपृथुकादिपदानां शिशौ, **अरिष्टमशुभे तक्रे सूतिकागार आसवे। शुभे मरणचिह्ने च**[3] इति कोशवाक्येन अरिष्टशब्दस्य अशुभादौ च शक्तिरवधार्यते । यद्यपि अमरसिंहेन कोशे नीलादिपदानां गुणगुण्युभयवाचकत्वं (शक्तत्वं) प्रतिपादितं, "**गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति**[4]" इत्यादिना। तत्र गुणवाचकानां शक्लादिपदानां पुल्लिङ्गत्वं, गुणिवाचकानां च गुणिलिङ्गत्वमिति विवेचितम् । तथापि नीलादिपदानां नीलादिविशिष्टे शक्तिस्वीकारे अनन्तनीलरूपाणां शक्यतावच्छेदकत्वे गौरवभिया, नीलत्वजातेः शक्यतावच्छेदकत्वे लाघवात् नीलादिपदानां नीलादिरूपे एव शक्तिः, तद्विशिष्टे च लक्षणा इत्यङ्गीकृतं नैयायिकैः ।

**आप्तवाक्यात्च्छक्तिग्रहः** – 'प्रयोगहेतुभूतयथार्थज्ञानवान् आप्तः', **अनुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान् रागादिभिरपि नान्यथावादी यः, स आप्तः**[5] इति च आप्तलक्षणं प्रतिपादितम् । तादृशाप्तोच्चरितवाक्यात् श्रोतुः पुरुषस्य अर्थविशेषे पदविशेषस्य शक्तिज्ञानं जायते । यथा पिकशब्दवाच्यमजानन् कश्चित् आप्तोच्चरितात् 'पिकशब्दवाच्यः कोकिलः' इति वाक्यात् पिकशब्दस्य कोकिले शक्तिं गृह्णाति ।

---

[1] न्या.सि.मु.शब्दखण्डः

[2] नामलिङ्गानुशासनम् (१०६३)

[3] मेदिनी को. टान्तवर्गः (३३)

[4] अमरकोशः धीवर्गः (३११)

[5] चरकसंहिता


ISSN : 2320-740X

**व्यवहारतः शक्तिग्रहः** – शक्तिग्रहोपायेषु व्यवहारः मूर्धन्यं स्थानं भजते, प्रायः सर्वैरप्यनेनैव पदानामर्थविशेषेषु शक्तिग्रहणात् । **गामानयेति** प्रयोजकवृद्धोच्चरितवाक्यं श्रुत्वा प्रयोज्यवृद्धः गामानयति । समीपस्थश्च बालः प्रयोजकवाक्यं श्रुत्वा, प्रयोज्यस्य गमनं गवानयनं च दृष्ट्वा, प्रयोज्यपुरुषीयगवानयनरूपं कार्यं, प्रयोजकपुरुषोच्चरितगामनयेतिवाक्यप्रयोज्यं इत्यनुमाय, ततः "गां बधान" "घटमानय" "घटं नय" इत्यादिप्रयोजकवृद्धोच्चरितवाक्यादावापोद्वापाभ्यां (गोः आनयनबन्धनाभ्याम्, घटस्यानयननयनाभ्याम्) कार्यान्वितगवादौ शक्तिमवधारयति । अत्र प्रथमतः गवादिपदानां कार्यान्वितगवादौ शक्तिग्रहणेऽपि ततः 'कार्यान्वितगोत्वापेक्षया केवलगोत्वस्य शक्यतावच्छेदकत्वे लाघवम्' इति लाघवज्ञानसहकारेण गवादिपदं गवादिमात्रशक्तम् इति प्रत्यक्षोदयात् "गवादिपदं कार्यान्वितगवादौ शक्तम्" इति प्राक्तनानुमितौ अप्रामाण्योदयेन कार्यान्वितत्त्वस्य न शक्यतावच्छेदकत्वसम्भवः । अतः गवादिपदस्य गोत्वाद्यवच्छिन्ने एव शक्तिः सिध्यति, न तु कार्यान्वितगोत्वाद्यवच्छिन्ने इति भावः ।

**वाक्यशेषाच्छक्तिग्रहः** – वाक्यशेषो नाम शिष्टवाक्यम् । अवशिष्टवाक्यजन्यशाब्दबोधात् प्रकृतवाक्यघटाकपदानां स्वार्थे शक्तिग्रहो जायते इत्यर्थः । तद्यथा "यवमयश्चरुर्भवति" इत्यत्र यवपदस्य दीर्घशूकविशेषे शक्तिः इत्यार्याः, कङ्गौः शक्तिः इति म्लेच्छाश्च कथयन्ति । तत्र यवपदस्य कुत्र शक्तिः? इति विचिकित्सायां वाक्यशेषबलात् दीर्घशूके शक्तिर्निश्चीयते । "यवमयश्चरुर्भवति" इत्यत्र "यवविकारीभूतचरुभवनम् इष्टसाधानम्" इति शाब्दबोधः । तत्र वाक्यशेषः – **"यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमाना इवोत्तिष्ठन्ति"** ॥

**वसन्ते सर्वसस्यानां जायते पत्रशातनम् मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः**[1] ॥ इति

दीर्घशूकान्यसस्यानि यदा विपर्णानि शुष्कानि वृद्धिहीनानि च भवन्ति तदा एते यवाः दीर्घशूकविशिष्टाः मोदमानाः (सुपर्णाः आर्द्राः वृद्धिमन्तश्च) भवन्ति । अतो यवपदार्थः दीर्घशूक एवेति निश्चीयते ।

**विवृतेः शक्तिग्रहः** – विवृतिः विवरणम्, समानार्थकपदान्तरेण तदर्थकथनं विवरणम् । घटोऽस्तीति वाक्यस्य कलशोऽस्तीति विवरणेन घटपदस्य कलशे, पचतीत्यस्य पाकं करोतीति व्याख्यानात् पच् धातोः पाकत्वावच्छिन्ने, तदुत्तराख्यातस्य प्रयत्नत्वावच्छिन्ने च शक्तिरित्यनुमीयते ।

**प्रसिद्धपदसान्निध्याच्छक्तिग्रहः** – **'इह सहकारतरौ मधुरं पिको रौति'** इत्यत्र कोकिलनिष्ठासाधारण–धर्मवाचकपदसहचारज्ञानात् पिकादिपदानां कोकिलादौ शक्तिर्गृह्यते । अत्र माधुर्यं च पञ्चमादिस्वरत्वरूपम् । सहकारतर्ववच्छेदेन पञ्चमस्वरकर्मककूजनकर्ता कोकिल एव, नान्यः इति निश्चयात्, पिकशब्दवाच्यः कोकिल एवेति पिकपदस्य कोकिले शक्तिर्गृह्यते। एवं च व्याकरणादिना पदानामर्थविशेषेषु शक्तौ गृहीतायां सत्यां तादृश

[1] न्य.सि.मु.शब्दखण्डः


ISSN : 2320-740X

शक्तिज्ञानसहकृतपदज्ञानात् तत्तत्पदार्थोपस्थितिद्वारा आकांक्षा–योग्यता–सन्निधि–तात्पर्यादिज्ञानसहकारेण तत्तत्पदार्थसंसर्गावगाहि शाब्दबोधो जायते ।

"चैत्रो ग्रामं गच्छति" इत्यत्र ग्रामपदोत्तरद्वितीयायाः आधेयत्वरूपकर्मत्वमर्थः, तत्र निरूपितत्त्वसम्बन्धेन ग्रामपदार्थस्यान्वयः, आधेयत्वस्य चाश्रयतासम्बन्धेन गम्लृधात्वर्थैकदेशे उत्तरदेशसंयोगात्मकफले अन्वयः, धात्वर्थः उत्तरदेशसंयोगावच्छिन्नव्यापारः, तस्य चाख्यातार्थकृतौ अनुकूलत्वसम्बन्धेनान्वयः, कृतेश्च प्रथमान्तपदार्थे चैत्रे आश्रयत्वसम्बन्धेनान्वयः इति तादृशवाक्यात् "ग्रामनिरूपिताधेयताश्रयोत्तरदेश–संयोगावच्छिन्नव्यापारानुकूलकृत्याश्रयश्चैत्रः इत्याकारकः शाब्दबोधो जायते । असति बाधके प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्यैव नैयायिकैः सर्वत्राङ्गीकारात् ।

***

# पलभाविचारः

**डा रामकृष्ण पेजत्तायः**

सहायकाचार्यः(संविदा) ज्यौतिषविभागः

ज्योतिःशास्त्रे सिद्धान्तस्कन्धे त्रिप्रश्नाधिकारे प्रसक्तोऽयं विषयः । दिग्देशकालाः किल त्रयः प्रश्नाः । तत्र देशज्ञानेऽपेक्षिता भवति पलभा । वस्तुतो देशज्ञाने मुख्यं साधनं भवति अक्षांशः । पलभाशब्दस्य अक्षसम्बन्धिनी छाया इत्यर्थः । अक्षांशानां पलभायाश्च मिथः सम्बन्धो वर्तते । यथा यथा पलभा वर्धते तथा तथा अक्षांशा अपि आधिक्यमुपयान्ति । एवमनयोर्मिथः सम्बन्धमवलोक्य तयोरन्यतरस्य ज्ञानेनेतरस्य ज्ञानमित्युपायोऽपि समाश्रितः शास्त्रज्ञैः । राशीनां स्वदेशीयोदयासुज्ञानेऽपि पलभाऽनिवार्या । यतस्तत्रावश्यकानि चरखण्डानि पलभाधीनानि । एवं बहुषु विषयेषु आवश्यकी भवति पलभा । तस्मात् तज्ज्ञानोपायः प्रोक्तः सर्वैरपि सिद्धान्तप्रणेतृभिः । परञ्च तत्र मतिमतां मतभेदोऽपि गोचरीभवति । तस्मात्तत्समीक्षां विधाय युक्तायुक्तत्वं विवेचयितुं प्रवृत्तोऽयं प्रयासः ।
तत्रादौ श्रीपत्युक्तं प्रकारमीक्षामहे –

**अजतुलादिगतस्य विवस्वतो दिनदलप्रभयोर्युतिरर्धिता ।**
**भवति वैषुवती निजदेशजा तदिनवर्गयुतेश्च पदं श्रुतिः ॥**[1] इति ।

रवौ[2] मेषादिगते तुलादिगते च सति मध्याह्नकाले द्वादशाङ्गुल–शङ्कोश्छायामालोक्य, ते उभे छाये योजयित्वा, अर्धं कार्यम् । तदानीं स्वदेशीया पलभा भवतीत्यर्थः ।

श्रीपत्युक्तोऽयं विधिः प्रसिद्धेभ्यो विलक्षणः । तथा च सूर्यसिद्धान्ते –

---

[1] सि.शे. ४–६९

[2] यद्यपि सायनरवौ इति वक्तव्यम् । परन्तु ग्रन्थेऽस्मिन् क्वापि अयनांशग्रहणं नास्ति ।



ISSN : 2320-740X

**एवं विषुवती छाया स्वदेशे या दिनार्धजा । दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा ॥**[1] इति ।

ग्रहलाघवे च –

**मेषादिगे सायनभागसूर्ये दिनार्धजा भा पलभा भवेत्सा ॥**[2]

इति चैवं प्रायः सर्वत्र 'रवौ मेषादिगे तुलादिगे वा सति मध्याह्नकाले द्वादशाङ्गुलशङ्कोश्छाया पलभा' इत्युक्तम्। इयमेव परिभाषा प्रक्रिया च प्रथिताधुना ।

इत्थं श्रीपत्युक्तो विधिरन्येभ्यो विलक्षण इति सिद्धम् । परन्त्वसौ विधिरनेन लल्लमनुसृत्य दर्शितः । तथा च लल्लः –

**भानौ गते क्रियतुलादिमहर्दले ये छाये तयोर्युतिदलं विषुवत्प्रभा स्यात् ॥**[3]

– इति भानौ क्रियतुलादिं मेषादिं तुलादिं च गते अहर्दले मध्याह्नकाले ये छाये तयोः युतिदलं योगस्य अर्धं विषुवत्प्रभा पलभा स्यात् इत्याह ।

द्वितीयार्यभटस्य महासिद्धान्तेऽपि अयमेव विधिर्विहितः । तथा च –

**अयनांशसंस्कृत इने गोलादिस्थे दिनार्धभे ये स्तः । तद्योगार्धं विषुवच्छाया ॥**[4] इति ।

द्वितीयार्यभटलल्लश्रीपतिभिः कृतं विलक्षणविधानं किमर्थमिति ज्ञेयं चेदादावुपपत्तिर्विलोक्या । अत्र हि रवौ मेषादिगे तुलादिगे च सत्येव पलभार्थं छाया अतो दृश्यते, यतो यदा मध्याह्ने रविर्विषुवद्वृत्तस्थो भवति तदानीन्तनच्छायाया एव पलभात्वम्। परन्त्विदमपि किञ्चिदन्तरितं भवति । यतो हि यदि मध्याह्न एव विषुवसङ्क्रान्तिस्तर्हि तस्मिन् मध्याह्ने रविर्विषुवद्वृत्ते भवेत् । मध्याह्नादन्यस्मिन् काले यदि सङ्क्रान्तिः स्यात् तर्हि मध्याह्नकाले ईषत् क्रान्तिसम्भवाद् रविः विषुवद्वृत्तात् किञ्चिदन्तरितो भवति । तस्मात्तदानीन्तनच्छायया प्राप्ता पलभापि ईषदन्तरिता भवत्येव । परन्तु गत्यन्तराभावाद् इयमेव ग्राह्या। अस्या अपि सूक्ष्मत्वसम्पादनार्थं विधिरसावुपात्तो लल्लादिभिः । तथा च मेषादिगे तुलादिगे च रवौ प्राप्तयोः छाययोः योगः अर्धीक्रियते चेत्सूक्ष्मत्वं सिद्ध्यति । अतस्तथा कार्यमिति लल्लादयो विधिमित्थं प्रोचुः ।

अनयोपपत्त्या लल्लादीनां मतं युक्ततरमिति भाति । परन्त्वत्र वर्तते काचित् विसङ्गतिः । कल्प्यतां कस्मिंश्चिद् दिने मध्याह्नासन्नकाले मेषसङ्क्रान्तिर्जाता । ततः षण्णां मासानामनन्तरम् उषःकाले तुलासङ्क्रान्तिः भवति । उभयोरपि दिनयोः माध्याह्निकी छाया योजयित्वा अर्धीक्रियते चेत् लब्धिः पलभा (लल्लादिमतेन) । किञ्च युक्त्या विचार्यते चेत् अनेन पलभा स्थूलैव जाता न तु सूक्ष्मा । यतो हि मेषादिगे रवौ प्राप्तायाः छायायाः सूक्ष्मत्वं वर्तते

---

[1] सू.सि. ३–१२

[2] ग्र.ला. २–५

[3] शि.धी.वृ. ३–४

[4] म.सि. ४–३



ISSN : 2320-740X

मध्याह्नासन्नकाले एव सङ्क्रान्तिसत्त्वात् । तुलादिगे रवौ तु प्राप्तायाः छायायाः स्थूलत्वमेव यतस्तदा सङ्क्रान्तिमध्याह्नाद् दूरवर्तिनि काले जाता । अतोऽनयोः प्रथमैव सूक्ष्मा । उभयोर्योगार्धं स्थूलतायै कल्पत इत्येव सिद्धम् । तस्मादेव कारणात् परवर्तिभिरपि गणकैरसौ विधिर्नैवादृतः । श्रीपतिरपि भ्रमेणैतन्मतं स्वीचकारेति भाति । परेषां मते तावत् पूर्वप्रपञ्चितयुक्त्या यदन्तरं भवति तत् स्वल्पत्वादुपेक्षितमिति समाधेयम् ।

वस्तुतस्तु मेषादिगे तुलादिगे वा रवौ यदा मध्याह्ने मध्याह्नासन्नकाले वा सङ्क्रान्तिः तद्दिवसीया माध्याह्निकी छाया पलभेति निर्णयोऽधिकं सङ्गतो भवति इति मामकीना मतिरिति शम् ।

***

# प्रामाण्योत्पत्तौ परतस्त्वसमर्थनम्

**श्री आर्. नवीन्**

सहायकाचार्यः(संविदा) न्यायविभागः

प्रमा स्वतः उत्पद्यते इति मीमांसकाः, परतः इति नैयायिकाः । अयमर्थः – मीमांसकनये प्रमा ज्ञानसामान्यकारणीभूताऽत्ममनसंयोगजन्यैवेति । अप्रमा तु ज्ञानसामान्यकारणातिरिक्तदोषजन्येति । तथा च प्रमायाः ज्ञानसामान्यहेतुजन्यत्वं ज्ञानसामान्यहेतुभिन्नहेत्वजन्यत्वरूपं वा उत्पत्तौ स्वतस्त्वम् इति मीमांसकसिद्धान्तः ।

नैयायिकास्तावत् यथा अप्रमायाः ज्ञानसामान्यहेत्वतिरिक्तदोषजन्यत्वेन उत्पत्तौ परतस्त्वं, तथा प्रमायाः ज्ञानसामान्यकारणातिरिक्तगुणजन्यत्वेन परतस्त्वं इति मन्यन्ते । इदानीं न्यायकुसुमाञ्जलिग्रन्थोक्तदिशा प्रमायाः उत्पत्तौ परतस्त्वमुपपाद्यते । तथा हि, **प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत्**[1] इत्यनुमानेन प्रमासामान्यस्य ज्ञानहेत्वतिरिक्तहेत्वधीनत्वरूपं परतस्त्वं सिद्ध्यति ।

दृष्टान्ते अप्रमायां कार्यत्वे सति ज्ञानविशेषत्वरूपहेतुसत्वात् ज्ञानसामान्यहेत्वतिरिक्तदोषजन्यत्वं यथा सिद्धं तथा प्रकृते प्रमायाः गुणजन्यत्वमिति समन्वयः ।

अथानुमानेऽस्मिन् दृष्टान्तासिद्धिः बाधो वेत्याशङ्का । तथाहि दृष्टान्ते अप्रमायां अप्रमात्मकज्ञानहेतुभूतदोषजन्यत्वस्य सत्वात् तदतिरिक्तहेतुजन्यत्वविरहात् दृष्टान्तासङ्गतिः । एवं पक्षीभूतप्रमायां प्रमात्मकज्ञानहेतुभूतगुणजन्यत्वस्य सत्वात्, तदतिरिक्तहेतुजन्यत्वस्य विरहात् बाधः इति । अतः ज्ञानहेत्वतिरिक्तहेत्वधीनत्वं नाम प्रमाऽप्रमोभयनिरूपितकारणतावद्भिन्नकिञ्चित्कारणजन्यत्वमित्यर्थः । तथा च ज्ञानसामान्यकारणतावत् आत्ममनस्संयोगादिकं तद्भिन्नगुणजन्यत्वं प्रमायाः इति प्रामाण्योत्पत्तेः परतस्त्वं सिद्धम् ।

तत्र प्रत्यक्षप्रमायां कारणीभूतगुणः विशेषणविशिष्टविशेष्येण समं इन्द्रियसन्निकर्षः । अनुमितिप्रमायां व्यापकवति व्याप्यज्ञानम्, उपमितौ च यथार्थसादृश्यज्ञानं, शाब्दबोधे च यथार्थयोग्यताज्ञानम् इति ।


ISSN : 2320-740X

अत्र यदि प्रमायाः उत्पत्तौ परतस्त्वं न स्वीक्रियते तर्हि अप्रमायाः अपि ज्ञानसामान्यहेत्वधीनत्वात् तस्याः अपि उत्पत्तौ परस्त्वं न स्यात् । अतः यथा अप्रमाजनने ज्ञानसामान्यकारणातिरिक्तासाधारणकारणं दोषः, तथेह प्रमाजनने असाधारणं कारणं गुणः इति सिद्धम् ।

अत्र प्रमायाः उत्पत्तौ परतस्त्वसाधकानुमाने **प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात्** इत्यत्र हेतुकोटौ कार्यत्वदलानुपादाने ईश्वरज्ञानान्तर्भाविण व्यभिचारः । तद्वारणाय कार्यत्वोपादानम् । ज्ञानविशेषत्वदलानुपादाने घटादौ व्यभिचारः । तद्वारणाय तद्विशेषत्वदलोपादानम् ।

ननु परमते (मीमांसकमते) ईश्वरतज्ज्ञानादीनां असिद्धत्वात्, ईश्वरज्ञानाद्यन्तर्भाविण व्यभिचाराप्रसक्त्या कार्यत्वदलोपादानं व्यर्थमिति चेत् न, अप्रयोजकशङ्कावारणाय कार्यत्वदलोपादानम् । तथा हि कार्यत्वदलानुपादाने, पक्षे ज्ञानविशेषत्वमस्तु साध्यं मास्तु इति अप्रयोजकशङ्का स्यात् । न्यायनये ज्ञानानित्यत्वस्य सिद्धान्तितत्वात् तद्विरोधः स्यात् ।

**प्रमायाः दोषाभावाधीनत्वशङ्कानिरासौ[२] :-**

एतावता निरुक्तानुमानेन प्रमायाः गुणजन्यत्वं साधितम् । तत्र ज्ञानसामान्यकारणातिरिक्तगुणजन्यत्वं मास्तु, अप्रमायाः दोषसहकृतज्ञानसामान्यकारणजन्यत्वं, तदसहकृतज्ञानसामान्यकारणजन्यत्वं प्रमायाः इत्येवं उपगम्यतामिति । अयं भावः अप्रमायां हेतुः दोषः, प्रमायां तु दोषाभावः हेतुः इति ।

तन्न, सर्वत्र अप्रमाहेतुभूतस्य दोषस्य भावत्वासम्भवात् । तथा हि – क्वचित् संशयादौ विशेषादर्शनादिरूपः अभावोऽपि दोषः, तदभावः विशेषदर्शनादिः प्रमायां हेतुः इति सिद्धम् । तथा च प्रमायां क्वचित् भावस्यापि हेतुत्वोपगन्तव्यत्वात् दोषाभावः प्रमायां हेतुः इति अनुपपन्नमिति भावः ।

अपि च प्रमायां गुणः, अप्रमायां गुणाभावः कारणमित्युपगन्तव्यम् उत अप्रमायां दोषः प्रमायां दोषाभावः कारणमित्युपगन्तव्यमित्यत्र विनिगमनाविरहेण परिशेषात् प्रमायां गुणः, अप्रमायां दोषः कारणमित्येवं सिध्यति ।

१. प्रमायाः परतन्त्रत्वादिति कारिका पृ. ७४ न्या.कु.

२. पृ.७५, न्या.कु.

***


ISSN : 2320-740X

# जिज्ञासाधिकरणभाष्यस्य रत्नप्रभा – न्यायनिर्णयव्याख्यानयोः तुलना

**डा. श्रीकरः जी. एन्**

सहायकाचार्यः(संविदा) वेदान्तविभागः

अधिकरणेऽस्मिन् चत्वारि वर्णकानि विद्यन्ते । व्याख्यानद्वयेऽपि चत्वारि वर्णकानि संक्षेपविस्तराभ्यां वर्णितानि । **'युष्मदस्मत् प्रत्ययगोचरयोः'** इत्यारभ्य **'यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः'** इत्यन्तम् अध्यासभाष्यं प्रथमवर्णकम् । इदं चतुरध्यायात्मकं शारीरकमीमांसाशास्त्रं पूर्वतन्त्रे गतार्थम् । जैमिनिप्रणीतद्वादशलक्षण्यां वेदवाक्यानां विचारः कृतः, उपनिषद्वाक्यानामपि साक्षात् परम्परया वा तत्रैव तात्पर्यमिति षोडशाध्यायात्मकम् एकं शास्त्रम् अतः पृथक् शास्त्रारम्भो नोचित इति शङ्कानिराकरणाय द्वितीयं वर्णकम् – **'व्याचिख्यासितस्य इदमादिमं सूत्रमिति'** भाष्यमत्र निदानम् । धर्मब्रह्मणोः लक्षणतः, स्वरूपतः प्रमाणतः फलतश्च भेदात् भगवता बादरायणेन सूत्रात्मना पृथक्तया शास्त्रमिदं प्रणीतम्। अतः तत्पथानुगामिना भाष्यकारेण व्याचिख्यासितमिदं शास्त्रम् । पृथक् शास्त्रत्वेऽपि अधिकारिणः अभावात् शास्त्रं नारम्भणीयमिति शङ्कापरिहाराय तृतीयं वर्णकम् **'अथातो ब्रह्मजिज्ञासा'**[1] इति । गुरुमुखात् वेदान्ताध्ययनकाले ब्रह्म प्रसिद्धमप्रसिद्धं वा, अत्यन्तप्रसिद्धस्य अप्रसिद्धस्य वा विचारो न घटते । सन्दिग्धं सप्रयोजनमेव जिज्ञास्यमतः ब्रह्मजिज्ञासा न सम्भवतीति आक्षेपे सति – अत्र श्रुतिषु सूत्रेषु च सद्ब्रह्मात्मादिशब्दानामसकृद् प्रयोगात् अस्ति कश्चन अर्थः तेषाम् । चेतनोहमस्मीति लौकिकानुभवाच्च सामान्यतः आत्मज्ञानमस्ति। देहेन्द्रियमनोबुद्धिषु तदतिरिक्तेषु च विषयेषु ब्रह्मशब्दस्य आत्मशब्दस्य वा विदुषां विप्रतिपत्तिः जागरूकत्वात्, साक्षात्कारज्ञानस्यैव मोक्षोपयोगित्वात्, सामान्यतः ज्ञानं विशेषतः अज्ञानं च सम्भवतीत्यतः शास्त्रमारम्भणीयमिति चतुर्थवर्णकस्य सारः ।

**'अथातो ब्रह्मजिज्ञासा'** इति त्रिपदात्मकं सूत्रम् । 'अथ' 'अतः' 'ब्रह्मजिज्ञासा' इति पदच्छेदः । आदौ 'अथ' शब्दार्थो विचार्यते । **'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ'**[2] इति 'अथ'शब्दः नानार्थकः । प्रकृते अनेन सूत्रेण शास्त्रमिदमारभ्यते, यथा **'अथ योगानुशासनम्'**[3] इत्यादिषु 'अथ'शब्दः आरम्भार्थकः तद्वदिहापि इति प्राप्ते– **'अथ' शब्दः आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः'** इत्युक्तं भाष्ये । अस्य भाष्यस्य व्याख्यानावसरे रत्नप्रभायां द्विधा विकल्पः कृतः । अत्र 'अथ'शब्दस्य जिज्ञासापदेन अन्वयः । 'ज्ञा' धातोः इच्छार्थक 'सन्' प्रत्यये जिज्ञासा इति रूपसिद्धिः । ज्ञातुमिच्छा जिज्ञासा । इच्छा इति वाच्यार्थः। विचार इति लक्ष्यार्थः । तथा च 'अथ'शब्दस्य वाच्यार्थेन सह अन्वय उत लक्ष्यार्थेन सह इति विकल्पद्वयम् । वाच्यार्थेन अन्वये ज्ञानेच्छा आरभ्यत इति सूत्रार्थः

---

[1] ब्र.सू.१/१/१

[2] अ.को. १४४८

[3] यो.सू.१/१



ISSN : 2320-740X

स्यात् किन्तु इच्छायाः आरब्धुमशक्यत्वात् उत्तरत्र प्रत्यधिकरणम् इच्छायाः अविचार्यमाणत्वाच्च नाद्यः । नापि द्वितीयः – लक्ष्यार्थेन अन्वये ब्रह्मविचार आरभ्यत इति भवति । अत्र श्रुतिसमानतासम्पादनाय शास्त्रत्वसम्पादनाय च कर्तव्यमिति पदमध्याहर्तव्यम् । ब्रह्मविचारः कर्तव्य इति । तदा कर्तव्यपदेनैव आरम्भार्थे सिद्धे सूत्रघटितारम्भार्थकमथेति पदं निष्फलं भवति । अतः 'अथ'शब्दस्य आरम्भार्थः न युक्त इति ।

न्यायनिर्णये तु पूर्वोक्तभाष्यपङ्क्तेः व्याख्यानावसरे त्रेधा विकल्पः समुद्भावितः । ब्रह्मज्ञानेच्छा आरभ्यते वा ब्रह्मविचारो वा ब्रह्मज्ञानं वा इति विकल्पत्रयम् । कृत्यसाध्यत्वात् प्रत्यधिकरणम् इच्छायाः अविचार्यत्वाच्च न प्रथमो विकल्प: घटते । न द्वितीयः – केवलविचारस्य आरम्भार्थकत्वे अधिकारिणः सद्भावाभावात् शास्त्रारम्भो न सिध्यति। अतः अध्याहृतेन कर्तव्यपदेन विचारारम्भे सिद्धे 'अथ'शब्द आनन्तर्यार्थक: अधिकारिसिद्धिपरश्च। नापि तृतीयः – ब्रह्मज्ञानस्य आरम्भार्थत्वं न युज्यते, नित्यत्वात् । अपि च ज्ञानस्य कृतिसाध्यत्वाभावात् ब्रह्मस्वरूपत्वाच्च प्रकृतवाक्यगत 'अथ'शब्देन सह सम्बन्धाभावात् तस्य अनारभ्यत्वम् । एवमत्र त्रिधा विकल्प्य दूषणं कृतम् ।

'अथ'शब्दस्य मङ्गलार्थत्वनिराकरणे न्यायनिर्णये विशेषः दृश्यते । मङ्गलार्थस्वीकारे ब्रह्मजिज्ञासा मङ्गलस्वरूपा इति सिध्यति । तदानीं स्तुतिपरमिदं सूत्रं स्यात् । स्तुतिनिन्दान्यतरवाक्यमर्थवाद इति मीमांसकानां मर्यादा । शासकस्य सूत्रस्य केवलस्तुतिपरत्वं न युज्यते । यत् स्तूयते तद्विधीयत इति न्यायेन स्तुतत्वादेव ब्रह्मजिज्ञासा विधीयत इति स्वीकारे सूत्रस्य आर्थिकत्वमुक्तं भवति । तेन साक्षात् विधायकत्वं न सिध्यति । अपि च ब्रह्मजिज्ञासा मङ्गलरूपा इति वचनान्तरेणापि सिध्यति। **मङ्गलानां च मङ्गलम्'** इति । अतः आनन्तर्यार्थे प्रयुक्तः 'अथ' शब्दः श्रवणमात्रेण मङ्गलप्रयोजनो भवति ।

एवम् 'अथ'शब्दः आनन्तर्यार्थक इति साधितम्| कस्मादनन्तरमिति जिज्ञासायां स्वाध्यायानन्तर्यमिति प्राप्ते– धर्मब्रह्मणोः वेदैकगम्यत्वात् उभयोः जिज्ञासयोः वेदाध्ययनानन्तर्यं समानम् । अतः तस्य साधारणकारणत्वे पुष्कलकारणत्वं न सम्भवति इति तन्निराकृतम् । अनन्तरं भाष्यं भवति **'कर्मावबोधानन्तर्यं विशेषः'** इति ।

रत्नप्रभायामस्य वाक्यस्य अवतरणिकायां **'संयोगपृथक्त्वन्यायः'** उद्धृतः । **'खादिरे पशुं बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्वीत'** इत्यत्र वीर्यकामनायां सत्यां खादिरं क्रत्वर्थं पुरूषार्थमुभयं भवति अन्यथा केवलक्रत्वर्थं, तथैव **'चमसेनापः प्रणयेत्' 'गोदोहनेन पशुकामस्य'** इति अपः प्रणयनं क्रत्वङ्गमपि भवति । सत्यां कामनायां गोदोहनपात्रेण आनीताः पुरुषार्थमपि भवन्ति| एवं विहितानां नित्यनैमित्तिककर्मणामनुष्ठाने दुरितनिवृत्तिः सिध्यति । विविदिषायां सत्यां चित्तशुद्धिः, नित्यानित्यवस्तुविवेकादिसम्पादनद्वारा ब्रह्मज्ञानार्थमपि भवति । तथा च श्रुतिः **'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन'**[1] इत्यादि । स्मृतिश्च **'यज्ञो दानं तपश्चैव पावनानि**

[1] बृ.उ.४/४/२२


ISSN : 2320-740X

**मनीषिणाम्**'[1] इत्यादि । भाष्यपङ्क्तेः अयमभिप्रायः रत्नप्रभायां प्रतिपादितः । विचारोऽयं भामती–कल्पतर्वादिषु विशदीकृतः । अस्य परिहारस्तावत् धर्मजिज्ञासायाः अथवा धर्मजिज्ञासायामुपयुक्तानां न्यायानां वा कर्मानुष्ठानस्य वा ब्रह्मजिज्ञासायां नात्यन्तमपेक्षितत्त्वम् । यद्यपि धर्मानुष्ठानजनितं चित्तशुद्ध्यादिकमपेक्षितम् । तच्च इह जन्मनि वा जन्मान्तरे वा अनुष्ठितकर्मवशात् सिध्यति । अतः जन्मान्तारानुष्ठितपुण्यपरिपाकविशेषवतः पुरुषस्य धर्मजिज्ञासयाः प्रागपि ब्रह्मजिज्ञासा सम्भवति । तस्मात् कर्मावबोध अधिकारिलक्षणं न भवति । अत एव श्रुतिः '**ब्रह्मचारी गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्**'[2] इति क्रमं प्रदर्श्य '**ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा**'[3] इति विकल्पं प्रदर्शयति। अपि च धर्मब्रह्मजिज्ञासायोः व्याप्यव्यापकभावो वा साक्षात् कार्यकारणभावो वा नास्ति । तस्मात् साधनचतुष्टयसम्पत्तिरेव आनन्तर्यावधित्वेन विवक्षित इति । विचारोऽयं न्यायनिर्णये नास्ति। सूत्रघटित 'अत' शब्दः हेत्वर्थः । साधनचतुष्टयसम्पत्तिः न सम्भवतीत्याक्षेपे तन्निराकरणाय सूत्रे 'अत' शब्दः प्रयुक्तः । आक्षेप्तुः अयमभिप्रायः – '**अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्**'[4] इत्यादि श्रुत्या कर्मफलस्य स्वर्गस्य नित्यत्वश्रवणात् ब्रह्म नित्यं तदन्यदनित्यमिति नित्यानित्यवस्तुविवेकः न भवितुमर्हति । न च कृतकत्वादिहेतुना स्वर्गस्य अनित्यत्वसिद्धिः । 'स्वर्गः अनित्यः कृतकत्वात्' इत्यनुमानं ध्वंसे व्यभिचरितम् । तस्य कृतकत्वेऽपि अनित्यत्वाभावात् । अकृतकत्वस्यापि नित्यत्वाहेतुत्वं प्रागभावे व्यभिचारात् । एवं च नित्यानित्यवस्तुविवेकासिद्धौ उत्तरेषां साधनानामसिद्ध्या अधिकार्यभावात् शास्त्रं नारम्भणीयमिति आक्षेपे तन्निरासाय न्यायनिर्णये '**यावद्विकारं तु विभागः**' इति न्याय उद्धृतः । यद्विकरं तद्विभक्तं यद्विभक्तं तद्विकारमिति व्याप्त्या आत्मातिरिक्तस्य सर्वस्यापि परिच्छिन्नत्वम्, अनित्यत्वम्, मिथ्यात्वञ्च सिध्यति । '**अतोऽन्यदार्तम्**'[5] इति श्रुतिरपि अत्र प्रमाणम् । '**तद्यथेह कर्मचितो लोकः क्षीयते । एवमेवामुत्र पुण्यलोकः क्षीयते** '[6] इति श्रुतिः सयुक्तिकं सदृष्टान्तं च स्वर्गादीनामनित्यत्वं बोधयति । अतः '**अक्षय्यं ह वै**' इत्यादि श्रुतयः दुर्बलत्वात् जघन्यां वृत्तिं भजन्ते। तस्मात् नित्यानित्यवस्तुविवेकादिसम्भवात् शास्त्रारम्भं समर्थयितुं हेतुप्रतिपादकः 'अत' शब्द इति ।

एवं व्याख्यानद्वयेऽपि तत्तत्प्रसङ्गानुरोधेन पूर्वमीमांसान्यायानां भाष्याशयावबोधाय समुद्धरणं दृश्यते ।

***

[1] भ.गी.१८/५

[2] जा.उ.४

[3] जा.उ.४

[4] आ.ध.२/१/१

[5] छा.उ.७/२४/१

[6] छा.उ.८/१/६



ISSN : 2320-740X

# वैदिकतत्वानां वैज्ञानिकदृष्ट्या अवलोकनम्

मूललेखनम् – डा.डि.एन्.होळ्ळा
ISRO Scientist (निवृत्तः)
अनुवादः – **डा.विनायकरजतभट्टः,** सहायकाचार्यः(संविदा)

अयं लेखः अनुभारतीयसंस्कृतिं वैदिकविचाराणाम् आधुनिकविज्ञानदिशा व्याख्यातुं कश्चन प्रयत्नः । अस्माकं पूर्वजाः तत्त्ववेत्तारः विज्ञानिनः महर्षयः प्रत्येकमपि जीवस्य आध्यात्मिकोत्कर्षद्वारा परमपुरुषार्थस्य मोक्षस्य साधनाय आविष्कृताः वैदिकविचारधाराः अस्मान् समबूबुधन् । ते च महर्षयः निरवधिकानवरतसुदीर्घतपोध्यानपरा प्रबलसिद्धिद्वारा आध्यात्मिकीमन्तर्दृष्टिमवाप्नुवन् । सेयमन्तर्दृष्टिः जीवनस्य विविधमुखानि तेषाम् आन्तरङ्गिकसम्बन्धञ्च विशदीकरोति । आध्यात्मिकान्तर्दृष्ट्यैकगोचराणां वैदिकसंस्कृतेः मूलभूततत्त्वानां वैज्ञानिकदृष्ट्या निरूपणं सामान्यतः दुश्शकमेव, तेषां दुरवगमत्वात् । तत्त्वानां नितरां सूक्ष्मत्वात् परिशीलनसमर्थस्य मानदण्डस्यानुपलब्धत्वाच्च ।

अत्र कश्चन प्रयासो विहितः । केषाञ्चन वैदिकसिद्धान्तानां मूलभूततत्त्वस्य अत्याधुनिकवैज्ञानिकतन्त्रज्ञानमवलम्ब्य निरूपणाय । भौतिकाध्यात्मिकज्ञानयोः महदान्तर्यं वर्तते । भौतिकविज्ञानं हि प्राधान्येन भौतिकप्रपञ्चमाश्रयते । भौतिकवस्तु /भौतिकसिद्धान्तः वैज्ञानिकोपकरणैः परिशीलयितुं शक्यते, आध्यात्मिकज्ञानं तु नैवम् । यतः आध्यात्मिकविज्ञानं भौतिकप्रपञ्चात् अतिक्रान्तम् । तत्त्वानि वैज्ञानिकोपकरणानां सिद्धान्तानां नियमानां वा गोचरतां न यान्ति । तथापि वैज्ञानिकनिरीक्षणानि आध्यात्मिकसिद्धान्ततत्त्वावगमने उपकृत्य तत्र विश्वासं वर्धयन्ति ।

आधुनिकविज्ञानस्य वैदिकतत्त्वेषु प्रभावचिन्तने अयं लेखः प्रबोधकः स्यात् । अत्र हि केषाञ्चन आध्यात्मिकतत्त्वानाम् अवगमनार्थं वैज्ञानिकतरङ्गप्रसारणतन्त्रम् (Antenna) उपयुज्य अस्माकम् ऋषिभिः जीवने अनुपाल्यमानांशानादाय आध्यात्मिकविचाराणां निगूढं तत्त्वमाविष्कृतम् इति निरूप्यते ।

प्रसारणतन्त्रं हि विद्युतं विद्युत्कान्तीयक्षेत्रे परिणमय्य आकाशे तरङ्गरूपेण प्रसारयति/सङ्क्रामयति, तद्विपरीतञ्च व्यवहरति । प्रसारणतन्त्रं द्विविधम् – प्रसारकं ग्राहकञ्चेति । प्रसारकतन्त्रं विद्युतं विद्युत्कान्तीयक्षेत्रं सङ्गृह्य विद्युद्रूपेण परिणमयति। अतः दूरदर्शनकार्यक्रमाः, चलद्दूरवाणी, प्रसारव्यवस्था (broadcast) ग्राहकक्षेत्रादिषु विविधेषु सम्पर्कमाध्यमेषु अस्योपयोगो दरीदृशीति । प्रसारणतन्त्रस्योपयोगः विविधानुप्रयोगाननुसृत्य तिष्ठति । प्रसारणतन्त्रस्य कश्चन प्रधानः भागः भवति probe (काचित् शलाका/ एषणी) इति, यश्च तरङ्गप्रसारकतन्त्रे विद्युतं विद्युत्कान्तीयक्षेत्रे विपरिणमयति, तरङ्गग्राहकतन्त्रे तद्विपरीतमनुतिष्ठति । Probe इत्येतत् सम्पर्कमाध्यमस्य आदिर्वा अन्त्यो वा अवयवः भवति । विद्युत्प्रवाहविद्युत्कान्तीयक्षेत्रयोश्च सम्बन्धोपपादनाय कश्चित्


ISSN : 2320-740X

गणितीयसमीकरणसिद्धान्तः उपयुक्तः । स च सिद्धान्तः मेक्सवेल्–समीकरणसिद्धान्तः इति प्रसिद्धः। वैदिकसंस्कृतौ अनुस्यूततया पाल्यमानेषु सम्प्रदायेषु अज्ञाततत्त्वानां तत्त्वनिरूपणाय अयं सिद्धान्तः उपयुज्यते ।

अस्माकं शरीरे मानसतरङ्गैः , आहारशक्त्या, बाह्यतरङ्गादिभिः उत्पद्यमाना काचिदूर्जा विद्यते । एताः ऊर्जाः अस्माकं शरीरे काञ्चित्शरीरव्यापिनीं विद्युदमुत्पादयन्ति । बाह्याकाशस्थितैः सह सम्पर्कः तद्विपरीतञ्च शरीरस्थितविविधप्रसरणतन्त्रैः सञ्जायते । ते च यथा शिरः, हस्तौ, पादौ च । एते त्रयः शरीरावयवाः बाह्यप्रपञ्चसम्पर्के विशिष्टं स्थानं वहन्ति । ते हि शरीरस्य प्रसारणतन्त्रे probe (शलाका/एषणी) इत्यस्य कार्यं कुर्वन्ति । प्रायः अनुभूयते यत् इमानि अङ्गानि सर्वस्यापि कायस्य अन्त्यभागाः भवन्ति, यानि च बाह्यप्रपञ्चैः सह सम्पर्कं कल्पयन्ति ।

मानवशिरः तच्छरीरस्य प्रमुखमङ्गं भवति, यच्च शारीरकस्य विविधानि कर्माणि अनुतिष्ठन्ति ।

यथा – सङ्ग्रहः , चिन्तनं , शासनञ्चेत्यादि । इदं शिरः प्रसारणं ग्रहणञ्च उभयविधस्य प्रसारणतन्त्रस्य कार्यं निर्वहति। प्रसारणतन्त्ररूपेणेदं मानसतरङ्गान् बाह्याकाशे प्रसारयति । ग्राहकतन्त्रत्त्वेन च जगत्सम्बन्धि शक्तिं बाह्याकाशादथवा प्रपञ्चात् गृह्णाति । बाह्यप्रपञ्चात् तरङ्गाणां विभिन्नरूपेण ग्रहणार्थमत्र शिरसि इन्द्रियरूपोपकरणानि विद्यन्ते तानि यथा – नेत्रे, कर्णौ , नासिका, आस्यमित्यादि । शिरसः स्थानस्वरूपादि प्रसारणग्रहणादिषु महत्साहय्यमाचरति । यथा अस्य गोलाकारस्वरूपं बाह्यतरङ्गान् सर्वतः अपि सङ्ग्रहणे तथा तरङ्गान् बाह्याकाशे सर्वतः अपि प्रसारणे । अयमेव सिद्धान्तः भारतीयदेवालयानां शिखरभागस्य निर्माणे आदृतो विद्यते । देवालयस्य शीर्षभागस्य सम्मितीयगोलाकारः सर्वतोऽपि समानरूपेण दिव्यतरङ्गान् सङ्गृह्णाति । एतदेव खलु कारणं भवति यदिष्टदेवालये प्रवेशे सति मनुष्यः मनसि दिव्यानन्दस्य दिव्यशान्तेः वा अनुभवं प्राप्नोति। शिरसः प्रसारणतन्त्रसामर्थ्यं केशाधिक्येन वरीवृधीति । इदञ्च प्रसिद्ध्यति यत् अवतारपुरुषाणाम् ऋषीणां विभूतीनां केशराशिः महानस्ति इति । एतच्च साहायकं भवति बाह्याकाशतरङ्गसम्पर्कस्य सुलभप्रसारणे ग्रहणे च । इदञ्च प्रसिद्ध्यति यत् अन्यैः वर्णैः तुलनायां कृष्णशरीरं सर्वविधतरङ्गाणां सारल्येन प्रसारणं ग्रहणञ्च करोतीति ।

हस्तपादमिति प्रसारणतन्त्रं शरीरगतविद्युतः बाह्यप्रपञ्चे प्रसारणे उपयुज्यते । अयं विचारः नित्यक्रियाकलापेषु दृक्ष्यत एव । अस्माकं कायस्य नाडीप्रपञ्चः पाणिपादस्य मूलभागे समाप्तिमेति । अत एव खलु अस्माकं शरीरस्योर्जातरङ्गशक्त्या परिणम्य मुक्ताकाशे प्रभ्रमति । वयम् अस्माकं ग्राहकतन्त्रम् अर्थात् शिरः नमस्कारभावेण ज्येष्ठानां पुरतः प्रसारणतन्त्रदिशि अर्थात् पादयोः दिशि अवनमय्य तेषामाशिषः प्राप्नुमः । तथैव ज्येष्ठा अपि आशीर्वदन्ति यस्यां क्रियायां प्रसारकतन्त्रेण हस्तेन ते कनिष्ठस्य शिरः स्पृशन्ति । तेन ज्येष्ठे विद्यमानाः शक्तितरङ्गाः तद्धस्तात् कनिष्ठस्य ग्राहकतन्त्रेण शिरसा कनिष्ठस्य शरीरं प्रविशन्ति । हस्तयोः पादयोः मेलनेन ग्राहकः सङ्क्रमणशक्तेः वृद्धिं कर्तुं शक्नोति ।


ISSN : 2320-740X

हस्तयोः नमस्कारमुद्रायां पिधानेन शिरोमार्गसङ्क्रामितशक्तिः पुनः बहिर्नायाति अयमेव सिद्धान्तः देवालये भगवतः पुरतः नमस्कारसन्दर्भे अनुभूयते । वयं देवालये (साष्टाङ्गं) नमस्कारं सदा कुर्मः । तदा शिरः अवनमय्य भगवतः अनुग्रहं प्राप्नुमः। हस्तौ पादौ च मिलितौ भवतः येन प्राप्तानुग्रहः बहिः सङ्क्रामितः न स्यात् ।

अवलोक्यते अनुग्रहप्रदानसन्दर्भे हस्तस्य अङ्गुल्यः सर्वे अपि सम्मिलिताः भवन्ति एतच्च अनुग्रहस्य प्रभाववृद्ध्यर्थम् अनुष्ठीयते । प्रत्येकमपि अङ्गुलिः युग्मध्रुवप्रसारणतन्त्रतुल्यं भवति (dipole antenna) । यदा च अङ्गुल्यः मिथः दूरे भवन्ति तदा सङ्क्रामकशक्तेः निरसनं भवति यच्च ऊर्जां ह्रासयति । तेन अनुग्रहप्रदानसन्दर्भे हस्तात् शिरः प्रति ऊर्जासङ्क्रमणे ह्रासः भवति । यदा तु अङ्गुल्यः सम्मिलिताः भवन्ति तदा ऊर्जाः परस्परं युक्ताः भवन्ति येन ऊर्जावृद्धिः जायते, सङ्क्रमणे उत्तमः प्रभावश्च भवति । अस्य सिद्धान्तस्योपयोगाः सङ्ग्राहकप्रसारणतन्त्रे भवितुमर्हति । बुद्धासनमुद्रामवलोकयामो वयं यत्र ध्यानावस्थायां सम्मिलितौ हस्तौ तथैव पादौ च दृक्ष्यन्ते । इदमवस्थानं शक्तेः बहिर्गमनमवरुद्ध्य शरीरान्तः सङ्ग्रहे सहकारकं भवति । अजिने उपविश्य कृतं ध्यानं शरीरोर्जां शरीरान्तः संस्थाप्य बहिर्गमनमवरुद्ध्य भूमेः गुरुत्वाकर्षणद्वारा भूमौ विलयनात् रक्षति । *Plastic* पादरक्षायाः अपेक्षया चर्मणःपादरक्षा शरीरशक्तेः बहिर्गमनमवरुद्ध्य अन्तः एव संरक्षति ।

उपर्युक्तप्रसङ्गेषु सर्वत्रापि शारीरकक्रियासु शिरः, हस्तौ, पादौ च प्रधानं स्थानं वहन्ति इति अवगम्यते । सर्वेऽपि अमी अवयवाः मानवस्य शारीरकक्रिया भौतिकाध्यात्मिकदिशा शासति । इदञ्च प्रसिद्धं यत् हस्तः बहिः प्रसारणतन्त्रत्वेन बहुधा उपयुज्यते इति । रेकीविद्यायां हस्तोपयोगेनैव बहूनां रोगाणामुपचारः क्रियते । स्थिरचेतनो (बुद्धिः) मनुष्यः स्वस्मिन् विद्यमानां सकारात्मकशक्तिम् (*positive charges)* हस्तप्रसारणतन्त्रद्वारा रोगिणि सङ्क्रामयति येन रोगी स्वस्थो भवति ।

उपर्युक्तक्रमानुसारं वैदिकसिद्धान्तोक्तमुद्राः शरीरसौष्ठववर्धकाःअपि वर्णयितुं शक्याः । पूर्वमेवावगतं यत् शिरः हस्तौ पादौ च शरीरस्थप्रसारणतन्त्राणि भवन्ति इति । इत एव कायविद्युतो आरम्भः अन्तश्चानुभूयते । विभिन्नाः मुद्राः च अमीषु स्थलेषु चोदयित्वा शरीरे विद्युतः प्रभावं वर्धयन्ति । एतेषां स्थानानां तथा निर्दुष्टकमस्याध्ययनेन , तेन जायमानशक्तिसञ्चारेण मनुष्यः मानसिकशारीरकस्वास्थ्यं संरक्षितुं प्रभवति । अङ्गुल्योः नोदनपुरस्सरं यदि जपः अनुष्ठीयते तर्हि आध्यात्मिकचिन्तनवृद्धिः अनुभूयते ।

एतादृशप्रसरणतन्त्रस्योपयोगः उपग्रहेषु भवति ये च दूरे तिष्ठन्ति । अयमेव सिद्धान्तः आध्यात्मिकप्रपञ्चेऽपि उपयुज्यते, यत्र एकस्मिन् लक्ष्ये स्थिरचित्तस्सन् क्रियावातावरणजीवनशैलीभिः उपकरणैः मनः केन्द्रितं करोति । तस्य सङ्क्रमणशक्तिः या च तस्य प्रसारणतन्त्रात् निर्गच्छति सा अतीव श्रेष्ठा परिसरं सम्पूर्णमावृणोति । अनया शक्त्या सः बहु किञ्चित् साधयितुं समर्थो भवति । यदि प्रसारणतन्त्रं विभिन्नोद्देश्येन संरूपितं स्यात् तर्हि शक्तिः विभिन्नेषु स्थलेषु विभक्ता भवति तेन शक्तिः ह्रासं गच्छति । अयमंशः नित्यजीवने दरीदृश्यते यत्र मानवः विभिन्नेषु कार्येषु मनः निदधाति येन तस्य शक्तिः विभिन्नेषु स्थानेषु विभक्ता भवति येन तस्य एकाग्रता स्थिरा न भवति ।


ISSN : 2320-740X

एवञ्च वैदिकसिद्धान्तप्रसारणतन्त्रसिद्धान्तयोः महत्साम्यं विद्यते इति स्पष्टम् । अतः वैदिकसिद्धान्तावगमार्थं प्रसारणसिद्धान्तस्योपयोगः भवितुमर्हति इत्यवगम्यते । प्रसारणतन्त्रस्य प्रभावः इतोऽपि शरीरविद्युतः विषये वैज्ञानिकविवरणञ्च न तथा प्रचुरं विज्ञातं वर्तते । कुत इत्युक्तौ शारीरतरङ्गग्रहणार्थम् अतीव मृदूपकरणस्यावश्यकता भवति । तादृशोपकरणानि नोपलभ्यन्ते तस्मिन् क्षेत्रे प्रगतेः अत्यल्पत्त्वात् । अस्मिन् क्षेत्रे विस्तृताध्ययनं कर्तव्यं वर्तते येन शरीरगततरङ्गाणां तच्छक्तेश्च परीक्षणं शक्येत । भावयामहे यत् भाविनि काले आधुनिकविज्ञानस्य आध्यात्मिकज्ञानस्य च सम्बन्धविषये चिन्तनं प्रवर्तिष्यत इति । अनेन वैदिकसिद्धान्तविषये आध्यात्मिकतत्त्वविषये च मानवस्य श्रद्धा वर्धिष्यते ।

***

# मोक्षस्वरूपम्

**श्री गणपति हेगडे**

सहायकाचार्यः(संविदा) वेदान्तविभागः

चतुर्विधपुरुषार्थेषु चरमः परमश्च सर्वदुःखनिवृत्तिरूपः नित्यनिरतिशयसुखरूपो मोक्षः ब्रह्मभाव एवेति वेदान्तराद्धान्तः। स च प्रेक्षावता पुरुषेण इहैव जन्मनि जीवितावधौ सम्पादनेन जन्मसार्थक्यं संपादनीयमिति माता उपनिषत् सानुकम्पम् उपदिशति । अन्यथा महती विनष्टिरिति बोधयति ।

तथा च को नाम मोक्ष इति विचार्यमाणे सति वार्तिककाराः "अविद्याऽस्तमयो मोक्षः सा च बन्ध उदाहृतः" इत्याहुः। भाष्यकारास्तु "अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः[1]" इत्यूचुः । तथा च निरतिशयसुखावाप्तिः शोकनिवृत्तिश्च मोक्षः । निरतिशयसुखं च ब्रह्मैव, "आनन्दो ब्रह्मेति व्यजानात्[2]" "विज्ञानम् आनन्दं ब्रह्म[3]" इत्यादिश्रुतेः । मोक्षस्य आनन्दात्मकब्रह्मरूपत्वे च "ब्रह्मविद् ब्रह्मैव भवति" इत्यादिश्रुतिर्मानम्, शोकनिवृत्तिरूपत्वे च "तरति शोकमात्मवित्[4]" "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः[5]" इत्यादिश्रुतिर्मानम् ।

'मुच्लृ मोक्षणे' इत्यस्माद्धातोः निष्पन्नोऽयं शब्दः मोक्षणमर्थं ब्रवीति । तथा च मोक्षः बन्धादपसारणात्मकः, न त्वन्यस्य कस्यचन प्राप्तिरूपः । अर्थात् प्राप्तस्यैव प्राप्तिः, न त्वप्राप्तस्य । अप्राप्तभ्रमनिवृत्तिमात्रं क्रियते विद्यया, न मोक्षो जन्यते, तथात्वे तस्य अनित्यत्वापत्तिः । अतः परिहृतस्यैव परिहार इति तत्त्वम् ।

1 तैत्तिरीयोपनिषत् – १.१

2 तैत्तिरीयोपनिषत् – २.५

3 बृहदारण्यकोपनिषत् – ३.९.२८

4 छान्दोग्योपनिषत् – ७.१.३

5 ईशावास्योपनिषत् – ७



ISSN : 2320-740X

इयं मुक्तिः द्विधा, जीवन्मुक्तिः विदेहमुक्तिश्चेति । जीवन्मुक्तो नाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन अज्ञानतत्कार्याणां सञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वात् अखिलबन्धरहितो अविनष्टप्रारब्धकर्मा ब्रह्मनिष्ठः पुरुषः । जीवन्मुक्त्यङ्गीकारे श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये[1]" इति । कालवशेन प्रारब्धकर्मक्षये सति यदा शरीरपातः सञ्जायते, तदा जीवन्मुक्तः पुरुषः विदेहमुक्तिं लभते । एतादृशः विदेहमुक्तः आत्मा निष्कलब्रह्मरूपेण अवतिष्ठते । वेदान्ते शरीरं त्रिविधं स्थूलं, सूक्ष्मं कारणञ्चेति । विदेहमुक्त्यवस्थायां त्रिविधस्य शरीरस्यापि नाशो भवति इति सर्वदेहविनाशात् इयं विदेहमुक्तिरिति उच्यते ।

विदेहमुक्तिः पुनः प्रकारान्तरेण द्विधा, सद्योमुक्तिः क्रममुक्तिश्चेति । प्रारब्धकर्मनाशानन्तरं च स्थूलदेहपातसमकालं सूक्ष्मकारणशरीरयोः अपि नाशे सति मुक्तात्मा सद्यः एव ब्रह्मनिर्वाणं लभते, ब्रह्मणा सह एकी भवति । इयं सद्योमुक्तिः । ये तावत् सगुणब्रह्मज्ञानं लभन्ते, तेषां प्रारब्धादिकर्मणां नाशे अपि ब्रह्मनिर्वाणलाभो न भवति, निर्गुणब्रह्मज्ञानाभावात् । एतादृशसगुणब्रह्मज्ञानिनां कृते इहलोकात् प्रस्थानान्तरं ब्रह्मलोकगमनम्, ततश्च कल्पान्ते हिरण्यगर्भेण सह निर्गुणब्रह्मलाभः भवतीति इयमेव क्रममुक्तिः इत्युच्यते ।

न चायं मोक्षः लोकान्तरावाप्तिः । ये चान्ये मोक्षः पञ्चविधः इत्याहुः –

**सालोक्यमथसारूप्यं सार्ष्टिः सामीप्यमेव च । सायुज्यं चेति मुनयो मुक्तिं पञ्चविधां विदुः ॥ इति**

एतेषां न मुख्यं मोक्षत्वम् । एते सर्वेऽपि सगुणब्रह्मविषयाः गौणमोक्षाः । मुक्तेरस्याः ज्ञानमात्रमेकं साधनम् "नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतेः । इत्थं साधनचतुष्टयसम्पन्नोऽधिकारी, वेदान्तश्रवणानन्तरं मनननिदिध्यासनद्वारा तत्त्वमस्यादिवाक्यैरुदितां साक्षात्कारवृत्तिं प्राप्नोति । तदनन्तरं सविकल्पक–निर्विकल्पकसमाधिस्थितिद्वारा, "अहं ब्रह्माऽस्मि" इति वृत्तिज्ञानेन समूलाविद्याविनाशपूर्वकं ब्रह्मभावमधिगच्छति । वृत्तिज्ञानं ब्रह्मभावं न जनयति, अपि तु वृत्तिज्ञानमज्ञानमपसारयति । तदा ब्रह्मभावस्योपलब्धिर्जायते । प्राप्तिरियं प्राप्तस्यैव पुनः अप्राप्तभ्रमनिवृत्तिरूपा । तथा च ब्रह्मात्मना संस्थितिरेव मोक्षः ।

***

# काव्यसौन्दर्यसम्पादने अलङ्काराणां स्थानम्, तत्स्वरूपम् ।

**डा. कोम्पेल्लि विनयकुमारः**

सहायकाचार्यः(संविदा) साहित्यविभागः

साम्प्रतं साहित्यशास्त्रमिति यदुच्यते, तस्यैव अलङ्कारशास्त्रमित्यपि नाम प्रवर्तते । अतिप्राचीनकाले शास्त्रमिदं क्रियाकल्पनाम्ना व्यवह्रियते स्म। वात्सायनेन कामसूत्रे चतुषष्टिकलासु क्रियाकल्पस्य गणना कृता । तत्र क्रियया काव्यग्रन्थाः, कल्पेन च विधानमभिप्रेतम् । तदिदं क्रियाकल्पपदं साहित्यविद्यापरं पर्यवस्यति ।

[1] छान्दोग्योपनिषत् – ६.१.३


ISSN : 2320-740X

वामनस्तु **सौन्दर्यमलङ्कारः**[1] इत्युक्त्वा, काव्यगतान् सर्वानिव ध्वनिरसगुणतत्तदलङ्कारादीनलङ्कारशब्देन सञ्जग्राह । तदनुसारेणैव अलङ्कारशास्त्रं साहित्यशास्त्रपर्यायतामर्हति ।

काव्यशास्त्रस्य अलङ्कारशास्त्रमिति नाम प्रचलने बीजं निर्दिशता अलङ्कारसर्वस्वकृता रुय्यकेण प्रतिपादितम् इह हि तावत् भामहोद्भटप्रभृतयः चिरन्तनालङ्कारिकाः प्रतीयमानार्थं वाच्योपस्कारकतया अलङ्कारपक्षनिक्षिप्तं मन्यन्ते । अलङ्कारा एव काव्ये प्रधानमिति, तेषां सिद्धान्ते प्राधान्येन व्यपदेशा भवन्तीति न्यायात् काव्यशास्त्रस्य अलङ्कारशास्त्रमिति व्यपदेशः प्रचलितोऽवर्तत ।

अलङ्कारो नाम क इत्युक्ते **सौन्दर्यमलङ्कारः**[2]इति वामनः निर्वचनमेतत् प्रददौ । सौन्दर्यमस्ति चेदेव काव्यं समादरन्ति इति निगदति वामनः – **काव्यं ग्राह्यमलङ्कारात्**[3] इति । काव्यस्य सौन्दर्यमेतत् कुतः समायातीत्येतस्य प्रश्नस्य उपमा–उत्प्रेक्षा–रूपकाद्यलङ्कारैस्सार्धं सगुणाः,वैदर्भ्यादिरीतयः, अदोषा भवन्ति चेत् काव्ये सौन्दर्यं समागच्छति । तस्मात् कारणात् काव्यस्य सौन्दर्यं प्रापयन्तीति उपमाद्यलङ्काराः । अत एव अलङ्कार इति नाम प्रसिद्धिं सङ्गतम् । अपि च करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयम् उपमादिषु वर्तते । काव्ये स्थितं सौन्दर्यं तस्य हेतून् उपमाद्यलङ्कारान् रीतिध्वन्यादिविषयान् च चर्च्यमानं शास्त्रमलङ्कारशास्त्रमिति भणितुं शक्यते । प्रतापरुद्रीयव्याख्याता कुमारस्वामी अपि एवमेव सङ्गृह्य शास्त्रेऽस्मिन् रसरीत्यादयः बहवो विषयाः सन्ति चेदपि छत्रिन्यायेन अलङ्कारशास्त्रमिति नाम समागतमिति प्राह (यद्यपि रसाद्यलङ्काराद्यनेकविषयमिदं शास्त्रं, तथापि छत्रिन्यायेन अलङ्कारशास्त्रमुच्यते इति लिलेख )। गच्छत्सु दशजनेषु द्वित्राणां हस्तेष्वेव छत्राणि वर्तन्ते चेदपि छत्रसहितजनाः गच्छन्तीति ब्रूमः । अयमेव छत्रिन्यायः । तर्हि अलङ्कारशास्त्रमिति पदस्य सौन्दर्यमित्यर्थज्ञानानन्तरम् अलङ्कारशास्त्रं, सौन्दर्यशास्त्रमिति द्वे समानपदे इति ज्ञायते । अस्मिन् विषये लेशोऽपि संशयो नास्त्येव । केवलं वामनः न तस्मात् पूर्वं स्थिताः भामहादयोऽपि अलङ्कारशास्त्रस्य सौन्दर्यमिति विस्तृतार्थे ऊरीचक्रुः। सौन्दर्याधायकाः प्रधानरूपेण अलङ्कारा एव इति दण्डिभामहादयः अभिप्रयन्ति ।

मधुर–आम्ल–लवण–कटु–कषाय–तिक्तेत्यादीनाम् आस्वादनेनैव रुचिः प्रतीयते । किन्तु स्पष्टीकर्तुमसम्भवा । इक्षुरसः मधुरो वर्तते । क्षीरमपि मधुरमेव। गुडोऽपि मधुर एव। परन्तु इक्षुरसे स्थितं माधुर्यमन्यत्, क्षीरे स्थितं माधुर्यमन्यत्, गुडे स्थितं माधुर्यमन्यच्च । तेषु तावान् व्यत्यासः वचोभिः सरस्वत्यपि वक्तुं न शक्ता इति निगदति दण्डी

**इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् । तथापि न तदाख्यातुं सरस्वत्याऽपि न शक्यते**[4]॥

एतादृशमेव सौन्दर्यमपि । तर्हि माघमहाकविः लक्षणमेकं स्थूलरूपेण जगाद –

**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः**[5]। इति ।

प्रतिक्षणं नूतनरूपेण यत् दृश्यते तदेव सौन्दर्यमिति लक्षणस्यास्य भावः ।


ISSN : 2320-740X

लक्षणमेतत् प्राकृतिकदृश्यवर्णनसन्दर्भे एव उदितं चेदपि न केवलं काव्यादीनाम्, अपि च ललितकलादीनामपि अनुवर्तते । भामहः स्वकाव्यालङ्कारग्रन्थे सर्वेषामालङ्कारिकाणां मतानि परीक्ष्य,सत्कवीनां काव्यानि संलक्ष्य, स्वधिया च "काव्यलक्ष्म" इति बभाण । वाच्यार्थेन सम्बद्धोपमाद्यलङ्कारान् प्रतिपादितान् विद्वद्वरेण्यः आनन्दवर्धनः 'काव्यलक्ष्मविधायिनः' इति बभाण । प्रतापरुद्रीयव्याख्यायां कुमारस्वामी सोमपीती अपि एवमेव अवदत्।

काव्यमीमांसानिर्मात्रा राजशेखरेण अलङ्कारशास्त्रस्यास्य वेदाङ्गत्वमुररीकृतम् । तन्मते न स्वतन्त्ररूपा साहित्यविद्या, अपि तु तर्कत्रयी–वार्ता–दण्डनीतीनां निष्यन्दरूपा । तथा चोक्तं तेन काव्यमीमांसायाम् – 'उपकारकत्वादलङ्कारः सप्तममङ्गमिति यायावरीयः, ऋते च तत्स्वरूपपरिज्ञानात् नार्थावगतिः । पञ्चमी साहित्यविद्येति यायावरीयः, सा हि चतसृणामपि विद्यानां साररूपा' इति । यथा –

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरेकं पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभि चाकशीति**[६] ॥

मित्रत्वेन बहोः कालात् मिलित्वा, द्वौ पक्षिणौ एकस्मिन् वृक्षे आश्रयभूतौ स्तः । तयोरेकः पक्षी मधुरं फलं खादन् वर्तते । अन्यः पक्षी अखादन् पश्यन्नस्ति । अत्र द्वौ पक्षिणौ नाम जीवात्मपरमात्मानौ । तयोः निवासवृक्षः कायः । जीवात्मनि कर्मफलम् अनुभवति सति, परमात्मा साक्षिरूपेण पश्यन्नस्ति इति अस्य भावः ।

जीवात्मपरमात्मानौ इति द्वौ पक्षिणौ शरीरवृक्षस्य आश्रयभूतौ स्तः, जीवात्मपक्षी कर्मफलम् इति नाम फलं खादति, परमात्मा पक्षी पश्यन्नेव भवति इति उच्यते चेत् रूपकालङ्कारः । तथा अनुक्त्वा, उपमेयभूतजीवात्मपक्षी सम्पूर्णस्य सङ्ग्रहस्य, उपमानभूतपक्षिणा अतिशयोक्तिः । इयम् अतिशयोक्तिभेदेषु रूपकातिशयोक्तिरिति नाम । एवं राजशेखरः अलङ्कारप्रयोगप्राधान्यं सोदाहरणं संसूचयति । सर्वाण्यपि भारतीयशास्त्राणि वेदावगमनार्थं यथा उपकारकाणि तथा अलङ्कारशास्त्रमपि वेदवाक्यस्य निगूढपरिज्ञानप्रदानाय कल्पितमिति सम्भाव्य, राजशेखरः वेदार्थोपबृंहणार्थम् अलङ्कारशास्त्रं सप्तमाङ्गमित्यभिप्रैति ।

वेदमनुसृत्य, उद्भूतेषु रामायण–भारत–भागवतादीतिहासपुराणेषु च तत्त्वार्थप्रकाशनार्थं प्रस्फुटरूपेणाधिकाः अलङ्काराः प्रयुक्ताः । कुमारसम्भव–किरातार्जुनीयादि–काव्यानि इतोऽधिकतया आलङ्कारिकसौन्दर्येण परिपुष्टानि सञ्जातानि । एवम् अलङ्कारप्रयोगे वेदात् इतिहासौ, इतिहासाभ्यां कालिदासादिप्राचीनकवीनां काव्यानि, तेभ्योऽपि वैचित्र्ययुगलकाव्यानि अलङ्कारप्रयोगे अधिकमादरं सन्दर्शयन्ति । एवं काव्येषु अलङ्कारशास्त्रमावर्तत ।

काव्ये कीदृशो गुणः विद्यते चेत् मुहुर्मुहुः पठितुम् आसक्तिर्जायते तदेव तस्मिन् 'सौन्दर्य'मिति भणितुं शक्यते । काव्यपठनेन नवनवत्वं सञ्जायते । एतस्य कारणम् अलङ्कारप्रयोग एव ।

मम्मटकाव्यलक्षणे 'अनलङ्कृती पुनः क्वापि' इत्यनेन सूच्यते यद् अलङ्काराभावेऽपि न काव्ये क्षतिः इति । मम्मटलक्षणे व्यङ्ग्यं कुर्वन् चन्द्रालोककारः अलङ्कारान् विना काव्यं स्यात् इति ये मन्यन्ते अनुष्णः अग्निरपि वर्तत इति मन्येरन् इत्यलपत्–


ISSN : 2320-740X

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मात् अनुष्णमनलं कृती** ॥[८] इति ॥

एमवमलङ्काराः काव्योत्कर्षे महत्वपूर्णसाधनानि सन्ति । रसाभिव्यक्तौ साहाय्यमापादयतां तु तेषां बहिरङ्गत्वं वक्तुं न शक्यते । उक्तं ह्यभिनवगुप्तपादैः –

**न तेषां बहिरङ्गत्वं रसाभिव्यक्तौ** । इति ।

लौकिकजीवने शरीराच्छादनार्थमेव उपयुक्तानि वस्त्राणि क्रमेण विविधविचित्ररूपेषु सौन्दर्यसाधनानि सम्भूतानि । तथैव प्रथमं तत्त्वार्थस्पष्टीकरणार्थं प्रयुक्तानामलङ्काराणां चमत्कारभावव्यक्तीकरणात् क्रमेण तेषां प्राधान्यमभूत् न तु तत्त्वार्थस्पष्टीकरणे । विविधरीतिषु कवीनां भावविशदीकरणार्थं विविधा अलङ्कारा उत्पन्नाः । परन्तु ध्वनिकारः –

**ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशतः । रूपकादिरलङ्कारवर्ग एति यथार्थताम्** [८]।।

इति अलङ्काराणां स्थानं निरदिशत् ।

क्रान्तदर्शिनः कवेः हृदयाविर्भूतौ शब्दार्थौ रसात्मकौ भूत्वा, कवितारूपेण परिणमतः । तदाविष्करणसमये विविधालङ्कारा जायन्ते । अलङ्काराः प्रतीयमानार्थस्य साधनं भूत्वा, काव्यात्मनः भागाः भवन्तीति ध्वनिवादिनामाशयः । 'काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्वः' इति ध्वनिकारः स्ववादं प्रतिपादयन् अङ्गभूतोऽलङ्कारः ध्वनेरुपस्कारक इति भावयामास । महाकवीनां काव्येषु वाच्यालङ्कारा अर्थविशेषगौरवात् उत्तमालङ्काराः ववृधिरे । एते रसध्वनिसम्पर्कात् प्रकरणविशेषे प्राकरणिकसौन्दर्यं सम्पादयन्ति ।

**काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः** ।[९]

इत्यत्र सदलङ्कृतिपदं 'सत्यः अलङ्कृतयः यस्मिंस्तत् सदलङ्कृतिः' इति व्युत्पत्त्या मनोहरालङ्काराः सम्यगाश्रिताः भवेयुः तादृशं काव्यं लोकरञ्जकं भूत्वा, शाश्वतं विराजते । अनेनैव ज्ञायते यत् अलङ्काराणामुपयोगिता महती वर्तते इति ।

**शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् । हारादिवदलङ्कारास्तत्र स्युरुपमादयः** ॥[१०]

विद्यानाथः अलङ्काराः हारादिवत् आभरणस्थानमिति उवाच । अग्निपुराणकर्ता ध्वनिमलङ्कारेषु अन्तर्भाव्य, अर्थालङ्कारान् विना काव्यं विधवा इव सौभाग्यहीनं वर्तत इति वर्णयामास ।

**अलङ्करणमर्थानामर्थालङ्कार इष्यते । तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्** ॥

**अर्थालङ्काररहिता विधवेव सरस्वती**[११] ॥ **इति** ॥

अनेन ज्ञायते यत् अलङ्कारशास्त्रे अलङ्काराणां कीदृशं स्थानमिति ।

वामनेन प्रोक्तम् – **काव्यशोभायाः कर्तारो धर्माः गुणाः तदतिशयहेतवस्त्वलङ्काराः** [१२] इति ।

जयदेवः प्रसिद्ध्या कवेः प्रोढतावशेन वा शब्दार्थयोर्मनोहरं सन्निवेशम् अलङ्कारं गृह्णाति, यथा हारादीनां मनोहरत्वेनाधानम् । सोऽलङ्कारं काव्यस्यानिवार्यधर्मत्वेन ऊरीकरोति ।


ISSN : 2320-740X

भामहः अलङ्कारप्राधान्यं कथयति – **'न कान्तमपि निर्भूषं विभाति वनिताननम्'** इति । गुणगौरवसम्पन्नाऽपि रमणी यथा सालङ्कारैव शोभते, न तथा अलङ्काररहिता । एवमेव शब्दार्थयोः सौन्दर्यधायकास्तत्तदलङ्कारा एव । अलङ्कारः शब्दार्थयोः न केवलं सौन्दर्यमेव समेधयति, अपि तु तत्र चमत्कृतिमपि समादधाति । सैव चमत्कृतिः क्वचित् उपमादिरूपेण, क्वचित् अतिशयोक्त्या, क्वचित् वक्रोक्त्या, क्वचित् केवलं शब्दसाम्यमूलकेन अनुप्रासेन प्रकाशते । भामहः 'केचन वार्ता नाम अलङ्कारम् अङ्ग्यकुर्वन्' इति कथयन् –

**गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः । इत्येवमादि किं काव्यं वार्तामेनाम् प्रचक्षते**[१३] ॥

इति पृच्छति । अनन्तरं 'केचन स्वभावोक्तिमलङ्कारं कथयन्ति' इति वदन् तस्याः

'अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा' इति लक्षणमुक्त्वा, श्लोकमुदाहरति –

**आक्रोशन्नाह्वयन् अन्यान्नाधावन् मण्डलै रुदन् । गा वारयति दण्डेन डिम्भः सस्यावतरणीः ॥ इति ॥**

साधारणतया पुरतो दृश्यमानं विषयवर्णनमपि स्वभावोक्त्यलङ्कारः भवेत् । यथा कश्चन माणवकः (बालः) उच्चैः आक्रोशन् इतरेषां साहाय्यार्थम् अन्यान् आह्वयन्, काष्ठं हस्ते गृहीत्वा, इतस्ततः भ्रमन्, रुदन् सस्यावतरणीः गाः निवारयति । अत्र डिम्भवर्णने सौन्दर्यं वर्तते । तादृशं सौन्दर्यं 'सूर्यः अस्तं गतः, चन्द्रः उदेति, पक्षिनः वासाय यान्ति' इति कथने नास्ति । अतः एतादृशानि काव्यमिति ऊरीकर्तुं न शक्यते इति कथयति भामहः । अतः भामहः पूर्वालङ्कारिकाणां हेतु – सूक्ष्म – लेशालङ्कारान् नाङ्गीकरोति । किमर्थमित्युक्ते तेषु अलङ्काराः न भवन्ति इति भामहाभिप्रायः । उच्यते च तेन –

**हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः । समुदायाभिधानस्य वक्रोक्त्यनभिधानतः**[१४] ॥ इति॥

काव्ये शब्दस्य अर्थस्य च वक्रतया युक्ता विशिष्टा उक्तिरेव अलङ्कृतिर्भवति नान्यथेति तात्पर्यम् ।

**कृत्यल्युटो बहुलम्** इति पाणिनीयसूत्रे 'बहुलम्' इति पदस्य योगविभागस्वीकारात् सर्वे प्रत्ययाः सर्वार्था इति सिद्धान्तस्य सम्मतत्वेन अलंपूर्वकात् कृधातोर्भावे, करणे, कर्मणि च घञ्प्रत्यये विहिते निष्पन्नस्य अलङ्कारशब्दस्य क्रमशः अलङ्कृतिरलङ्कारः, अलङ्क्रियते अनेन इत्यलङ्कारः, अलङ्करोतीति अलङ्कारः, अलङ्क्रियते असौ अलङ्कारः इत्यर्थाः वर्तन्ते । किन्तु यथा अलङ्कारशब्दस्य प्राच्यग्रन्थेषु व्यवहारः प्राप्यते, तदनुसरं भावकरणार्थकघञ्निष्पन्न एवालङ्कारशब्दोऽत्र अस्माकमुपादेयः। तस्यैवालङ्कारशास्त्रे काव्यगतसौन्दर्यस्य अनुप्रासोपमादीनां च समीक्षणीयानां सामान्येन बोधकत्वात् ।

मम्मटोऽलङ्कारं लक्षयति –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः**[१५] **॥ इति ॥**

यथा करचरणाद्यवयवगतैः वलयनूपुरादिभिः तत्तदलङ्कारतया प्रसिद्धैः अवयव्येव अलङ्क्रियते, तथा शब्दार्थावयवगतैः अनुप्रासोपमादिभिः तत्तदलङ्कारतया प्रसिद्धैः अवयविभूतं काव्यमुपस्क्रियते । आश्रयाश्रयिभावेन


ISSN : 2320-740X

अलङ्कार्यालङ्कारभावो लोकवत् काव्येऽपि सम्मतः । चारुत्वहेतुत्वेऽपि गुणानामलङ्काराणाञ्चाश्रयभेदाद्भेदव्यपदेशः । 'सङ्घटनाश्रया गुणाः, शब्दार्थाश्रयास्त्वलङ्काराः' इति । विश्वनाथश्चालङ्कारं लक्षयति –

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः । रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्** [१६] ॥

अलङ्कारा अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः । प्रसादादिगुणवत् अलङ्कारा न अपरिहार्याः, अत एव अस्थिरा धर्मा इति भण्यन्ते । अलङ्क्रियते अनेनेति करणव्युत्पत्त्यालङ्कारशब्दः शब्दार्थालङ्कारबोधकः । साहित्यशास्त्रापरपर्यायोऽलङ्कारशब्दस्तु भावसाधनः । अत्र जयरामभट्टाचार्यादिव्याख्यानेन अलङ्कारस्य इदं लक्षणत्रयं लभ्यते । रसोपकारकत्वे सति रसावृत्तित्वम् । तथात्वे सति रसव्यभिचारित्वम् । अनियमेन रसोपकारकत्वं चेति ।

अलङ्कारशास्त्रस्य उद्भावकः सर्वतः प्राङ्महर्षिर्द्वैपायनमुनिरेव बभूव । तेन स्वकीये अग्निपुराणे काव्यस्य स्वरूपमुद्भावयता लिखितमस्ति यत् –

**संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली । काव्यं स्फुटवदलङ्कारं गुणवद्दोषवर्जितम्**[१७] ॥ **इति** ॥

अपि च –

**अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्**[१८] ।

इति कथयन् गुणास्तु रसस्य साक्षादेव व्यञ्जकाः, तदीयस्वरूपसमर्पकाः अलङ्काराश्च गुणैः समवाप्तस्वरूपाणां रसानां समुत्कर्षकाः । तेन रसानुसारिणां तदुत्कर्षकाणामेव अलङ्काराणां वास्तविकमलङ्कारत्वं इत्यभिप्रैति ।

अलङ्कारशास्त्रेऽस्मिन् शब्दार्थदृष्ट्या अलङ्कारास्त्रिधा विभज्यन्ते । शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराश्च ।

जागरूकतया परिशील्यते चेत् प्रपञ्चेऽस्मिन् प्रतिसाहित्यं भाषोद्भवात् प्रभृति एतावत्पर्यन्तम् एते अलङ्कारा एव साहित्यराज्यं पालयन्तीति वचने कापि अतिशयोक्तिर्नास्ति । रस–ध्वन्यादिसम्प्रदायाः बहवः आगताश्चेदपि काव्ये अलङ्काराणां दातव्यं स्थानं वर्वर्ति ।

यद्यपि काव्यात्मरूपेण नास्य वैशिष्ट्यम् । तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति । अलङ्कारस्य तादृशं वैशिष्ट्यं वर्तते । यथा वपुषि अलङ्काराणां वस्त्रादीनामिव । यथा सकलगुणसमन्वितोऽपि मनुष्यः निर्वसनो न शोभते, अलङ्काररहिता रामा यथा न शोभते, तथैव अलङ्कारविहीनं काव्यम् ।

एवं विज्ञायते यत् काव्येषु अलङ्काराणां स्थानं कियदिति ।

सन्दर्भसूची

१. का.सू.वृत्तौ १.२ २.का.सू.वृत्तौ १.२ ३.का.सू.वृत्तौ १.१



ISSN : 2320-740X

४.का.व्या.१.१०२
५. शि. ४.१७
६. ऋ.१.१६४.२०
७.चन्द्रा.१.८
८.ध्व.लो.२.१८
९. का.१.१९
१०.प्र.रु.का.१.२
११.अ.पु.३४४.१.२
१२.का.सू.३.११.२
१३.भा.का.२.८६
१४.भा.का.२.७६
१५.का.प्र.८.६७
१६.सा.द.१०.१
१७.अ.पु.६.७.१७४
१८.अ.पु.१.११४

आधारग्रन्थाः

१. काव्यालङ्कारसूत्रवृत्तिः
२. शिशुपालवधः
३. ऋग्वेदः
४. काव्यप्रकाशः
५. ध्वन्यालोकः
६. चन्द्रालोकः
७. प्रतापरुद्रीयम्
८. अग्निपुराणम्
९. काव्यालङ्कारः
१०.साहित्यदर्पणम्

***

# अलङ्कारशास्त्रे भक्तिरसस्य विकासक्रमः

**श्रीनिवासमूर्तिः**

प्राध्यापकः, साहित्यविभागः

भारतीयसंस्कृतसाहित्ये अलङ्कारशास्त्रज्ञैः भक्तिरसः शुद्धस्वतन्त्ररूपेण न स्वीक्रियते । संस्कृतालङ्कारशास्त्रदृष्ट्या रससिद्धान्तप्रवर्तको भरतमुनिः विषयेऽस्मिन् किमपि नावदत् । तेन भक्तेः रसत्वं वा भावत्वं वा किमपि नोक्तम् । भरतस्तु मुख्यतयाभिनेयस्य विचारकः, तस्मिन् काले भक्तियुक्ताभिनेयसाहित्यस्य दौर्लभ्यं स्यादित्यतः नाट्यमेव भरतः प्रमुखतया विवृणोतिस्म इति वक्तुम् शक्यते । यद्यपि पुराणेषु तत्र तत्र विस्तृतः भक्तिविषयः वर्तते तथापि भरतेन नाट्यशास्त्रे न विचारितः दृश्यते । आद्यरसाचार्येण भरतेन शृङ्गारादयो अष्टौ, नव वा रसाः स्वीकृताः, तत्रापि शान्तरसस्य प्राधान्यमङ्गीकृतं, सर्वे शृङ्गारादिरसाः स्व स्व निमित्तमादाय शान्तरसादेव समुद्भवन्ति, पुनः निमित्तापाये तत्रैव सर्वे विलीयन्ते इति हेतोः ।[1] शान्तरसप्रसङ्गे **ईश्वरप्रणिधानविषये भक्तिश्रद्धे** इत्याद्यभिनव[2]–भारत्यनुसारं भरतस्य मते निराकारोपासनायाः, सकारोपासनायाश्च साक्षात् सच्चिदानन्दो ब्रह्मैवालम्बनं विद्यते । अतः भक्तिज्ञानयोश्च शान्तरसे एवान्तर्भावः कर्तव्यः ।


ISSN : 2320-740X

भरतस्य पश्चात् संस्कृतकाव्यकोविदैः कालान्तरे पूर्वकालात् सर्वमतेभ्यः शृङ्गारादि नवरसेभ्यो[3] अतिरिक्ताः प्रेयो–भक्ति–वात्सल्यादिरसाश्च परिगणिताः । किन्तु प्रमुखाचार्यैः शुद्धस्वतन्त्ररूपेण न स्वीक्रियते । तत्र भामहानन्तरवर्तिना दण्डिना परमात्मविषयिका या परमप्रीतिः सैव भक्तिरिति निगदितम् ।[4]

किन्तु तेनापि भक्तिः रसरूपेण न प्रोक्ता विद्यते किन्तु भावरूपेणैव स्वीकृता । तेन काव्यादर्शे स्वसिद्धान्तानुसारम् प्रीतिः, प्रेयोऽलङ्कारे निक्षिप्ता, किं बहुना सर्वे रसा अपि रसवदलङ्कारेष्वेव स्थापिताः । अर्थात् सर्वं भावात्मकं वस्तु तेनालङ्कारत्वेनैव गणितम् । अलङ्काराद्भिन्नम् किमपि नास्तीति तन्मतम् । दण्डिनः मतानुसारं काव्ये तत् प्रियतरानुभूतेराख्यापनं प्रकाशनं वा वर्तते तदेव प्रेय इति ।[5]

पुराणस्थं स्तोत्रसाहित्यं विलोक्यैव भगवद्विषयिकं प्रीतिं प्रति दण्डिना किञ्चिद् विचारितम्, किन्तु भक्तिः रसत्वेन नाङ्गीकृता । अपि तु प्रेयोऽलङ्कारत्वेनैव स्थापिता । अत्रैवं संभावितुं शक्यते यत् – रससंख्याविषये भरतमुनेरभिप्रायः नोल्लङ्घनीय इति दण्डिनोऽभिप्राय इति ।[6]

एवञ्च संस्कृतालङ्कारशास्त्रे प्रथमतो उद्भटेन **स्नेहः प्रकृतिः प्रेयान्** इत्युक्त्वा प्रेयो नामको नवीनो रसः स्थापितः, तस्य स्थायिभावश्च स्नेह इति ।[7] अनेनापि स्वतन्त्ररूपेण भक्तेः रसत्वं नाङ्गीकृतम् । मम्मटमते तु देवादिविषयिणी रतिः व्यञ्जितसञ्चारिभावश्च भावमात्रमेव ।[8] एवमेव विश्वनाथमते प्रधानसञ्चारिभावः, देवादिविषयिका रतिः, प्रकाशिता स्थायिभावश्च सर्वं भावमात्रमेव ।[9]

जयदेवस्य मतेऽपि देवादिविषयिणी रति भावत्वेनैव प्रोक्ता ।[10] तथैव हेमचन्द्राचार्यमते भक्तिः भाव एव न तु रसः । अनेन भक्तिस्नेहवात्सल्यानां भावमात्रत्वमेवाङ्गीकृतम् ।[11] यद्यपि भोजराजेन द्वादशरसास्स्वीकृताः तथापि भक्तिविषये तेन किमपि नोक्तम् । भानुदत्तेनापि यद्यपि वात्सल्य–लौल्य–कार्पण्यैस्सह भक्तिरपि समुद्भाविता, किन्तु पुनस्तेषां भावत्वमेवाङ्गीकृतम् ।[12] साहित्यशास्त्रज्ञाः, विद्वांसः स्पष्टतया स्वतन्त्ररूपेण भक्तिं रससूपेण न स्वीकुर्वन्ति।

भक्तेः स्वतन्त्ररूपेण रसत्वस्थापनात् संसारबन्धविमुक्ताः भक्ताग्रेसराः परमवैष्णवाचार्याः महनीयां कीर्तिमवापुरित्यत्र नास्ति संशीतिलेशः । मनोवैज्ञानिकदृष्ट्या, शास्त्रीयदृष्ट्या च तैस्स्थापितो भक्तिरसः सर्वरसोत्कृष्टत्वेन निरूपितः । तेषामन्यतमः रूपगोस्वामी भक्तिरसामृतसिन्धुग्रन्थे, मधुसूदनसरस्वती च भक्तिरसायने, तथा चान्ये विभिन्नभक्तिशास्त्रगन्थेषु भक्तिरसस्य साङ्गोपाङ्गं तत्त्वदीपकत्वं विवेचनमकुर्वन् । भक्तिरसज्ञानुसारेण भक्तेः रसत्वं समुचितं, न्यायतर्कसम्मतं, तस्य भक्तिरसस्य सहृदयानामनुभवसिद्धता च नापलापः कर्तुं शक्यः । भक्तिरसज्ञानां मते भक्तिरसः सर्वथा शृङ्गारादिरसापेक्षया पृथक् वर्तते । यतो हि स भक्तिरसः स्वव्यापकतासहजता–सर्वजनसुलभता–भावतीव्रता–क्रियाशीलता–विलक्षणता–मधुरता–सार्वत्रिकतादिविभिन्नदृष्ट्या तु सरसेषु सर्वोत्कृष्टतमो, सर्वश्रेष्ठतमो रसराजोऽभिधीयते रूपगोस्वामि मते । भक्तिरसास्वादनेन मनुष्याः कृतकृत्याः भवन्ति । अतः सर्वैर्मुमुक्षुभिः भक्तिरस एव समुपासनीयः ।[13]


ISSN : 2320-740X

भक्तिरसः सर्वैरास्वादयितुं न शक्यते, अत एव स न स्वीकार्य इति केषाञ्चन मतम् । एतत्कारणं तु हास्यास्पदमेव । यतो हि भक्तिरसः यद्यपि सर्वेषु मानवेषु विद्यते, किन्तु तस्य प्रकटनं तु सहृदयहृदय एव भवति । यतो हि कस्यापि रसस्यानुभूतिः तत्तदनुकूलबुद्धिशालिष्वेव जायते न तु सर्वेषु । भग्नावरणचिद्रूपैव भक्तिः रसरूपेण प्रकटिता भवति । भक्त्या भक्तः भगवत्साक्षात्कारे सकलप्रपञ्चमायातीतो भूत्वा शुद्धचैतन्यस्वरूपे परमात्मनि स्वेच्छया तिष्ठति । अर्थात् तस्मिन् काले तेन भक्तेन भक्तिरसोऽनुभूयते । सर्वजनानुभूतरस एव यदि रसत्वेनोच्येत चेत्तर्हि तथाकथितरसराजशृङ्गारोऽपि शृङ्गारिकविषयविरक्तस्य तत्त्वज्ञानिनः भगवद्भक्तस्य मनसि जुगुप्सोत्पादकतया कदापि रसत्वं न लभेत । अतः भक्तिरसो नापलपनीयः । सर्वरसज्ञैर्भक्तिरसः स्वीकर्तव्य एव ।

**भक्तिरसस्वरूपम्**

कामक्रोधभयस्नेहहर्षशोकदयादिभिः भगवद्विषयैः, चित्तं तापकैः गङ्गाजलप्रवाहवत् दृतं चीनांशुकशतक्षालितमिव निर्मलं भवति, यथा स्वभावेन कठिनमपि जतुद्रव्यम् उष्णतापकाग्न्यादीनां संयोगकारणात् जलमिव द्रुतं नितरां स्वच्छं भवति तद्वत् । तदपगमे पुनः काठिन्यं जायते । तत्र द्रुते चित्ते वस्तुन आकारः यः क्षिप्यते स एव सम्स्कार–वासना–भावनादि–शब्दैरुच्यते । द्रवीभावपूर्वकं चित्तस्य विषयाकारता जायते ।[14]

रागद्वेषादिभिः द्रवीभूतं चित्तं नेत्रादिमाध्यमेन यत्रैव घटादिविषये सिक्तं जायते, तत्तद्विषयाकारं निष्पद्यते । यथा वा व्यञ्जकः सूर्यादीनां प्रकाशः व्यङ्ग्यस्य प्रकाशस्य वस्तुनः स्वरूपतां प्राप्नोति तथैव चित्तमपि तत्तद्व्यङ्ग्यकारं जायते । अत एव विषयस्य बाह्याकारवत् अन्तरोऽपि मनोमयः कश्चनाकारः भवति । बाह्यस्याभेदेऽपि मनोमयाकारस्य भेदेनैव एकस्यामेव स्त्रियां भार्या–स्वस–ननान्दा मातेत्यादयो प्रभेदाः दृश्यन्ते । तत्र बाह्याकारस्य विनष्टेऽपि मनोमयाकारः तिष्ठति अत एव स एवाकारः स्थायित्वेनोच्यते ।[15]

यस्मिन् विषये कामादीनामुद्रेकः भवति तस्मिन्नेव विषये द्रवीभावत्वं भवति । कामादीनामभावे सूर्यादीनां प्रकाशादिभिः स्वल्पतापकैरिव विषययोगे शैथिल्यमात्रमेव जायते । तत्र वसनात्मकतया वस्तुसन्निवेशो भवितुं न योग्यः भवति, किन्तु द्रवीते प्रविष्टः वस्त्वाकारः काठिन्यदशापर्यन्तं स्थितस्सन् पुनः द्रवीभावान्तरेण विषयान्तरे गृह्यमाणेऽपि प्रकाशमानत्वात् तत्त्यक्तुं न शक्यते । शैथिल्यदशायां तु न प्रविशति । प्रविष्टोऽपि त्यज्यते । अत एव वासभानासादिशब्दैस्तद्व्यपदेशः । द्रवावस्थाप्रविष्टाविषयाकारस्थानपायित्वेन स्थायिभावेन तस्य प्रयोगो भवति । विभावादीनां संयोगात् प्रकटीभूत स्थायिभाव एव श्रोतृवर्ण्ययोः दर्शकाभिनेययोर्वा भेदतिरोधानेन दर्शकश्रोतृगत एव सन् परमानन्दसाक्षात्कारेण रसत्वं प्राप्नोति ।[16]

अपि च परमानन्दः रसस्वरूपः परमात्मा एव द्रवितचित्तवृत्तौ प्रतिबिम्बितस्थायिभावतां संप्राप्य, रसत्वमाप्नोति ।[17] अत एव भक्तिरसः परमानन्दस्वरूप एव सिद्ध्यति । **आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयान्त्यभिसंविशन्ति** इत्यादिभिः श्रुतिवाक्यैः परमानन्दस्वरूपस्य ब्रह्मण एव सर्वेषां पदार्थानामुपादानत्वात् मृत्तिकाभिन्नघटवत् सर्वस्यैव प्रपञ्चस्य परमात्मानन्दरूपत्वेन


ISSN : 2320-740X

कान्ताद्याकारस्यापि सुखरूपत्वं सिद्ध्यतीत्यतः श्रृङ्गारादि रसानामपि सुखरूपत्वं सिद्ध्यत्येव । अपि च **जन्माद्यस्य यतः तदनन्यत्वमारम्भणशब्दादिभ्यः**[18] **इदं सर्वं यदयमात्मा**[19] **सर्वं खल्विदं ब्रह्म** इत्यादिश्रुतिवाक्यैः कार्यस्योपादानाभिन्नत्वं प्रतिपादितम् । अखण्डानन्दत्वे सत्यप्यविद्या निमित्तावारणभ्यां कार्यकारणतया भानेन पूर्णानन्दस्य परमात्मनोऽभानात्, सम्पूर्णलौकिकप्रपञ्चस्याखण्डानन्दरूपेण भानं स्यादिति न वाच्यम् ।

ननु तर्हि परमानन्दस्वरूपस्य ब्रह्मणो भानं कथं भवतीति प्रश्ने समाधानमेवं भवति – अज्ञातस्य ज्ञापकत्वेनैव सर्वेषां प्रमाणानां प्रामाण्यम् । अज्ञातं च स्वप्रकाशतया भासमानचैतन्यमेव न तु जडम् । यतो हि जडस्य भानाप्रसक्त्या तत्रावरणकृत्याभावतयाऽज्ञातत्त्वासंभवात् । स्वप्रकाशतया भासमानचैतन्यस्यैवावृतत्त्वाभ्युपगमेन सत्त्वस्थतया कान्ताद्याकारतया प्रमाणवृत्त्या तदावरणभङ्गेन कान्ताद्यवच्छिन्नचैतन्यस्य स्वप्रकाशसुखरूपत्वेन भानोपपत्तिकारणात् । अनवच्छिन्नचैतन्यस्वरूपभानादेव सद्यो मुक्तिः । स्वप्रकाशत्वभङ्गे वा भवति । कान्ताद्यवच्छिन्नचैतन्यमेव द्रववस्थासात्त्विकमनोवृत्युपारूढतया भावत्वं प्राप्य रसतां प्राप्नोतीति न लौकिकरसस्यापि परमानन्दस्वरूपत्वापत्तिरित्यादिसर्वं भक्तिरसायने मधुसूदनस्वामिना प्रपञ्चितं वर्तते ।

अत एवानवच्छिन्नचिदानन्दघनस्य भगवतः स्फुरणात् भक्तिरसे आनन्दस्यात्यन्ताधिक्यं वर्तते । लौकिकरसे तु विषयावच्छिन्नतयैव चिदानन्दांशस्य स्फुरणात् तत्रानन्दस्य न्यूनत्वमेव भवति । अत आनन्दाधिक्यात् श्रृङ्गारादिलौकिकरसानुपेक्ष्य भक्तिरस एव रसज्ञैः समुपास्यो भवति ।

एवं प्रथमं भगवद्विषयकरतिरूपः स्थायिभावः विभावानुभावव्यभिचारिभिः परिपुष्टिं प्राप्य भक्तिरसो भवति।

**भक्तिरसप्रभेदाः**

भक्तिवासनायुक्तैः द्रुतचित्तैः साधकैः तत्तदुचितविभावानुभावसञ्चरिसंयोगाद् भक्तिरसोऽस्वाद्यते । तस्मिन् च भक्तिरसे भक्तिरसज्ञानां विदुषां मते मुख्यगौणभेदेन द्वादशभेदाः विद्यन्ते । तत्र पञ्चमुख्यभक्तिरसाः भवन्ति– शान्त–भक्तिरसः, प्रीतिभक्तिरसः, प्रेयोभक्तिरसः, वात्सल्यभक्तिरसः, मधुरभक्तिरसश्चेति । तत्रैव हास्यभक्तिरसः, अद्भुतभक्तिरसः वीरभक्तिरसः, करुणभक्तिरसः, रौद्रभक्तिरसः, भयानकभक्तिरसः, बीभत्सभक्तिरसश्चेति सप्तगौणरसाः प्रोक्ताः विद्यन्ते भक्तिरसामृतसिन्धुग्रन्थेश्रीरुपगोस्वामिना ।

1. भ.र.वि.पृ. 215
2. भ.र.वि.पृ. 215
3. श्रृङ्गारः करुणः शान्तो रौद्रो वीरोऽद्भुतस्तथा ।
   हास्यो भयानकश्चैव बीभत्सश्चेति ते न व ॥ र.गं.पृ. 131
4. भक्तिः भगवद्विषये परमप्रीतिः । का.द.
5. का.द.2–275


ISSN : 2320-740X

6. इह त्वष्टरसायत्तारसवत्तास्मृता गिराम् । का.द.

7. शृङ्गारवीरकरुणबीभत्सभयानकाद्भुतहास्याः ।

रौद्रः शान्तः प्रेयानिति मन्तव्या रसाः सर्वे ॥ रु.का.अल.12–3

8. रतिर्देवादिविषया व्यभिचारी तथाञ्चितः । का.प्र. 4–35

9. सञ्चारिणः प्रधानानि देवादिविषया रतिः ।

उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥ सा.द.3–260

10. रतिर्देवादिविषया सन्ति च व्यभिचारिणः ।

वेद्यमाना निगद्यन्ते भावाः साहित्यवेदिभिः ॥ च.लो. 6–14

11. का.शा.पृ. 68

12. ननु वात्सल्यं लौल्यं भक्तिः कार्पण्यं वा कथं न रसः । श्रद्धास्पृहाणां स्थायिभावानां सत्त्वादितो चेन्न । तेषां व्यभिचारिरत्यात्मकत्वात् । भ.र.वि.पृ. 218

13. अ.पु.336–2

14. भ.रसा. 1–4–8

15. भ.रसा. 1–12–22,27–28

16. भ.रसा. 1–6

17. भ.रसा. 1–10

18. ब्र.सू.1–1–2,2–1–24

19. बृह.उ.2–4–6

***

# महाभारते वैज्ञानिकदृष्ट्या अनुस[1]न्धेयाः जननविचाराः

**डा.प्रमोद भट्टः**

प्राध्यापकः व्याकरणविभागः

**ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे । ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥**

भासमाघकालिदासश्रीहर्षादयः महाकवयः महाभारतमवलम्ब्यैव काव्यानि रचयामासुः । तत्र वर्णनं, कथा, रसः तात्कालिकसमाजस्थितिश्च इत्येतान् अंशान् प्राधान्येन मनसि निधाय कविभिः महाभारतं परामृष्टम् । दार्शनिकैः धर्मार्थकाममोक्षोपयोगी साधनोपायः दृष्टः । लौकिकैः पाण्डवकौरवजीवनचरित्रं दृष्टम् । तदुत्तरवर्तिभिः बहुभिः पूर्वेषां

[1]. देवी. भा ४६ अध्यायः



ISSN : 2320-740X

मार्ग एवानुसृतः। अद्यत्वे एताभिः दृष्टिभिस्सह वैज्ञानिकी दृष्टिरपि संलग्ना वर्तते। महाभारतीयघटनानां विज्ञानदृष्ट्या परिशीलनं ऊनविंशतिशताब्दावेव समारब्धं दृश्यते। एतद्दृष्ट्यनुसारं जननविज्ञानम्, मरणविज्ञानं, सम्बन्धः, तन्त्रज्ञानं, महाभारतकालगणना, युद्धकौशलविज्ञानमेते बहवो विषयाः प्राधान्यं भजन्ते। पारम्परिकीं दृष्टिं मनागिव पार्श्वे कृत्वा उपर्युक्ताः अंशाः विचार्यन्ते चेत् महाभारतं करतलामलकवत् दृग्गोचरो भवतीति आधुनिकानां वादः। अतः ते एतावता सिद्धेन विज्ञानोपकरणेन वाङ्मये निगूढाः घटनाः भेत्तुमिच्छन्ति। तत्र बहुविधसम्बन्धः महाभारते वर्णितेषु पात्रेषु परस्परं विद्यमानः विज्ञानस्य परीक्ष्यः विषयः।

महाभारतस्यादिपर्वणि एकोनसप्तत्युत्तरैकशततमेऽध्याये विद्युत्कोशाख्यो राक्षसः वन्ध्यासुतां सालकण्ठां पर्यणैषीत्। गच्छता कालेन आसन्नप्रसवा सा मन्दरपर्वतगता गुहां प्रविश्य तत्रैव अपत्यं सुषुवे। तदपत्यं गुहामात्रनाथं कृत्वा पत्युरन्तिकं सालकण्ठा जगाम। समयेऽस्मिन्नेतन्मार्गेण शिवेन सहायान्ती पार्वती गुहायाः निर्गच्छन्तं शिशोः[1] क्रन्दनं शुश्राव। तस्मिन् दयमाना सा राक्षस्यः गर्भधारणसमनन्तरमेवापत्यं जनयेयुः, अनुक्षणं वयसा मातृतुल्या भवेयुश्चेति वरं प्रादात्।

स्त्रीपुंसोः संयोगं विना पुत्रोत्पत्तिः जायत इत्यमुमंशं शान्तिपर्वणः द्वाविंशत्युत्तरैकशततमोऽध्यायः दृढीकरोति। अमीबासदृशैकाणुकोशजीविनः स्वदेहमेव भित्वा जीवान्तरस्योत्पत्तौ कारणं भवन्ति। तद्वत्प्रसङ्गेऽस्मिन् क्षुपस्य सृष्टिरपि वैज्ञानिकानुशीलनं योग्यं तथ्यं समीकरोति। सृष्टिकर्ता ब्रह्मा सर्गादौ अराजकं भुवनं सनाथीकर्तुं स्वनासा पुरुषमेनं ससर्ज, यश्च क्षुपाभिधानेन सङ्ख्यातः। देवीभागवते प्रस्तुतां नरनारायणयोः ऊर्वोः सम्बन्धात् ऊर्वश्याः जननमपि अन्यतमम्। आभ्यामुभाभ्यां घटनाभ्यामाधुनिकैः विज्ञानिभिः कथ्यमानं समरूपं विधानं साम्यं भजते। दक्षः प्रजां स्रष्टुमसिक्नीमुदवहत्। ततः प्राक् स्त्रीपुंसोः समागमः जननस्य हेतुः नासीदिति भासते। तत्र विष्णुपुराणमाख्याति –

ततः प्रभृति मैत्रेय प्रजा मैथुनसम्भवाः।

**सङ्कल्पात् दर्शनात् स्पर्शात् पूर्वेषामभवन् प्रजाः। तपोविशेषैः सिद्धानां तदातथ्यं तपस्विनाम् इति१।**

जननहेतुकाः विलक्षणसम्बन्धाः देवगन्धर्वयोः, देवाप्सरसोः, देवपश्वोः, मनुष्यराक्षसयोः,मनुष्याप्सरसोः,

---

[1]. वि.पु १–१५ श्लो. ७९–८०

२. आ.प. ३०७,१३३,१२७

३. आ.प. १४०

४. व.प १११

५. आ.प. १६,२०,२१,२५,२७ सभा. प. १० अनु. प. ९,२०,२५

६. आ.प. २२५

७. आ. प. ६१,६४

८. (द्रो.प.२३)


ISSN : 2320-740X

पशुमनुष्ययोश्च संशोध्याः विषयाः महाभारतप्रयोगशालायां समुपलभ्यन्ते । यमवायुदेवराजैः सह कुन्त्या सम्बन्धेन युधिष्ठिरभीमार्जुनाः अश्विनीभ्यां माद्र्याः सम्बन्धेन आश्विनेयौ च जनिं लेभिरे । अत्र देवमनुष्यसम्बन्धः दृश्यते । २कश्यपसम्बन्धात् प्रथायामूर्णायुराभ्यः देवगन्धर्वः जनिं प्राप । कश्यपादेव 'अरिश्मायां' 'तुम्बुरु' उदपद्यत । घृताचीत्यप्सरा अपि, एनां घृताचीं दृष्ट्वैव 'भारद्वाजः' द्रोणस्य जनकोऽभवदिति आदिपर्व ब्रवीति३ । देवपशुसम्बन्धः वनपर्वणि दृश्यते । विभाण्डकमुनिः ऊर्वशीं दृष्ट्वा मोहं गतः । ततः स्खलितं तेजः काचित् हरिणी अपिबत् । ततः ऋष्यशृङ्गः जनिमलभत४ । कद्रूः दक्षप्रजापतेः पुत्री काश्यपं परिणीय सर्पान् ससर्ज५ । मन्दपालो नाम मुनिः जरिताख्यपक्षिण्या सम्मील्य जरितारिः, सारिसृक्कः, द्रोणः, स्तम्भमित्रः इति चतुरः पुत्रान् प्राप६ । ततः मनुष्यराक्षससम्बन्धः बहुधा दृश्यते । भीमसेनात् हिडिम्बायां घटोत्कचस्य जननम्७ अस्योदाहरणं भवितुमर्हति । पाण्डवाः यदा स्मरन्ति तदा तैस्सह आत्मानं प्रकटयितुमसौ शक्तः आसीत् । शरीरेण सः [1]स्थूलोऽपि भवति स्म८। उग्रसेनस्य पत्नी द्रुमिलाभिधानस्य राक्षसस्य संसर्गात् पुत्रं कंसं प्राप । शल्यराजः सम्भ्राख्यस्यासुरस्य अंशादुत्पन्नः।

न केवलं मनुष्यराक्षसयोः सम्बन्धः महाभरते दृश्यते अपि तु मनुष्याप्सरसोरपि । पृषदः मेनकायामनुरक्तः। तत्फलमेव द्रुपदः१ । विश्वामित्रात् मेनकायां शकुन्तला उत्पन्ना२ । एवमेव पशुभिः सह मनुष्यसम्बन्धो जीवन्तस्य जनेः कारणमभवत् इत्यप्यंशः महाभारते दृश्यते । उपरिचराख्यः चेदीदेशस्य राजा एकदा नद्यां तेजसा स्खलितोऽभूत् । कश्चन मीनः तत्तेजः भुक्त्वा मत्स्यराजः मत्स्यगन्धीत्यनयोः जन्मकारणमभवत्३ । तीर्थयात्रावसरेऽर्जुनः उलूपीं नागकन्यां सम्पृक्तः इरावन्तं तनयं प्राप्नोत्४ । जनमेजयस्य पुरोधाः संवश्रवाः सर्पिण्यां श्रुतश्रवसं पुत्रं प्राप्नोत् । उपरि दृष्टेषु प्रसङ्गेषु देवमनुष्यापरोराक्षसपशूनां पारम्परिकसम्बन्धेन सम्पन्नो विशिष्टःसन्तानोऽपि बुद्धिमनुसन्धानमार्गे एव प्रचोदयति ।

वैद्यविज्ञानमपि महाभारते उपलभ्यते । तत्र गर्भच्छेदः । अधुनातनकाले गर्भं छित्वा वैद्याः अपत्यं मातुर्गर्भात् बहिरानयन्ति । एतादृशशल्यचिकित्सा महाभारतेऽपि अस्ति । इक्ष्वाकुवंशस्य राजा कल्माषपादः । तत्पत्नी मदयन्तीति । सा सप्तवर्षाणि उदरे गर्भं धरन्ती अतिकष्टमनुभवति स्म । तदा तत्र समागतो मुनिः वसिष्ठः अश्मना उदरं भित्वा शिशुं बहिरानिनाय। स शिशुरेव आश्माकः इति ख्यातः५ । देवगुरोः बृहस्पतेः पुत्रः कचः असुरगुरौ शुक्राचार्ये शिष्यत्वं प्राप । एतदसहमानाः राक्षसाः कचं हत्वा दग्ध्वा च तद्भस्म सुरायां मिश्रीकृत्य शुक्राय

---

[1] . आ. प. १४०

२. आ.प. ९३१

३. आ.प. ४४१

४. आ–प ६३

५. आ.दि. १२८

६. (आ.प.१२६)


ISSN : 2320-740X

सुरामपाययन् । शुक्राचार्यः कचं मृतसञ्जीविन्या उज्जीवयामास । उदरस्थाय कचाय मृतसञ्जीविनीं विद्यां सः उपदिदेश। शुक्राचार्यस्योदरं भित्वा बहिरागतः कचः तयैव विद्यया शुक्राचार्यं उदजीवयत् ।

भृगोः पत्नी पुलोमा समयात्प्राक् शिशुं सुषुवे । अकाले बहिरागतोऽपि शिशुः अग्रे च्यवनमहर्षिरिति तपोमूर्तिरिति ख्यातिमवाप । एतादृशे विशिष्ट्जननमवलोकयामश्चेत् Caesarian Premature delivery स्मरणपथमायाति । गर्भच्छेदात् बहिरागतस्य अयोनिजः इति व्यवहारोऽपि महाभारते दृश्यते ।

महाभारते कुम्भजननं विलक्षणं दृश्यते । वसिष्ठः, द्रोणः, अगस्त्यः एतान् कुम्भसम्भूतान् निरूपयति महाभरतस्यादिपर्व । गान्धारी शतं घृतकुम्भेषु पिण्डखण्डान् पोषयति । ते एव खण्डाः दुर्योधनादयः शतं कौरवाः अभूवन् खलु६। भरद्वाजस्य घृताचीदर्शनेन स्खलितं तेजः द्रोण्यां रक्षितम् ततः द्रोणः उत्पन्नः१ । षड्षष्ठ्युत्तरैकोनविंशतितमे (१९८६) वर्षे जपान्–देशे एकः प्रयोगः कृतः । गर्भाद् बहिः निर्मिते कृतकगर्भकोषे भ्रूणं संरक्ष्य ततः पूर्णं शिशुं बहिरानीतवन्तः वैद्याः । द्रोणकृपादीनां जन्मवृत्तान्तोऽपि एतादृशवैज्ञानिकतत्त्वावलम्बी वर्तते ।

लिङ्गपरिवर्तनमपि महाभारते विलोक्यते । शिखण्डी पाञ्चालराजस्य द्रुपदस्य ज्येष्ठपुत्रः । सः जननकाले स्त्री पश्चात् पुमान् अभूत्२ ।[1]

वैवस्वतमनोः पुत्री इला वसिष्ठस्यानुग्रहात् पुरुषत्वं प्राप्य सुद्युम्ननाम्ना प्रसिद्धाभूत् । एकदा मृगयार्थं शरवणवनं गता पुनः स्त्रीत्वमेव प्राप३ । एतेषु वाङ्मयस्य महत्ताम् अपलपतां जनानामपि एते दुर्गमाः विषयाः वर्तन्ते। वैज्ञानिकदृष्ट्या एतेषामनुसन्धानेन उत्तरं प्राप्तव्यम् । तेन महाभारतस्य अन्येषां वाङ्मयविशेषाणां च महत्वं सर्वैः ज्ञायेत ।

***

---

[1] . अ.प. १४०

२. आदि प ११०

३. आप. प. ६३,६९



ISSN : 2320-740X

# व्याकरणशिक्षणे आगमनविधिः

# (Inductive Method in Grammar Education)

**डा. कुमारः**
प्राध्यापकः, शिक्षाशास्त्रविभागः

"**एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति**" इति भाष्यकारवचनात् संस्कृतव्याकरणाध्ययनस्य महत्त्वं कियद्वर्तते इति स्पष्टीभवति । सर्वशास्त्रोपकारकमिदं शास्त्रं व्याकरणम् । यथा मानवाङ्गेषु मुखं जीवितुमत्यावश्यकं तथेदं वेदपुरुषस्य मुखमिति कीर्तितं वेदाङ्गम् । संस्कृतशब्दसाधुत्त्वज्ञानमनेनैव भवति । अतः शब्दशास्त्रमित्यपि विश्रुतमिदं शास्त्रम् । व्याकरणादृते भुवनत्रयमपि गाढान्धकारे पतेत् । यतो हि संस्कृतभाषा विश्वभाषा वर्तते । इतरभाषास्तावत् केषुचित्प्रान्तेष्वेव भाषमाणा विद्यन्ते । यथा ज्योतिः स्वीयप्रकाशाविष्कारेण वस्तूनि प्रकाशयति तथा व्याकरणं स्वविश्लेषणप्रक्रियाभिः कृत्स्नभाषामवबोधयति । अत एव **महाकविर्दण्डी** संस्कृतं व्याकरणेन विना सुबोध्यं न भवतीति प्रमाणयत्यनया कारिकया ।

यथा –

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते** ॥ इति ।

संस्कृतभाषायां शब्दानामर्थतत्त्वावबोधः व्याकरणाधीनः । व्याकरणादृते शब्दानां व्युत्पत्तिः अर्थश्च नैव ज्ञायते । एतत्प्रमाणयता **भर्तृहरिणापि** व्यलेखि यथा –

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते** ॥ इति ।

इदं शास्त्रं प्रकृति–प्रत्ययादिज्ञानं प्रदाय पदानां व्युत्पत्तिं अर्थं च विवृणोति । अतोऽनेके महान्तः विद्वांस **आनन्दवर्धना**दयोऽपि **"व्याकरणमूलत्वात्सर्वविद्यानाम्"** इत्यादिवचोभिः व्याकरणस्य प्राधान्यं प्रमाणयन्ति । एवं संस्कृतव्याकरणस्य प्रत्येकमपि विषयः बहुविशिष्टो वर्ततेतराम् ।

लोकेऽस्मिन् समुद्रवत् व्याकरणं बहुविशालं वर्तते । सूत्राणि, वार्तिकानि, भाष्यमिति विषयत्रयोपेतस्य त्रिमुनिव्याकरणस्याध्ययनं महत्कष्टायेति केचन गदन्ति । शास्त्रमिदं कठिनमित्यपि प्रथा वर्तते । परन्त्वाधुनिककालेऽप्यस्मिन् शास्त्रस्यास्याध्ययनं बहुत्र प्रचलद्वर्तते इति विशेषः । तर्हि कष्टमिति मन्यमानस्यास्य शास्त्रस्याध्ययनाय सुलभोपायाः के सन्तीति अन्विषन्तः शिक्षाशास्त्रज्ञाः अनेकाः पद्धतीः, प्रणाल्यः, विधीन् चाविष्कृतवन्तः । प्रकृते केयं प्रणली ? कोऽयं विधिरिति ? किञ्चित् चर्चयामः । सिद्धान्तानां सूत्राणाञ्चाधारेण प्रणाल्यः प्रवर्तन्ते । व्याख्यानम्, विवरणम्, स्पष्टीकरणम्, कथाकथनम्, भाषणमित्याद्याः प्रणाल्यः भवन्ति ।

विधिर्नाम स्वतन्त्रपाठनसाधनं भवति । अयं विविधप्रणालीनां सहयोगेन स्वयं प्रचलितः केनापि प्रवर्तितो वा भवति। यथा – पाठ्यपुस्तकविधिः, समस्याविधिः, योजनाविधिः, आगमनविधिः इत्यादयः ।


ISSN : 2320-740X

पद्धतिशब्दः व्यापकः । तत्र व्यवस्था, पाठ्यक्रमः, विधयश्चान्तर्भवन्ति । पद्धतिरपि केनापि प्रवर्तिता वातावरणानुगुणमावश्यकताभिः स्वयं विकसिता वा भवति । यथा – परम्परागतपद्धतिः, माण्टेसरिपद्धतिः, बालोद्यानपद्धतिः चेत्यादयः । एकैकस्यामपि पद्धतौ बहवो विधयः प्रणाल्यश्च उपयुक्ताः सन्ति । संस्कृते तावत् पद्धतिः, प्रणाली, विधिः इति शब्दाः प्रायः पर्यायत्वेन व्यवह्रियन्ते ।

भाषाशिक्षणे सामान्याः विशेषाश्च केचन विधयः सन्ति । त एव विधयः संस्कृतशिक्षणे व्याकरणशिक्षणे च सामान्यतः प्रयुज्यन्ते । परन्तु केचन प्रसिद्धाः व्याकरणशिक्षणविधयोऽपि वर्तन्त एव । ते विधयः व्याकरणशिक्षणं सुलभं कारयन्ति । तेऽत्र प्रस्तूयन्ते ।

**व्याकरणशिक्षणविधयः (Methods of Grammar Education) –**

१. परम्परागतविधिः । (Traditional Method)
२. आगमन–निगमनविधी । (Inductive & Deductive Method)
३. प्रयोजनविधिः । (परियोजनाविधिः) । (Project Method)
४. प्रत्यक्षविधिः । (Direct Method)
५. ह्यूरिष्टिक्विधिः । (Heuristic Method)
६. समस्याविधिः । (Problem Method)
७. भण्डारकरविधिः । (Bhandarkar Method)
८. अनौपचारिकविधिः । (Informal Method)
९. अनुवादविधिः । (Translation Method)
१०. शिबिरविधिः । (Camp Method)
११. निदर्शनविधिः । ( Method)
१२. सहसम्बन्धविधिः । (Correlation Method)
१३. इतिहासविधिः । (Historical Method)
१४. सङ्गणकसहकृतविधिः । (Computer oriented Method)

इत्थं व्याकरणशिक्षणविधीनामावलिः निर्मातुं शक्यते । एतेष्वन्यतमोऽयं विधिः आगमनविधिः । एतर्हि अगमनविधेर्विषये किञ्चित् चर्चयामः ।

**आगमनविधेरर्थः (**Meaning of Inductive Method) – उदाहरणानि प्रस्तूय ततो नियमनिर्धारणं नाम आगमनम्। **जोसेफ् लेण्डन् प्रत्यपादयत् "यदि छात्राणां पुरतः बहून्युदाहरणानि, तत्त्वानि, वस्तूनि वाऽस्माभिः प्रस्तूयन्ते ततः परं नियमाश्च निश्चीयन्ते; तर्हि आगमनविधिरनुसृत" इत्यर्थः ।** ( We make use of the inductive method of teaching, whom ever we pare before children a number beats, examples or objects then endeavor to lead them to draw their own condition. – Joseph Landon )

प्रयोगप्रामाण्यमवलम्ब्योदाहरणानां साहाय्येन विषयस्य सामान्यीकरणं कृत्वा नियमस्य निर्धारणमेव आगमनविधिरिति नाम्ना व्यवह्रियते । अस्मिन् विधावादावेव व्याकरणनियमः परिभाषा सिद्धन्तो वा नोच्यते ।


ISSN : 2320-740X

पाठनसन्दर्भे पाठ्यांशसम्बद्धोदाहरणानि तत्त्वानि वा प्रस्तूयन्ते । तानि दृष्ट्वा श्रुत्वा तुलनां कृत्वा वर्गीकृत्य च छात्राः स्वयं नियमनिर्धारणं कुर्वन्ति । स्वयं परिकल्पितं नियममध्यापकस्य साहाय्येन पुनःपरिशीलनं कृत्वा दोषास्सन्ति चेत् परिष्कुर्वन्ति । विधावस्मिन् ज्ञातादज्ञातं प्रति, विशेषात्सामान्यं प्रति, स्थूलात्सूक्ष्मं प्रति इत्यादीनि प्रसिद्धानि शिक्षणसूत्राणि आश्रितानि ।

**आगमनविधेः सोपानानि** (Steps of Inductive Method) –

आगमनविधिना विषयबोधनाय प्रधानतया चत्वारि सोपानान्यनुसर्यन्ते । तानि सोपानानि कानीत्यत्र किञ्चिद्विचारयामः ।

१. **उदाहरणप्रदर्शनम्** (Presenting Examples) –

अध्यापकः यं विषयं (प्रकरणम्) बोधयितुमिच्छति तद्विषयकोदाहरणानि तत्त्वानि वा छात्राणां पुरतः प्रदर्शयेत्। विषेशतः विधिरयं व्याकरणबोधनायैव महदुपकरोति । यदि संस्कृतव्याकरणे सन्धिरिति प्रकरणं पाठ्यते तर्हि कथमुदाहरणप्रदर्शनं क्रियेताध्यापकेनेति सोपानमिदं पश्यामः । यथा – यद्यध्यापकः गुणसन्धिं पाठयितुमिच्छति तर्हि – **सुरेन्द्रः, गणेशः, विद्येव, रमेशः, सूर्योदयः, कालोर्मिः, कलोन्नतिः** इत्यादीन्युदाहरणानि वदन् श्यामफलके लिखित्वा प्रदर्शयति । ततः छात्राः सावधानं शृण्वन्तः उदाहरणान्यवलोकयन्ति पठन्ति च ।

२. **निरीक्षणम् (सन्धिविच्छेदः)** (Observation) –

द्वितीयं सोपानं भवति निरीक्षणमिति । सोपानेऽस्मिन् छात्राः प्रस्तुततत्त्वानामुदाहरणानां वा तुलनात्मकं निरीक्षणं कुर्वन्ति। छात्रा अध्यापकेन प्रदर्शितान्युदाहरणानि विश्लिष्य (विच्छिद्य) विवेचयन्ति । सन्धिविच्छेदसमये काञ्चन समानतामवगच्छन्ति। ततः कमपि नियमं कल्पयितुं निर्णेतुं वा प्रयतन्ते । तद्यथा – **सुर + इन्द्रः, गण + ईशः, विद्या + इव, रमा + ईशः, सूर्य + उदयः, काल + ऊर्मिः, कला + उन्नतिः** इति । एवं रीत्या सन्धिविच्छेदं जानन्ति ।

३. **नियमनिर्धारणम्** (Condition Making) –

तत्त्वानामुदाहरणानां वा निरीक्षणानन्तरं नियमनिर्धारणसोपानं तृतीयं वर्तते । अत्र छात्राः पूर्वोक्तान्युदाहरणानि तत्त्वानि वा निरीक्ष्य विश्लिष्य विचिन्त्य च नियमं परिकल्पयन्ति । पूर्वोक्तन्युदाहरणानि विच्छिद्य **अ**वर्णात्परे (अ/आ) **इ**वर्णश्चेत् (इ/ई) उभयोः स्थाने **ए**कारः, **अ**वर्णात्परे (अ/आ) **उ**वर्णश्चेत् (उ/ऊ) उभयोः स्थाने **ओ**कारः, **अ**वर्णात्परे (अ/आ) **ऋ**वर्णश्चेत् (ऋ/ॠ) उभयोः स्थाने **अर्**कारश्च आदिष्टो भवतीति निर्णेतुं प्रयतन्ते । अर्थात् द्वयोः वर्णयोः स्थाने एकैव वर्णः (एकादेशः) आदिष्टः भवतीति नियमनिर्धारणं कुर्वन्ति ।

४. **परीक्षणम्** (Applying Condition & Examining) –

निर्धारितस्य नियमस्य परीक्षणमेव अन्तिमं नाम चतुर्थसोपनम् । निर्धारितनियमस्य पुनः परिशीलनं कृत्वा निर्णयं स्वीकुर्वन्ति । निर्णयानुसारं **देवेशः, परोपकारः, महोदयः, देवर्षिः** इत्यादीनि


ISSN : 2320-740X

विभिन्नान्यन्यान्युदाहरणान्यवलोक्य लक्षणसमन्वयं कृत्वा परीक्षणं विधाय च निस्सन्देहं नियमनिर्धारणं कुर्वन्ति । यथात्र बोधितानि गुणसन्धेरुदाहरणानि परीक्ष्य **आद्गुणः** इति व्याकरणनियममवगच्छन्ति प्रमाणयन्त्यपि ।

इत्थमागमनविधिः उदाहरणद्वारा नियमनिर्धारणं कारयति । अर्थात् लक्ष्यं प्रदर्श्य लक्षणं कल्प्यते । छात्राः अनेन विधिना पाठ्यते चेदध्ययने रुचिं प्रदर्शयेयुः । एवञ्चान्तं छात्राः कक्ष्यायां सक्रिया भवन्ति । अतः विधावस्मिन् बहवो गुणाः सन्तीति वक्तुं शक्नुमः । यतो हि बहोः कालत् निगमनविधिरित्यन्यो विधिरस्य विपरीततया वर्तत एव । निगमनं नाम नियममुक्त्वा तदनन्तरमुदाहरणप्रदर्शनम् । प्रायः साम्प्रदायिकपाठशालासु व्याकरणाध्ययनरताः निगमनविधिनैवाध्ययनं कुर्वन्ति । निगमने छात्रास्तावत्सक्रिया न भवन्ति । अतोऽस्यापेक्षया आगमनविधावेवाधिका गुणाः सन्तीति प्रतिपाद्यते ।

**आगमनविधेः गुणाः** (Merits of Inductive Method) –

१. स्वाभाविकतासिद्धान्तमनुसृत्य विधिरयं प्रवर्तते ।

२. मनोवैज्ञानिकोऽयं विधिः ।

३. छात्राः चतुर्ष्वपि सोपानेषु सक्रिया भूत्वा शिक्षन्ते ।

४. छात्राः सावधानमुदाहरणान्यवलोक्य स्वयमेव तर्कसङ्गतरीत्या नियमं निर्धारयन्ति ।

५. अनेन छात्राणां तर्क–चिन्तन–विश्लेषणशक्तीनां विकासो जायते ।

६. ज्ञातादज्ञातं प्रतीति प्रधानशिक्षणसूत्रानुसारं विधिरयं वर्तते ।

७. अनेन छात्राणां रुचिरभिवर्धिता भवति ।

८. शिक्षणप्रक्रियायां ज्ञातविषयप्रस्तावेन छात्राः सोत्साहमहमहमिकया भागं गृह्णन्ति ।

९. अनेन विधिना प्राप्तं ज्ञानं चिरं तिष्ठति (अर्थात् स्थायि भवति) ।

१०. अनेन विधिना छात्राणामात्मविश्वासः आत्मनिर्भरता च वर्धते ।

**आगमनविधेः न्यूनताः (दोषाः)** (Demerits of Inductive Method) –

१. विधेरस्य प्रयोगः सर्वत्र भवितुं नार्हति । अर्थात् गणितव्याकरणादिष्वेव लाभप्रदः ।

२. प्रधानतया सर्वाण्यपि कार्याणि छात्रकेन्द्रितानीति छात्राः श्रान्ता भवेयुः ।

३. सर्वेऽपि बालाः अस्य प्रयोगे समर्था न भवेयुः ।

४. विशिष्टबालाः एव नियमनिर्धारणादिषु समर्था भवन्ति ।

५. केचन छात्राः दोषपूर्णं नियमं परिकल्प्य दुष्टं ज्ञानं प्राप्नुयुः ।

६. विधिरयं मानसिकस्वास्थ्यं विघटयेत् ।

७. महान् समयः अपेक्षितः भवति ।

८. कक्ष्याध्यापने सर्वदा उपयोगी न भवति ।



ISSN : 2320-740X

एवं दोषेषु सत्स्वपि **प्राथमिकशिक्षणे** निगमनविध्यपेक्षया लाभप्रदोऽयमागमनविधिरिति **जोसेफ् लेण्डन्** महाशयस्य कथनानुसारं महानुपयोगो वर्तत एव । माध्यमिकशिक्षणेऽपि व्याकरणबोधने विधेरस्य उपयोगः प्रभावोत्पादकः भवेदिति ममाभिप्रायः ।

एवं रीत्या आगमनविधिः सुलभतया नियमनिर्धारणं कर्तुं छात्रान् प्रोत्साहयतीति व्याकरणशिक्षणे अस्य महद्योगदानं वर्तततेराम् । निगमनविधिस्तु अस्य विरुद्धदिश्या प्रचलति । परन्तु शिक्षाविदः एतयोरैक्यं वाञ्छन्ति । यतो हि आगमनविधिः परीक्षणात्मके चतुर्थसोपाने निगमनविधिवत् कार्यं करोति । अतः परस्परमेतौ पूरकौ वर्तेते । अनयोः मेलनेन न्यूनताः सर्वा दूरीकृता भवन्ति । अत एव व्याकरणशिक्षणे आगमन–निगमनविधीति प्रसिद्धिः विद्यते। सर्वेऽप्यध्यापकाः अनेन विधिना पाठयित्वा छात्रान् क्रियाशीलान् कर्तुं यतेरन् इत्येवोक्त्वा विस्तरात् उपसंह्रियते ।

**अनुशीलितग्रन्थाः –**

१. संस्कृतशिक्षणम्, डा. च.ल.न.शर्मा तथा डा. पतेसिंहः,
२. व्याकरणशिक्षणविधयः, श्री रा. देवनाथः तथा डा. भुवनेश उपाध्यायः,
३. संस्कृत शिक्षण, डा. सन्तोष मित्तल,
४. व्याकरणशिक्षणम्, शिवराम रामकृष्ण भट्टः,

***

# बृहज्ज्ञातकस्य प्रसूतिकाध्यायोक्तयोगानां प्रश्नोपयोगित्वम्

**प्रसाद भट्टः**
**शोधच्छात्रः**

'अविदितार्थो मन्त्रस्य संसिद्धिं नाधिगच्छति' इत्यादिसदुक्तिं समाश्रित्य बह्वर्थकथनस्य प्रसक्तिः का इति चेदुच्यते तत्र विद्यमानसदादिकर्मप्रतिफलरूपफलव्यञ्जकजातकात् भूतभविष्यद्वर्तमानफलकथनाय "स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे" इति प्रतिज्ञातमिहिरोक्ताः योगाः सर्वे 'प्रश्नशास्त्राद्यर्थानामपि प्रतिपादकत्वं द्योतयन्ति' इत्यादिरुद्रोक्तिरेवेति ।

तत्र भवतां विदितमेवैतत् प्रसवकालोदयलग्नग्रहस्थितिवशान्मातापितृदशाविशेषसूतिकागृहशयनदीपलक्षणानि श्रोतृविस्मापनानि शास्त्रप्रामाण्यव्यञ्जकानि शिष्यप्ररोचनार्थमस्मिन्सूतिकाध्याये निर्देशनोत्सुकेन ज्योतिश्शास्त्रवनपञ्चाननेति बिरुदाङ्कितेन मिहिरेण


ISSN : 2320-740X

**पितुर्जातः परोक्षस्य लग्नमिन्दावपश्यति । विदेशस्थस्य चरभे मध्याद् भ्रष्टे दिवाकरे ॥ इत्यारभन्ते ।**

तत्र इन्दौ लग्नमपश्यति दिवाकरे मध्याद् भ्रष्टे चरभे विदेशस्थस्य परोक्षस्य पितुः पुत्रो जात इत्यन्वयः । अत्र विशेषेण 'विदेशस्थस्य चरभे' इत्युक्तत्वात् प्रश्नमार्गोक्तेन "चरस्थिरद्वन्द्वे बन्धो दूरान्तिकाद्वसु" इत्यादिचरादिभेदेन दूरान्तिकादिभेदाः चिन्तनीयाः इति भवद्भिर्विदितमेव । उदयस्थेऽपि वा मन्दे कुजे वास्तं समागते स्थिते वान्तः क्षपानाथे शशाङ्कसुतशुक्रयोः इत्यत्रापि पितुर्जातः परोक्षस्य इत्येवान्वयसद्भावात् उक्तेषु योगेषु जातानां दत्तकपुत्रोत्पत्तिविषयभूतः कश्चिदन्यः परोक्षः पिताप्यस्तीति द्योत्यते कार्यान्तरचिन्तनेषु प्रत्यक्षपरोक्षश्चेति द्वौ पितरौ भवतः किञ्च उद्योगचिन्तनावसरे अस्मिन्योगे जातः विदेशनिरतः भवतीति रुद्रराद्धान्तध्वनिः ।

तथा च अग्रे परोक्षस्य पितुर्जात इत्यत्र प्रस्तुतायां जननक्रियायां सम्भाव्यान् विस्मापान् योगविशेषानाह शशाङ्के पापलग्ने वा वृश्चिकेशत्रिभागगे श्लोकैस्त्रिभिः । प्रथमतया तत्र पापलग्ने वृश्चिकेशत्रिभागगे शशाङ्के शुभैः स्वायस्थितैः सर्पो वा तद्वेष्टितो वा जात इति सम्बन्धः । अत्र यथा जननलग्ने भौमद्रेक्काणगचन्द्रोदयः धनलाभस्थितसौम्यत्वञ्च सुलभतया सम्भाव्यते तथा मानुषीषु सर्पजननं सर्पवेष्टितापत्यजननञ्च न दृश्यते इति कारणतः इदं लक्षणमसम्भाव्यमिति न चिन्तनीयम् । यदा भौमद्रेक्काणस्थस्य चन्द्रस्य जननकालोदयलग्नेन समकलत्वं तत्कालानीतस्य धनभावस्य लाभभावस्य च शुभग्रहैः समकलत्वं च युगपत्सम्भवति तदैवायं योगः परिपूर्णः स्यात्। तत् किमर्थमयं योगोऽभिहितश्चेत् अस्य योगस्य समकलत्वाभावेन जातः सर्पवत् क्रूरस्वभावयुक्तः विषविद्यानैपुण्येन सर्पवेष्टितशरीरत्वादि प्रदर्शनकुशलः भवतीति रुद्रध्वनिः । रुद्रव्याख्यानमिदं न केवलं प्रौढिमाप्रदर्शकं किन्तु मिहिराचार्यहृद्गतबहुलार्थप्रदर्शकं तथा मन्दबुद्धियुक्तमादृशानपि बह्वर्थग्रहणार्थं संप्रेरकमिति भाति । तथैवात्र अनेन योगेन सर्पवेष्टित इत्युक्तत्वात् रोगप्रश्ने चर्मरोगान् स्थलप्रश्ने नागवीथिकादि देवप्रश्ने सर्पदोषम् अधुनातनाधुनिकोद्योगचिन्तनावसरे सर्पग्रहणादिना आजीविकादयोऽपि वा चिन्त्याः इति मे मतिः ।

ततः "चतुष्पदगते भानौ शेषैर्वीर्यसमन्वितैः" इत्यत्र कोशवेष्टितयमलजननयोगे कोशवेष्टिताविति कोशशब्दवाच्येन धनेन परस्परसम्बन्धवान् धनिकैत्यर्थविशेषं दर्शितवानिति कारणतः अधुनिक शेमर्किट् इत्यादीनां चिन्तनमपि कर्तुं शक्यते । तदुत्तरतः छागसिंहवृषे लग्ने इत्यादिषु नालवेष्टितः इति सद्भावात् बद्धो नवेति पृष्टे बद्धो भवतीत्यूह्यमिति दशाध्याय्यादेशः। रुद्रेण अत्र जातः सौरेण बलयुतेन यदि तन्त्रानुष्टानादिव्यापारसहितः, बलहीनश्चेत् परिकर्मादिकं, एतच्छूद्रादिषु चेत् तन्तुना मत्स्यग्रहणार्थं जालादिकं करोतीति वाच्यम् । आरेण स्वर्णमेखलाबन्धनादिकं वाच्यम् इत्युक्तत्वात् अत्र यदि रविसम्बन्धः सम्भवति तदा ताम्रं स्यान्मणिहेमयुक्ति रजसानित्यादिना ताम्रकारकत्वस्य सद्भावात् आधुनिकः electrician इत्यपि चिन्तयितुम् शक्नुमः । तथैव [1]"न लग्नमिन्दुं च गुरुर्निरीक्षते....." इत्यत्र जारयोगसद्भावादत्राजातः परस्य व्यापारेणोपजीवतीत्युपदिष्टम् । यथा "स्त्रीजितः" इतीदं फलं ग्रहबल–अवस्थानुगुणं "स्त्रिया जितः" – "स्त्रियः जितः" इत्यादिभेदेन प्रोच्यते तथैव

[1] बृहज्जातकस्य सूतिकाध्याये षष्ठे श्लोके


ISSN : 2320-740X

"परस्यव्यापारेण" इत्यत्रापि मन्तव्यमिति तथैव देवप्रश्नादौ अस्य योगस्य सम्भवे पूज्यमानमिदं सान्निध्यं नासीदत्र अस्य मूलस्थानमन्यदस्तीति अस्य पूजकः तन्त्री वा अन्यजातीय आसीदिति वा तत्तदवसरवशात् वक्तुं शक्यः इति मे मतिः । "क्रूरर्क्षगतावशोभनौ..." इत्यत्र जातस्य सूर्यस्थचरस्थिरादिराशिवशात् दूरान्तिकादिभेदेन पित्रा कृतेन दोषेण दण्डानुभवः इति रुद्रभणितिः। एतदेव अपूर्वार्थप्रकाशिकाकारेण योगेस्मिन् पितृकारकरविस्थाने मातृकारकादीनां चन्द्रादीनां सद्भावे सति तेषां बन्धनमित्युक्तत्वात् मात्रादीनां कारणेनास्य बन्धनमपि वाच्यमिति मे मतिः । [1]"पूर्णे शशिनि स्वराशिगे ..... इत्यस्मिन् योगे जातस्य समुद्रगमनादिकं सम्भवति । जलप्रश्ने योगस्यास्य सद्भावे पोतगतेत्यनेन पोतगता जनता उच्यते प्रसूयत इति अभीष्टकार्याण्युत्पादयतीति कारणतः भूरिवर्षागमनेन सर्वत्र नावमधिरुह्य गछन्ति लोकाः इति वक्तुं शक्यत इति दशाध्यायीकारस्याभिप्रायः ।

आप्योदयमाप्यगः शशी सम्पूर्णसमवेक्षतेऽथवा.....इत्यादिषु अत्र पोतप्रसूतेः सलिलप्रसूतेश्च सम्भवे प्रसूताः सद्योमरणलक्षणाभावेन जीवन्ति चेत् सलिलयाने सलिलद्रव्यस्य सम्पादने च कुशला भवन्तीति द्रष्टव्यम् । अत्र जातस्य वापीकूपतटाकादिनिर्माणं सम्भवति । स्थलराशौ चेत् स्थितावेव तैलघृतादिक्रयविक्रयं, स्थिरे जलराशौ कृषिप्रवृत्तिः चन्द्रे जलराशौ यदि समुद्रयानमिति । तथैव "उदयोडुपयोर्व्ययस्थिते...." इत्यादि योगे जातः अपि कूपतटाकारामादिव्यापारैर्जीवति। देवप्रश्ननिधिप्रश्नादिषु योगानामन्यतमस्य सद्भावात् तस्य मूलं सलिले अस्तीति आदेशः युज्यत इति ममाभिप्रायः ।

अब्जगते विलग्नगे मन्दे बुधेन दृष्टे सति "नृत्तगीतवाद्यादिभिः" इति टीकाकारेणोक्तमतः एतैः सह आचार्येण "क्रीडाभवनम्" इत्युक्तत्वात् राशिगुणादीन् अपि संयोज्याधुनिकक्रीडाप्रकाराः चिन्तनीयाः । एवमेवाब्जगते विलग्नगे मन्दे रविणा दृष्टे सुरालये अर्थात् देवालयव्यापारादिभिः पौरोहित्यकर्मभिश्च, अब्जगते विलग्नगे मन्दे चन्द्रेण दृष्टे लवणनिर्माणादिषूरभूमिषु साध्यकर्मव्यापारादिभिर्जीवन्तीत्यर्थः ।

नृलग्नगं मन्दमारेण दृष्टे बहुशवदाहादिभिः श्मशाने क्रियमाणकर्मभिः, सितेन्दूनिरीक्षिते रम्यप्रदेशस्थितिः, ईज्ये ईक्षिते सति अग्निहोत्रव्यापारादिभिः, रविदृष्टे नरेन्द्रग्रहे वा देवालये वा गोशालायां वा, बुधदृष्ट्या शिल्पालये च स्थितिर्भवति । अत्र विशेषः द्रष्टव्यः यत् बुधः यदि जलराशिस्थशनिं पश्यति तर्हि नृत्तगीतवाद्यादिभिः अथवा क्रीडाभवनमिति तथैव स एव बुधः नृलग्नगं मन्दं पश्यति तर्हि शिल्पालये स्थितिर्भवतीत्युक्तत्वात् राशिप्राधान्यमपि दृष्टव्यमिति ज्ञातं भवति । यादृशेऽपि प्रश्ने पूर्वोक्तश्लोकद्वयस्थैरष्टयोगैः अन्यतमस्य सद्भावात् चिन्त्यमानविषयस्य प्रसवः तादृशप्रदेशे जाता इति वक्तव्यमूहापोहपटुत्वेन । नरारूढलग्नगं मन्दं कुजे पश्यति सति तदा पूर्वमयं प्रदेशः श्मशानभूमिरासीत् तेनात्रनिवासिनां रोगादिसमस्याः सन्तीति मया उक्तमित्युक्तमद्गुरुवचनमधुनापि न विस्मृतवानहम्।

---

[1] बृहज्जातकस्य सूतिकाध्याये अष्टमे श्लोके



ISSN : 2320-740X

"पापेक्षिते तुहिनगावुदये कुजेऽस्ते ......" इत्यत्र "अत्र जातः सर्वदा स्वभूमिं त्यजतीत्युक्तत्वात्" "आरार्कजयोस्त्रिकोणगे....." इत्यत्र जातस्य स्वक्षेत्राद्बहिरेव दीर्घायुष्यं सुखभाक्त्वं च सम्भवति । तत्र बलाधिकेन गुरुणा दृष्टे रसायनसेवादिजनितामरत्वं, मध्यबलेन गुरुणा दृष्टे राजत्वं, स्वल्पबलेन गुरुणा दृष्टे मन्त्रित्वं च सम्भवतीत्यूह्यमूहापोहपटुबुद्धिभिः। शुभैः नीचगैः तरुसालादिषु इत्यत्र वृक्षविक्रयादिना जीवनं, यदि नैकगतैस्तु वीक्षितौ लग्नेन्दू विजने प्रसूयते इत्यत्र निर्जनदेशेऽवस्थितिरिति मन्तव्यम् । विस्तारभयात् मन्दर्क्षांशेत्यादयः श्लोकाः नात्र मया विव्रियन्ते ।

[1]"स्वतुङ्गवक्रोपगतैस्त्रिसङ्गुणं" [2]"यो यो भावस्स्वामिदृष्टो युतो वा" [3]"होरास्वामिगुरुज्ञवीक्षितयुता" इत्यादिभिः सामान्यनियमैः पूर्वोक्तेषु स्थलेषु कीदृगनुभवसमनुप्राप्तिरिति सांवत्सरिकैः भवद्भिः विदितमेव । [4]"बलहीने सति एतेषां विरोधः" इति टीकाकारेण तथा [5]"स्वोच्चत्रिकोणस्वसुहृत्......." इति ग्रन्थकारेणैवोक्तत्वात् पूर्वोक्तस्थलेषु लाभहानिरपि वक्तव्यमेव ।

होराशास्त्रकारेण मिहिरेण [6]"ग्राह्यमदः सच्छिष्यैः परीक्ष्य यत्नाद्यथा भवति" इत्युक्तवात् ऊहापोहपटुधीभिः रुद्रादिभिरुपदिष्टाः अनुभवगम्ययोगाः यत्नाद् परीक्ष्य अधुनातनाधुनिकानन्तरूपविषयविशिष्टवैविध्यमयप्रश्ननिर्धारणे प्रयोक्तव्याः इति मे मतिः । अतः साद्यस्काः सांवत्सरिकाः सर्वं विविच्य सुविचिन्त्य मिमीरन्नित्यलं विस्तरेण ।

**ग्रन्थसूची–**


प्रश्नमार्गम्

बृहज्जातकम् – (रुद्रविवरणम्)

बृहज्जातकम् – (भट्टोत्पलविवृतिः)

बृहज्जातकम् – (अपूर्वार्थप्रदर्शिका)

बृहज्जातकम् – (दशाध्यायी)


***

[1] बृहज्जातकस्य आयुर्दायाध्याये दशमे श्लोके

[2] प्रश्नमार्गस्य चतुर्दशाध्याये पञ्चविंशतितमे श्लोके

[3] बृहज्जातकस्य प्रथमाध्याये उपान्तिमे श्लोके

[4] बृहज्जातकस्य सूतिकाध्याये एकादशीयश्लोकस्य टीकान्ते

[5] बृहज्जातकस्य भावफलाध्याये एकादशीयश्लोके

[6] बृहज्जातकस्य नष्टजातकाध्याये अन्तिमे श्लोके


ISSN : 2320-740X

# श्रीपत्युक्तदृष्टिगणितस्य सोपपत्तिकं निरूपणम्

**रमानन्द भट्टः.एन्**

**शोधच्छात्रः**

अथ दृष्टिर्नाम दर्शनम् । "दृष्टिर्धीदर्शनाक्षिषु" इति वैजयन्तीकारः । सर्वोऽपि ग्रहः स्वस्थानाद् एतत्स्थानं पश्यतीत्यत्रज्यौतिषे दृष्टिपदव्यवहारः । शास्त्रे दृष्टिसमुद्भूतानि फलानिबहुधा दृश्यन्ते । **होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा...**[1], **लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेथवालोकिते...**[2] इत्यादौदृष्टेःमहान् उपयोगः । इयं च दृष्टिः षड्बलेष्वन्यतमा । **जनयति नृपमेकोप्युच्चगो मित्रदृष्टः**[3] इत्यादिना ग्रहयुत्यपेक्षयापि दृष्टेः महत्वं प्रत्यपादयद् वराहः इति व्याख्यातॄणामभिप्रायः । इयञ्च दृष्टिः वराहेण तावद् **त्रिदशत्रिकोणचतुरस्रसप्तमान्.....**[4] इत्यादिना प्रोक्ता । तत्तात्पर्यन्तु सर्वेषामपि ग्रहाणां स्वस्मात् सप्तमे स्थाने पूर्णा दृष्टिः, तृतीयदशमयोः पादप्रमाणा, पञ्चमनवमयोः अर्धप्रमाणिका, चतुर्थाष्टमयोः पादोना चेति । अत्रविशेषः मन्द–अमरेज्य–भूपुत्राः क्रमात् त्रिदश–त्रिकोण–चतुरस्राणि पूर्णं पश्यन्तीति । एतानि एषां कथितानां त्रयाणां विशेषदृष्टिस्थानानीति कथ्यन्ते ।

**यदि बलिना गुरुणा न वीक्षिताः...**[5]इत्यादौ अरिष्टभङ्गे वा, **चन्द्रे भूपबुधौ...**[6] इत्यादिदृष्टिविशेषफले वा, **वर्गोत्तमगते लग्ने चन्द्रे वा....चतुराद्यैः ग्रहैर्दृष्टे....**[7] इत्यादिराजयोगे वा दृष्टिफलकथने षड्बलपूर्णस्य बलिष्ठस्य द्रष्टुः ग्रहस्य पूर्णा दृष्टिः अपेक्षिता । सप्तमं पूर्णतया पश्यन्तीत्युक्ते कस्मिंश्चिद्राशौ वर्तमानो ग्रहः स्वस्मात् सप्तमे राशौ विद्यमानं स्वसमांशमेव पूर्णतया पश्यतीति विज्ञेयम् । अतः राश्यादौ विद्यमानः कश्चिद्ग्रहः स्वस्मात् सप्तमे राशौ राश्यन्ते विद्यमानं कञ्चिद्ग्रहं पूर्णदृष्ट्या न पश्येत् । तथा राश्यन्ते विद्यमानः कश्चन स्वस्मादष्टमे राशौ राश्यादौ वर्तमानं पूर्वोक्तादधिकतया पश्येत् । अतः स्थूलतया यदि दृष्टिः गण्यते तदा तदाश्रित्य कथितफलस्यापि स्थूलत्वाद् फले व्यभिचरितत्त्वं स्यात् । अतः दृष्टिफलस्य स्फुटानुभूत्यै सूक्ष्मतया दृष्टिसाधनं कार्यम् । तदर्थं श्रीपति–केशव–पराशरादिप्रदर्शितो मार्गः समादरणीयःसम्मान्यश्च । एतैःस्फुटफलप्रवचनाय स्फुटा दृष्टिः गणितेन साध्यते । अत्र तु श्रीपतिमतं सोपपत्ति विचार्यते ।

**श्रीपतिप्रोक्तः दृष्ट्यानयनक्रमः–**

---

[1] बृहज्जातकम्–१.१९

[2] बृहज्जातकम्–२१.०१

[3] बृहज्जातकम्–१९.०२

[4]बृहज्जातकम्—०२.१३

[5]बृहज्जातकम्–०६.११

[6]बृहज्जातकम्–१७.०१

[7]बृहज्जातकम्–११.०३



ISSN : 2320-740X

**दृश्यो द्रष्ट्रा विरहिततनुः .....**[1]इत्यादिना दृष्टिगणितक्रमः प्रोक्तः श्रीपतिना । यो ग्रहः पश्यति स द्रष्टा । तेन द्रष्ट्रा दर्शनार्हो दृश्यः। दृश्यग्रहेण द्रष्टा शोध्यः । शोधनात् तयोर्मध्यस्थितं राशिरूपम् अन्तरं ज्ञायते । तदन्तरम् आश्रित्य उत्तरत्र गणितं क्रियते । अत्र शेषाश्रयेण प्रकारान् प्रकल्प्य गणितं निरूप्यते ।

अत्रोपपत्तिः – द्रष्टुरपेक्षया दृश्यः कियतान्तरेण अग्रतोऽस्तीति ज्ञानार्थं दृश्यो द्रष्ट्रा वर्जितः क्रियते[2] । द्रष्ट्रा वर्जितदृश्यकस्य यावत्सङ्ख्यो राशिः सः अग्रे गणिते ग्राह्यः ।

**प्रथमः प्रकारः** – द्रष्ट्रा हीनो दृश्यः यदि षड्राशिभ्यः अधिकः तर्हि दशभ्यः (१० राशिभ्यः इत्यर्थः) शोध्यः । पुनः अवशिष्टस्य कलीकरणं (कलारूपेण परिवर्तनं ) कार्यम् । तदनन्तरं द्विशतोत्तरसप्तसहस्रेण (७२००)भजेत् । ततः लब्धिस्तु दृष्टिप्रमाणं भवति । अत्र षड्राशिभ्यः अधिकमित्युक्तत्वात् ग्रहाणां दशभ्यः राशिभ्यः अधिकं दृष्टेः अनुक्तत्वात् सप्तम–अष्टम–नवम–दशमराशिषु ग्रहदृष्टिसत्त्वे दृश्यद्रष्टृग्रहयोः अन्तरे क्रमात् षट्–सप्त–अष्ट–नव इति राशिरूपाःसङ्ख्याः शिष्यन्ते । एतेषु सर्वेषु अयमेव गणितक्रमः इति वेदितव्यम् । अत्र ग्रहाणां सप्तमे पूर्णदृष्टिकथनेऽपि ग्रहः स्वस्मात् स्फुटं सप्तमम् अर्थात् स्वस्फुटबिन्दोः षड्राशियोजनेन लभ्यमानं स्वस्मात् सप्तमराशिस्थं स्फुटबिन्दुमेव पूर्णतया पश्यतीति कृत्वा तस्मात् सप्तमे राशौ यत्र कुत्रापि स्थिते ग्रहे दृष्टिप्रमाणज्ञानाय अयं क्रमः तत्रापि अपेक्षित एव ।

उपपत्तिः – उत्तरत्र वक्ष्यमाणप्रकारेण ग्रहाः स्वस्मात् स्थानाद् दशभ्यः राशिभ्यः अधिकं न पश्यन्ति । सप्तमे या पूर्णा दृष्टिरुक्ता सा अपचीयमाना तस्माद् दशमराश्यन्ते शून्यतामाप्नोति । अर्थात् राशिचतुष्टये सप्तमतः दशमपर्यन्तं दृष्टेः ह्रासाभिमुखी गतिः । अतः सप्तमे या रूपमिता (१) दृष्टिः क्षयिष्णुः सा राशिचतुष्टयसमाप्तौ शून्या भवति । एकस्य राशेः १८०० कलाः । आसां १८०० कलानां चतुर्भ्यः राशिभ्यः गुणने कृते ७२०० कलाः लभ्यन्ते । अतः ७२०० इत्येतद् राशिचतुष्टयस्य कलाः इति सिध्यति । ततः त्रैराशिकम्– यदि राशिचतुष्टयकलाभ्यः (१८००) रूपमिता (१) दृष्टिः अपचीयते तर्हि अभीष्टशेषकलाभ्यः किम् इति अनुपातेन लब्धम् अपेक्षितदृष्टिप्रमाणमेवेति उपपन्नं सर्वम् । (अत्र सर्वत्र दृश्य–द्रष्टृग्रहान्तरस्थाने विद्यमानो राशिः भिन्नः, दृश्यराशिश्च भिन्नः इति लक्ष्ये स्थापितव्यम् ।)

**द्वितीयः प्रकारः**–

यदि द्रष्ट्रा हीनो दृश्यः पञ्चभ्यः राशिभ्यः अधिकोऽस्ति तर्हि तदा पञ्चहीनः कार्यः । शेषस्य कलाः साधयित्वा ताः कलाः धृतिशतेन (१८००) विभज्य यल्लभ्यते तद्दृष्टिप्रमाणं भवति ।

उपपत्तिः – अत्रोपपत्तिः पूर्ववदेव । ग्रहाणां स्फुटे राशिपञ्चकप्रदानेन तस्मात् स्फुटं षष्ठस्थानं लभ्यते । तत्र दृष्टेः शून्यता । ततः उपचीयमाना दृष्टिः सप्तमे पूर्णतामेति।तन्मध्ये अनुपातः । यदि एकराशिकलाभ्यः एका दृष्टिः तर्हि

[1]श्रीपतिपद्धतिः–२.२,३,४.

[2]केशवपद्धतिः– चतुर्थश्लोकस्य(२.१) व्याख्याने दिवाकरदैवज्ञः प्रौढमनोरमायाम्।


ISSN : 2320-740X

शेषकलाभ्यः किमिति सर्वमुपपन्नम् । अथवा अत्र एवमपि वक्तुं शक्यते यत् सप्तमतः अपचीयमाना दृष्टिः एकराश्यन्तरेषष्ठे शून्या भवतीति किन्तु अत्र उपचीयमाना दृष्टिरेव गणितेन साधिता भवति ।

**तृतीयः प्रकारः–**

यदि द्रष्ट्रा हीनो दृश्यः चुतुर्भाधिकः तर्हि तं पञ्चभ्यो राशिभ्यः शोधयेत् । अनन्तरं कलीकृत्य खखरसगुणैः (३६००) भजेत् । लब्धिस्तु दृष्टिः स्यात् ।

उपपत्तिः – ग्रहस्थानात् षष्ठे राशौ शून्या दृष्टिः । ततः वर्धमाना सा पञ्चमे राशौ अर्धरूपमिता (.५०) भवति । अतः रूपस्य दलं कार्यम् । तदा $\frac{1}{2}$ एव शिष्यते । यदि राशिकलाभ्यः अर्धरूपा दृष्टिः लभ्यते तदा अभीष्टकलाभ्यः किमिति अनुपाते कृते इदं त्रैराशिकेन सिध्यति यत् – अभीष्टकलाः×१ ÷ १८००×२ इति । पुनरत्र द्वाभ्यां राशिकलाः गुणिताः भाजकस्थाने ३६०० कलाः इति, एकेन गुणनेन व्यत्यासः नास्तीति भाज्यस्थाने अभीष्टकलाः एवतिष्ठन्तीति पूर्वोक्तसूत्रमेव लब्धम् इत्युपपन्नं सर्वम्।

**चतुर्थः प्रकारः –**

यदि द्रष्ट्रा हीनो दृश्यः राशित्रयादधिकोऽस्ति तर्हि राशिचतुष्टयात् शोध्यः । पश्चात्तस्य कलाः कृत्वा षष्टिकृत्या (३६००) योजयेत् । अनन्तरं शतविनिहतैः द्व्यश्वैः (७२००) विभजेत्तदा लब्धिः दृष्टिप्रमाणं स्यात् ।

उपपत्तिः – अत्र पञ्चमराशितः चतुर्थराशौ उपचीयमाना दृष्टिः रूपार्धतः पादोनरूपमिता भवति । अतः एकराशिकलान्तरे वर्धमाना दृष्टिः पादप्रमाणा एव । अतः रूपं (१) पादेन (१/४) विभाजयेत् । तदा पादः(१/४) एव शिष्यते । तदा त्रैराशिकन्तु अभीष्टकलाः×१ ÷ १८००×४ इति सिध्यति । तदा लब्धिस्तु शून्यतः पादप्रमाणरूपमध्ये लभ्यते । किन्तु अपेक्षितं रूपार्धतः (.५०) पादोनरूपमध्ये (.७५) भवेत् । अर्थात् रूपार्धमिता दृष्टिः तत्र लब्धौ क्षेप्या । तदपेक्षया रूपार्धमिता दृष्टिः याभिः कलाभिः लभ्यते ताः कलाः अन्तरकलासु क्षेप्यन्ते । तदानयनार्थं पुनः अत्र अनुपात्यते – यदि पाददृष्टिः एकराशिकालासु लभ्यते तर्हि रूपार्धदृष्टिः कियद्भिः इति सिद्ध्यति ३६०० कलाः । अतः ताः अभीष्टकलासु योज्यन्ते । अनेन योजनेन अभीष्टरीत्या दृष्टिप्रमाणं लभ्यते । अथ वा ३६०० कलायोजनं विहाय गणितं कृत्वा लब्धौ साक्षात् .५० योजनेनापि दृष्टिः लभ्यत इत्युपपन्नं सर्वम् ।

**पञ्चमः प्रकारः–**

यदि द्रष्ट्रा हीनो दृश्यः राशियुग्माधिकः तर्हि द्वाभ्यामूनः कार्यः । तन्मध्ये राशिद्वयं शोध्यमित्यर्थः । ततः कलीकृत्य नवशतं (९००) योजयेत् । तं व्योमखाङ्गाग्निना (३६००) भजेत् । तदा लब्धिः दृष्टिः स्यात् ।

उपपत्तिः – अत्र तृतीयराशौ विद्यमाना पादमिता दृष्टिः वर्धिष्णुः चतुर्थराशौ पादोनरूपमिता भवति । अतः अत्र एकराश्यन्तरे रूपार्धपरिमिता दृष्टिः वृद्धा जाता । अतः रूपस्य अर्धेन गुणयेत् । तदा लब्धिः अर्धं (१/२) शिष्यते । तदात्र तृतीयप्रकारे प्रदर्शितवद् अनुपातः सिध्यति । एवं कृते अत्र दृष्टिप्रमाणं शून्यतः पञ्चविंशतिपर्यन्तं लभ्यते । किन्तु अत्र दृष्टिप्रमाणं पञ्चविंशतेः (.२५) आरभ्य पञ्चसप्ततिपर्यन्तं (.७५) वर्धते इति एतन्मध्ये कुत्रापि दृष्टिः


ISSN : 2320-740X

भवेत्। अतः अभीष्टकलासु राश्यर्धकलाः योज्यन्ते। अत्र एकराश्यन्तरे विद्यमानं दृष्टिप्रमाणम् अर्धरूपमितम् । अतः अत्र अधिकं दृष्टिप्रमाणं रूपार्धमेव । अतः अत्र अभीष्टकलास्थाने अत्यधिकं १८०० कलाः एव । अर्थात् १८००कलाभ्यः रूपार्धमिता दृष्टिः लभ्यते । अत्र अपेक्षिता पादमिता दृष्टिः । तदा अनुपातः रूपर्धदृष्टिः १८०० कलासु लभ्यते चेत् पाददृष्टिः कियतीषु इति लब्धिः ९०० कलाः । एतदभीष्टकलासु योजयित्वा भाज्यते चेत्तदा पूर्वप्रदर्शिताभीष्टप्राप्तिः भूयात् । अत्र अन्तरकलाः एव ३६०० कलातः विभज्य लब्धदृष्टिप्रमाणे साक्षात् पाददृष्टिप्रमाणस्य (.२५) योजनेन वा अभीष्टसिद्धिः भवतीति सर्वमुपपन्नम् ।

**षष्ठः प्रकारः –**

यदि द्रष्ट्रा हीनो दृश्यः एकगृहाधिकोऽस्ति तर्हि एकोनितः कार्यः । ततः कलीकृत्य द्व्यश्वशतैः (७२००) विभजेत् । लब्धिस्तु दृष्टिः स्यात् ।

उपपत्तिः – ग्रहे एकराशिदानेन लभ्यमाने स्फुटद्वितीयराशौ शून्या दृष्टिः । सा वर्धमाना तृतीयराशौ पादप्रमाणा भवति। अतः रूपं पादेन (१/४) गुणयेत् । शेषस्तु पादः (१/४) एव । तदा अनुपातः एकराशिकलासु (१८००) पादप्रमाणा दृष्टिः (१/४) वर्धते चेत् अभीष्टकलासु किमित्यनुपातेन अपेक्षितदृष्टिप्रमाणप्राप्तिः इत्युपपन्नम् सर्वम् ।

**अत्र विशेषः–** यदि द्रष्ट्रा हीनो दृश्यः दशराशिभ्योधिकोऽस्ति तर्हि दृष्टिगणितं न कार्यम् । यतः **दिग्भ्योधिकं** (१०) **पश्यति नो ग्रहेन्द्रः**[1] । कोपि ग्रहः दशभ्यः राशिभ्यः अधिकं न पश्यति । द्रष्टुः एकादशद्वादशराश्योः दृष्टिः शून्येत्यर्थः।

**उपरिप्रदर्शितोपपत्तेः स्पष्टज्ञानाय कोष्ठकः–**

| **राशयः** | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **अन्तरम्** | ० | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ |
| **दृष्टिप्रमाणम्** | ० | ० | .२५ | .७५ | .५० | ० | १ | .७५ | .५० | .२५ | ० | ० |

**अथ विशेषदृष्ट्यानयनम्–त्रि–द्वि–एकपादाः क्रमशो निधेयाः...**[2]इत्यादिभिः अयं गणितक्रमः श्रीपतिना प्रोक्तः । विशेषदृष्टिविषयःमया पूर्वमेव प्रदर्शितः । दृश्यो द्रष्ट्रा विरहिततनुः.. इत्यादिना पूर्वोक्तवदेव दृष्टिरानेया विशेषदृष्टिस्थलेपि । ततः क्षेपका उच्यन्ते । शनैश्वरस्य विशेषदृष्टिस्थानं तृतीयदशमयोः । तत्र पूर्वोक्तवद्दृष्टिं संसाध्य पादत्रयं (.७५) योजयेत् । अस्य अयमर्थः । अत्र शनैश्वरो द्रष्टा । दृश्यो द्रष्ट्रा विरहिततनुरिति कृते राशिद्वयं राशिनवकं वा शिष्यते । तदा गणितागतदृष्टिप्रमाणे चरणत्रयं क्षेप्यम् । यदि प्रोक्तस्थानान्नवकात् भागाः अधिकाः वा न्यूनाः भवन्ति तर्हि तैः न्यूनाधिकभागैः सह क्षेपं अनुपातयेत् । एवं राशिद्वयेपि । एवमेव गुरोः पञ्चमनवमयोः,अन्तरे ४–८ सति पादद्वयं (.५०), कुजस्य चतुर्थ–अष्टमयोः, अन्तरे ३–७ सति पादमेकं (.२५)योजयेत् । अनुपातो यथा– स्वस्वक्षेपाः प्रोक्तस्थानादूनाधिकांशैः गुणिताः त्रिंशद्भक्ताः लब्धयो भवन्ति । तदागता लब्धयः पुनः स्वस्वक्षेपैः

---

[1]श्रीपतिपद्धतिः–२.४

[2]श्रीपतिपद्धतिः–२.५


ISSN : 2320-740X

विशोधनीयाः । तदा स्फुटविशेषदृष्टिः लभ्यते । पुनः सा विशेषदृष्टिः पूर्वानीतदृष्टिप्रमाणेन युता ग्रहस्य तत्स्थाने स्पष्टदृष्टिप्रमाणं भवतीति विशेषदृष्टिगणिते विशेषाः ।

उपपत्तिः – अत्र प्रोक्तस्थाने क्षेप्या दृष्टिः पूर्णा एव । ततः राशेः उभयत्रापि क्षयिणी गतिः दृष्टेः । राशिसन्ध्योःक्षेप्यदृष्टिप्रमाणं शून्यम् । अनुपातागतं दृष्टिप्रमाणं दृष्टेः ह्रासप्रमाणं दर्शयति न तुविशेषदृष्टिप्रमाणं सूचयति। अतः पुनः तावद्ध्रसिते कियान् भागः क्षेपे अवशिष्टः इति ज्ञानार्थं क्षेपेण वियोगः कार्यः । ततो लब्धा विशेषदृष्टिः । सा पूर्वानीतसामान्यदृष्टिप्रमाणेन युता तत्स्थाने ग्रहस्य स्पष्टा दृष्टिरिति सर्वमुपपन्नम् ।

**विशेषदृष्टिकोष्ठकः**

| ग्रहाः | विशेषदृष्टिस्थानानि | प्रोक्तस्थाने अन्तरम् | क्षेप्यम् |
|---|---|---|---|
| शनैश्वरः | ३–१० | २–९ | .७५ |
| गुरुः | ५–९ | ४–८ | .५० |
| कुजः | ४–८ | ३–७ | .२५ |

दृष्टिगणितस्य महती अपेक्षा वर्तते होराशास्त्रे । **श्रेष्ठेति सा सप्तमदृष्टिरेव सर्वत्र वाच्या न तथान्यदृष्टिः**[1]इति नियमदर्शनेपि ग्रह–भावफलं बलाश्रितमिति कृत्वा ग्रहभावयोः बलनिर्धारणे दृष्टेः अपेक्षितत्त्वात् तत्साधनीभूतं दृष्टिगणितं सर्वथा अपेक्षितम् इत्यतः पूर्वोक्तनियमस्य सर्वत्र साङ्गत्यं नास्तीति मे मतिः । **होराविदां दृक्फलनिर्णयाय**[2] इदं गणितमुच्यते इत्याह श्रीपतिः । तस्य अर्थं विविच्यन् **"शुभाशुभदृष्टिसङ्करे किं फलं वक्तव्यमिति सन्देहे, दृष्टिफलस्य न्यूनाधिकभावविचारे वा सति अनेन निर्णयो भवति । जातकशास्त्रेषु अनुपातो नोक्तः इति तत्र दृष्टितारतम्यो नोक्तः इति भावः"**[3] इति दृष्टितारतम्यज्ञानाय इदं गणितमावश्यकमिति दृष्टिगणितस्य महत्त्वं प्रकटीचकार तत्रभवान् कृष्णदैवज्ञः स्वीयश्रीपतिपद्धतिव्याख्यायाम् । अतः फलप्रवचने महदुपयोगी अयं गणितक्रमः सर्वैः समादरणीयो वर्तते । स चात्र मद्गुरूणामनुग्रहेण सोपपत्ति निरूपितः । सोपपत्ति निरूपणमेव अत्र विशेषः । अत्र यद्यसद्दृष्टं तत्सूच्यताम् इति विद्वत्सु निवेदयन् विरमामि विस्तरात् ।

**ग्रन्थसूची–**


१)श्रीपतिपद्धतिः–वि.सुब्रम्हण्यशास्त्री

२)केशवपद्धतिः–डा.सुराकान्त झा

३)बृहज्ज्ञातकम्– रुद्रविवरणम्

४)बृहज्ज्ञातकम्– भट्टोत्पलविवृतिः

५)श्रीपतिपद्धतिः–कृष्णदैवज्ञकृतव्याख्या

६)बृहत्पराशरहोराशास्त्रम्


[1]फलदीपिका–५.९

[2]श्रीपतिपद्धतिः–२.१

[3]श्रीपतिपद्धतिः–कृष्णदैवज्ञकृतव्याख्यायाम्–२.१


ISSN : 2320-740X

७)सारावली– गजानन प्रकाशन

८)लीलावती

९)दशाद्ध्यायी

१०)अपूर्वार्थप्रकाशिका

११)फलदीपिका

***

# सहृदयनिरूपणम्

**नरेन्द्र बि. एस्.**

अनुसन्धाता साहित्यविभागः

साहित्यशास्त्रस्य प्रमाणभूतेषु काव्यतत्त्वेषु सहृदयाः एव मुख्यतया सम्भाव्यन्ते । प्राचीनैः आलङ्कारिकैः सहृदयतत्त्वं यद्यपि मुख्यतया न विवृतम् अथाऽपि तत्र तत्र सूत्ररूपेण सहृदयतत्त्वं विवृतं दृश्यते । कैश्चित् नवीनैरालङ्कारिकैरपि सहृदयतत्वं निरूपितं वरीवर्ति । यथा स्वप्रतिभया कविः काव्यरचनां विधास्यति अर्थगाम्भीर्यंच संस्थाप्य काव्यं संञ्जीवयति । तथा सहृदयोऽपि काव्ये अन्तर्निहितानि गूढानि गम्भीरानि च तत्त्वानि अवगन्तुं समर्थो भवति । कविः काव्यनिर्माता, सहृदयस्तु तत्त्वार्थदर्शी । स च सहृदयः कारयित्री भावयित्रीति प्रसिध्दया प्रतिभया पूर्णो भवति । कवेः सहृदयस्य च काव्येन सह अभिन्नसम्बन्धः । तदेवोक्तं यथा सरस्वत्या तत्त्वं कवि सहृदयाख्यं विजयते इति । अज्ञातेन कविनाऽपि प्रोक्तं, पद्यमिदं कालेऽस्मिन् प्रकृतमिति भाति ।

**इतरतापशतानि वितर तानि सहे चतुरानन । अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ॥**

यथा प्रज्ञाचक्षुषः समक्षे रमणीकटाक्षं तस्य हृदयाकर्षकसौन्दर्यं सलज्ञाचाञ्चल्यादिकं व्यर्थं तथा रमणीनां रतिजन्यः सीत्कारः बधिरस्य प्रियतमस्य समक्षे व्यर्थः तद्वदेव अरसिकानां (असहृदय) सामुख्ये सौन्दर्यात्मिका रतिः व्यर्था । सौन्दर्यास्वादकः केवलं सहृदय एव सक्षमः । प्रेक्षकलक्षणम्  आचार्यभरतमुनिना कथितमस्ति यथा–

**मृदुललितपदार्थं गूढशब्दार्थहीनं बुधजनसुखयोग्यं बुध्दिमन्नृत्तयोग्यम् ।**
**बहुरसकृतमार्गं सन्धिसन्धानयुक्तं भवति जगति योग्यं नाटकं प्रेक्षकाणाम्**[1] ॥

मृदुललित पदार्थः, गूढपदार्थविहीनः, पण्डितानां सुखप्रदायकः, बुध्दिमन्नृतयोग्यम्, नाना रसविभूषितं, सन्धिसमन्वितं नाटकं जगति सहृदय प्रेक्षकाणां योग्यं भवति । नाट्यशास्त्रे सप्तविम्शत्यध्याये भरतमुनिः प्रेक्षकगुणान् विस्तारतया वर्णितम् ।

**चरित्राभिजनोपेताः शान्तिवृत्तश्रुतान्विताः । यशोधर्मरताश्चैव मध्यस्था वयसान्विताः ॥**
**षडङ्गनाट्यकुशलाः प्रबुध्दाः शुचयः समाः । चतुरातोद्यकुशला नेपथ्यज्ञाः सुधार्मिकाः ॥**
**देशभाषाविधानज्ञाः कलाशिल्प विचक्षणाः । एवं विधास्तु कर्तव्याः प्रेक्षका नाट्यदर्शने ॥**

---

1 . नाट्यशास्त्रम्– अध्याय– १७कारिका–१२३



ISSN : 2320-740X

**अव्यग्रैरिन्द्रियैः शुध्द ऊहापोहविशारदः । व्यक्तदोषोऽनुरागी च स नाट्ये प्रेक्षकः स्मृतः ॥**

**यस्तुष्टौ तुष्टिमायाति शोके शोकमुपैति च । दैन्ये दीनत्वमभ्येति स नाट्ये प्रेक्षकः स्मृतः[1] ॥**

एवं प्रकारेण प्रेक्षकलक्षणम् , गुणज्ञातानिर्धारणं कृत्वा ज्ञानम्, कर्म, विषयाश्रयभेदं कथयति पुनश्च भरतमुनिः नाट्यशास्त्रे–

**न चैते गुणाः सर्व एकस्मिन् प्रेक्षके स्मृताः । तस्माद्बहुत्वात् ज्ञानानामल्पत्वादायुषस्तथा ॥**

**उत्तमाधाममध्यानां सङ्कीर्णायां तु संसदि । न शक्यमधमैर्ज्ञातुमुत्तमानां विचेष्टितम् ॥**

**यद्यस्य शिल्पं नेपथ्यं कर्म वाक् चेष्टितं तथा । तस्य तेनैव तत् साध्यं स्वकर्मविषयाश्रयम् ॥**

**उत्तमाधममध्यानां बृध्दबालकयोषिताम् । तुष्यन्ति तरुणाः कामे विदग्धाः समयाश्रिते ॥**

**अर्थेष्वर्थपराश्चैव मोक्षेष्वथ विरागिणः । नानाशीलाः प्रकृतयः शीले नाट्यं प्रतिष्ठितम् ॥**

**शूरा बीभत्सरौद्रेषु नियुध्देष्वाहवेषु च । धर्माख्यानपुराणेषु वृध्दस्तुष्यन्ति नित्यशः ॥**

**बाला मूर्खास्त्रियश्चैव हास्यनैपथ्ययोः सदा । एवं भावानुकरणैर्यो यस्मिन् प्रविशेन्नरः ॥**

प्रेक्षकस्तु स मन्तव्यो गुणैरेतैरलङ्कृतः ।[2]

भरतमुनि अनुसारेण प्रेक्षकः सर्वगुणसम्पन्नः । अस्य मतमस्ति 'प्रेक्षकः स्व अवस्थानुसारेण स्वानुरूप विषय विशेषेषु अभिरुचिं प्राप्यति । ध्वनिकार आनन्दवर्धनस्य कथनमस्ति–

**वैकटिका एव हि रत्नतत्त्वविदः । सहृदया एव हि काव्यानां रसज्ञा ॥[3]**

स्वर्णकार एव रत्नमौल्यं ज्ञातुं शक्नोति, तद्वदेव सहृदय एव काव्यरसज्ञः भवितुमर्हति ।

ध्वन्यालोकलोचनकारः अभिनवगुप्तः सहृदयं विमृशति यथा –

**"येषां काव्यानुशीलनाभ्यासवशातद्विषदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते स्वहृदय संवादभाजः सहृदयाः"** । यथोक्तम् –

**योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः । शरीरं व्याप्यते तेन शुष्कं काष्ठामिवाग्निना ॥[4]**

यस्य हृदयदर्पणः काव्यानुशीलन अभ्यासेन निर्मलः भवति । हृदयदर्पणे वर्णनीय विषयात् तन्मयक्षमता आगच्छति। स एव काव्यार्थेन सह हृदयसंवादयोग्य सहृदयः । हृदय हृदय संमीलनेन यः अर्थः आगच्छति अस्य भाव रसोन्मीलकः भवति । यथा शुष्के काष्ठे अग्निः व्याप्यते तथा अर्थे रसप्रकाशः व्याप्यते । एतादृश रसगर्भित अर्थं

1.नाट्यशास्त्रम् अध्याय–२७ कारिका ५०–५५

2.नाट्यशास्त्रम् अध्याय – २७ कारिका–५६–६२

3 . ध्वन्यालोक–तृतीय उद्योत– कारिका– ४८वृत्ति

4 . ध्वन्यालोकप्रथमोद्योते– कारिका १– लोचनव्याख्याने


ISSN : 2320-740X

आनन्दवर्धनः वाच्य प्रतीयमानमिति भेदद्वयेन प्रतिपादितम् इदमेव सहृदयश्लाघ्य अर्थः, अत्रैव सहृदयहृदयविश्रान्ति अनुभूयते ।

काव्यालङ्कारकारिकाकार आचार्य रेवाप्रसादद्विवेदिमहोदय सहृदयभूमिकया काव्यं विचार्यते यथा –

**काव्यं कला, कलानाथो जीवात्मा, ये च भेदकाः । ते कलायामलङ्कारः, कलानाथे च ते रसः ॥**[1]

नाथत्वं कवौ जनकत्वात्, सहृदये च भोक्तृत्वात् । इदमेव च कलां प्रति नाथत्वं यत् प्रतिभासाक्षात्कारः । प्रतिभा चासौ द्विविधा कारयित्री, भावयित्री चेति । अनयो कवेरुपकुर्वाणा कारयित्री । अयमेव चोपकारो यत् प्रज्ञाकादम्बिनीगर्भे विद्युदुद्योतसोदरोऽर्थविशेषप्रतिभासः । विशेषश्च चमत्कारौपयिकं स्पृहणीयत्वम् । चमत्कारश्चानन्दसंप्लवः। स च सहृदयैकानुभवसाक्षिकः । ततश्च विशेष एष फलैकानुमेयः । फलं च सहृदयानन्दसंप्लवः, तादृशसंप्लवक्षमत्वं च, वनस्थिते दण्डादौ नगरस्थं घटादिकं प्रति कारणत्वमिव । ततश्चाप्राप्तपरहृदयसत्कारमपि काव्यमरहितकाव्यभावम् । भावकस्योपकुर्वाणा च प्रतिभा भावयित्री । उपकारश्च तथाविध एव यथाविधः कवौ । कविभावकयोः संवादस्य काव्यजीवातुत्वात् । अत्र द्वितीयं कलानाथपदं सहृदयमात्रपरम्, कवौ काव्यरसस्यानङ्गीकारात् ।

कलानाथावुभावत्र कविः सहृदयस्तथा ।[2]

सहृदयभूमिकाया काव्यलक्षणं यथा –

**ज्ञानात्मकेन शब्दाख्येनार्थेनार्थान्तरात्मकः । यः कश्चन चमत्कारी बोधः काव्यं स उच्यते ॥**[3]

पं० विद्यानिवास मिश्र विरचित 'सहृदय' नामक ग्रन्थे सरस्वती वस्तुतः सहृदय व्यापार देवता वर्तते । अत्र सरस्वती जातीय श्रध्दा वर्तते तद्ज्ञानमेव सहृदयता ।[4]

सहृदयता एका सामाजिकसिध्दता । लोके स्थित्वा सुखदुखादि सोड्वा लोकमात्रता सामाविष्य नागरीकथा उत्पादयति । सम्बन्धिनः, कुटुम्बिनः, समकालीन न भवति चेदपि तेषां सुखदुखेषु भागं गृहीत्वा स्व सुखदुखान् विस्मरति । स एव तन्मयीभवनयोग्यता ।[5]

निरूपयति कालिदास रघुवंशे यथा–

**नृत्तं मयूराः कुसुमानि वृक्षा दर्भानुपात्तानविजहुर्हरिण्यः । तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेपि ॥**[6]

---

[1] काव्यालङ्कारकारिका– कारिका– १३१

[2] . काव्यालङ्कारकारिका, १३२ कारिका पूर्वभागः ।

[3] . काव्यालङ्कारकारिका, १३४ कारिका ।

[4] . सहृदय–द्वितीयव्याख्यान–पृ०–२९–३०

[5] . सहृदय–द्वितीयव्याख्यान–पृ०–२९–३०

[6] . रघुवंशम्– १४/६६


ISSN : 2320-740X

इत्थं प्रकारेण काव्यतत्त्वज्ञैः स्वमौलिककाव्यलक्षणादिग्रन्थेषु सहृदयनिरूपणं न विस्तरतया कृतम् । परन्तु सन्दर्भानुसारेण विषयानुसारेण निरूपितम् ।

सन्दर्भ ग्रन्थसूची–

१. नाट्यशास्त्रीयानुसन्धानम्, रामजीउपध्याय (चौखाम्बा विद्याभवन वारणासी द्वि० सं० –१९९२)

२. काव्यालङ्कारकारिका, रेवाप्रसादद्विवेदि (चौखाम्बा सुरभारती प्रकाशन, वारणासी प्र० सं०–१९७७)

३. सहृदय, विद्यानिवास मिश्र (साहित्य अकाडमी, दिल्ली, प्र० सं० –१९९४)

४. ध्वन्यालोक –बालप्रियाव्याख्यानसहित ( चौखाम्बा सुरभारती प्रकाशन, वारणासी प्र० सं०–१९४०)

५. संस्कृत काव्यशास्त्र की अर्वाचीन परम्परा ( राजमङ्गल यादव , प्रतिभा प्रकाशन दिल्ली प्र० सं०–२०११)

६. भरतमुनिप्रणीतनाट्यशास्त्रम् (वटुकनाथशर्मा, बलदेव उपाध्यायश्च, – चौखाम्बा सुरभारती प्रकाशन, वारणासी प्र० सं०–१९८०)

***

# लक्षणानिरूपणम्

**राजेश एम् डि**

शोधच्छात्रः

साहित्यशास्त्रे शब्दस्य त्रिप्रकारत्वं काव्यशास्त्रज्ञैः अङ्गीकृतम् । तेषु मम्मटाचार्यादि प्राचीनशास्त्रज्ञादारभ्य आधुनिकपण्डितराजजगन्नाथपर्यन्तं स्वस्वग्रन्थेषु एतद्विषयं निरूपितवन्तः । तत्र मम्मटाचार्येण स्वग्रन्थे काव्यप्रकाशे द्वितीयोल्लसे आदिकारिकायां शब्दस्य त्रिविधत्वं प्रतिपादितं यथा – 'स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा' इति । तदनन्तरं वाचकस्य लक्षणं सुस्पष्टतया निरूप्य लक्षणां निरूपयति । लक्षणाशक्तिः क्वचिद् भक्तिपदेन, क्वचिद् गौणपदेन क्वचिच्चोपचारपदेनोक्ताऽस्ति । तत्र तावद् साहित्यशास्त्रस्य तत्त्ववेतृषु **मम्मटाचार्यः** अन्यतमः । तन्मतानुसारेण लक्षणा यथा –

**"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥"**[1]

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगात्, 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात्, मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः प्रसिद्धेः तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथाप्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

[1] काव्यप्रकाश द्वितीयोल्लसः पृ. सं. १३ – १४



ISSN : 2320-740X

मुख्यार्थबाधः शक्यसम्बन्धो रूढिप्रयोजनान्यतरच्चेति हेतुत्रयवचनात् अन्योऽर्थो लक्ष्यते(प्रतिपाद्यते) सा लक्षणा अरोपिता क्रिया भवति । अत्र व्यञ्जनायाम् अतिव्याप्तिवारणाय लक्षणे 'तद्योग' इति दलं निवेशितम् । योग इत्यस्य सम्बन्धः इत्यर्थः । मुख्यस्याप्यभिधारूप–मुख्यार्थसम्बन्धेन प्रतिपादनं सम्भवतीति तद्वारणायान्य इति दलं प्रयुक्तम् । अन्योऽमुख्यः । यदिति गुणीभूतलक्षणाक्रियामात्रपरामर्शः । तेन 'शक्यसम्बन्धेनाशक्यप्रतिपत्तिर्लक्षणां' इति प्राचीनमतेनैतल्लक्षणम् । 'तद्धेतुः शक्यसम्बन्धो लक्षणा' इति परमार्थः। प्रतिपत्ति हेतुर्हि वृत्तिः । न तु प्रतिपत्तिरेव । यत्तु यदित्यस्य यत इत्यर्थकतया सम्बन्धपरतयैव सूत्रव्याख्यानं तदयुक्तम् । '**नाभिधा समयाभावाद्धेत्वभावान्न लक्षणा ।**' इत्यत्र 'मुख्यार्थबाधदित्रयं हेतुः' इति व्याख्यानविरोधात् । न हि सम्बन्धरूपत्वे लक्षणायाः सम्बन्धो हेतुर्घटते ।

ननु प्रतिपादनं चेल्लक्षणा, न तर्हि शब्दधर्मः । गङ्गादिशब्दानां तीरादिकमुपस्थाप्य विरामे तीराद्यर्थेनैव स्वसम्बन्धेन तीराद्यर्थप्रतिपादनाल्लक्ष्यस्य पदेन सम्बन्धविरहाच्चेत्यत आह शक्यव्यवहितलक्ष्यार्थविषयत्वाच्छब्दः आरोपित एव स व्यापारः। वस्तुतोऽर्थनिष्ठ एवेत्यर्थः । तदेतदुक्तं – 'सान्तरार्थनिष्ठ' इति ।" एषः प्रदीपकारस्य आशयः ।[1]

'कर्मणि कुशल' इत्यत्र कुशलशब्दस्य व्युत्पत्तिलभ्यो अर्थो भवति कुशान् लाति आदत्ते इति । प्रकृते कुशलशब्दस्य मुख्यार्थस्य असङ्गतत्वात् बाधे सति विवेचकत्वादिसम्बन्धेन दक्षः इत्यर्थे रूढत्वात् रूढिलक्षणा भवति । इत्थञ्च नागेश्वरीटीकाकारः विवृण्वुते यथा – "कुशलान्दर्भान् लाति आदत्त इति व्युत्पत्त्या कुशलपदं कुशग्राहिणि शक्तं चतुरे तु रूढ्या लाक्षणिकं कर्मणीत्यस्य चित्रकर्मणीत्यर्थः ।"[2]

गङ्गायां घोष इत्यत्र गङ्गापदस्य शक्यार्थो भवति प्रवाहः । तस्य सम्बन्धस्तीरेण सह । अत एव तीररूपः सम्बन्धी लक्षणारूपसम्बन्धेन लक्ष्यते । तादृशसम्बन्धः क्वचित् सादृश्यं, क्वचिच्च सादृश्येतरसामीप्यादि । एष सम्बन्ध एव लक्षणास्वरूपम्। एतेषां सम्बन्धानां भेदाल्लक्षणापि बहुधा भिद्यते । एतदेव अभिनवगुप्तेन उक्तम् यथा –

"**अभिधेयेन सादृश्यात् सारूप्यात् समवायतः । वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता ॥**"[3] इति ।

**पण्डिराज जगन्नाथस्य मतानुसारं लक्षणा निरूपणम् ।**

**"शक्यसम्बन्धो लक्षणा ।"**[4]

यत्किञ्चिच्छक्यार्थप्रतियोगिको यत्किञ्चिदर्थानुयोगिकः सम्बन्धविशेषो लक्षणापदार्थः । स च सम्बन्धः भिन्नभिन्नस्थानेषु भिन्नप्रकारेण सम्भवति । यद्यपि एतद्सम्बन्धः अर्थे तिष्ठति तथापि

---

[1] प्रदीपटीका पृ. सं. ३८ – ३९

[2] नागेश्वरी टीका पृ. सं. १४

[3] ध्वन्यलोक लोचन पृ. सं. ३१

[4] रसगङ्गाधरः पृ. सं. २२३


ISSN : 2320-740X

स्वप्रतियोगिवाचकत्वसम्बन्धस्य पदे स्थितत्वात् उक्तसम्बन्धरूपा लक्षणा पदनिष्ठा इति ज्ञेयम् । प्रतिपादितलक्षणायाः बीजं किमिति जिज्ञासां वृत्तौ निरूपयति यथा– 'तस्याश्चार्थोपस्थापकत्वे मुख्यार्थतावच्छेदके तात्पर्यविषयान्वयितावच्छेदकताया अभावो न तन्त्रम् । शक्यतावच्छेदकरूपेण लक्ष्यमाणस्य स्वीकारात् । किं तु तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थप्रतियोगिकताया अभावो रूढिप्रयोजनयोरन्यतरच्च तन्त्रम् । मुख्यार्थान्वयानुपपत्तेः तन्त्रत्वे तु 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र लक्षणोत्थानं न स्यात् ।'

एतादृशलक्षणायाः बीजम् अन्वयानुपपत्तिरुत तात्पर्यानुपपत्तिरित्यस्मिन् विषये विवदन्ते विचक्षणाः । अन्वयानुपपत्तिरेव तद्बीजमिति केचित् । तथाङ्गीकारे 'काकेभ्यो दधि रक्ष्यताम्', 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यादिषु प्रसिद्धलक्षणास्थलेषु लक्षणा नाङ्गीकर्तुं शक्या, तत्रान्वयानुपपत्तेरभावादित्यन्ये । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र दध्युपघातकेभ्यो काकशुनकमार्जालादिभ्यो दधि रक्ष्यतामिति तात्पर्ये, काकस्यापि दध्युपघातकत्वात्तस्मादपि दध्नः रक्षणीयत्वात् काकशब्दस्यान्वयोऽपपत्तिरेव वर्तते नानुपपत्तिः । तथैव 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यत्र रात्रौ वक्तव्यमित्यत्रैव तात्पर्यमतः मेघाच्छन्ने रात्रौ नक्षत्राणामदृश्यत्वेऽपि वक्तुं शक्यत एव। किन्तु रात्रौ नक्षत्राणां सत्वात् नक्षत्रदर्शनस्याप्यन्वयो वर्तते एवेति नानुपपत्तिः । एवं लक्षाणायां तात्पर्यानुपपत्तेर्बीजत्वं स्वीकारणीयम् ।

तात्पर्यानुपपत्तिः द्विधा भवति । १. मुख्यार्थतावच्छेदके तात्पर्यविषयान्वयितावच्छेदकताया अभावः । २. तात्पर्यविषयान्वये मुख्यार्थतावच्छेदरूपेण मुख्यार्थप्रतियोगिकतायाः अभावः इति । अत्र प्रथममतस्याङ्गीकारे गङ्गायां घोषः इति प्रसिद्धलक्षणाप्रयोगे लक्षणा न स्यात् । यतो हि एतन्मतानुसारेण तात्पर्यविषयीभूतेऽन्वये मुख्यार्थतावच्छेदकस्य गङ्गत्वस्य सर्वथैव यद्यनन्वयस्तर्ह्येव लक्षणा अवतरेत् । परन्तु अत्र तन्न सम्भवति । अतः द्वितीयमतमनुसर्तव्यं भवति । तदा गङ्गायां घोषः इत्यत्र लक्षणा सम्भवति, तत्र प्रवाहरूपेण प्रवाहत्वरूपमुख्यार्थप्रतियोगिकताया अभावस्तत्र वर्तते इति हेतोः । सरलाटीकायामिदं स्पष्टीकृतमस्ति – "गङ्गापदस्य मुख्योऽर्थः गङ्गाप्रवाहः, मुख्यार्थतावच्छेदकं गङ्गात्वम्, तद्धि सर्वथैव तात्पर्यविषयान्वयितावच्छेदकं न भवेत् । अर्थात् तात्पर्यविषयीभूतेऽन्वये मुख्यार्थतावच्छेदकस्य सर्वथैव यदि अनन्वयस्तदैव लक्षणावतरेदिति न कारणम् । लक्ष्यस्य तटाद्यर्थस्य मुख्यार्थतावच्छेदकरूपेण प्रतीतेः स्वीकारात् तदैव हि शैत्यपावनत्वरूपप्रयोजनस्य प्रतिपत्तिः । तात्पर्यविषयीभूतेऽन्वये मुख्यार्थतावच्छेदकरूपेण मुख्योऽर्थोऽभावस्य प्रतियोगी भवति, अर्थात्तत्रमुख्योऽर्थः मुख्यार्थतावच्छेदकरूपेण नान्वेति, अपि तु लक्ष्यार्थेन सह सम्बद्धतयाऽऽनुषङ्गिकरूपेण । ततश्च लक्षणायां मुख्यार्थस्यान्वये सत्यपि मुख्यार्थतावच्छेदकरूपेण मुख्यार्थस्यान्वयो न भवति । एवं च मुख्यार्थतावच्छेदकतया मुख्यार्थस्यान्वये सत्यपि मुख्यार्थप्रतियोगिकोऽभावः, रूढिप्रयोजनयोर्मध्ये एकतरच्च लक्षणायां कारणमिति सारम् इति ।"[1]

[1] सरलाटीका पृ. सं. – १८५


ISSN : 2320-740X

**जगन्नाथमम्मटाचार्ययोः मते साम्यताप्रतिपादनम् –**

मम्मटाचार्यजगन्नाथयोः नये सर्वत्र शक्यतावच्छेदकरूपेणैव लक्ष्यमाणस्य प्रतीतिः । अन्यथा 'गङ्गायां घोषः' इत्यत्र तीरे गङ्गात्वप्रतीतेरभावे घोषे शैत्यपावनत्वातिशयस्याप्रतिपत्तिः । 'कचतस्त्रस्यति वदनम्' इत्यादौ राहुत्वादिविशिष्टानां शक्यतावच्छेदककचत्वादि रूपेण प्रतीतावपि न त्रासादीनामनुपपत्तिः । 'तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थप्रतियोगिकताया अभावो रूढिप्रयोजनयोरेकतरच्च तन्त्रम्' ।

पण्डितराजजगन्नाथस्य लक्षणाविषयकविचारेण वैयाकरणो नागेशभट्टोऽपि सम्मतोऽस्तीति तदीयग्रन्थपरिशीलनेन प्रतीयते । उक्तं हि तेन – "अन्वयानुपपत्तिप्रतिसंधानञ्च लक्षणाबीजम् । वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसंधानमेव तद्बीजम् । अन्यथा 'गङ्गायां घोष' इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिस्तावताऽप्यन्वयानुपपत्तिपरिहारात् । 'गङ्गायां पापी गच्छति' इत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च । अस्माकन्तु भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्न दोषः । 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात् । एकानुगमकस्वीकारेण निर्वाहे अनेकानुगमकस्वीकारे गौरवाच्च"।[1]

डॉ. सुज्ञानकुमारमाहान्तिमहाभागः अभिधावृत्तिमातृकायाः भूमिकायां पण्डितराजजगन्नाथेन वृत्तौ प्रतिपादितार्थस्य स्वाभिप्रायं इत्थं प्रकटीकरोति यथा – "मुख्यार्थस्य तात्पर्यानुपपत्तौ, रूढिप्रयोजनयोरन्यतरस्य च सद्भावे, वाच्यार्थेन सह यः सम्बन्धः स एव लक्षणाव्यापारः" इति ।[2]

इत्थं प्रकारेण अन्यालङ्कारिकानां, तट्टीकाकाराणां मतपर्यालोचनेन ज्ञायते यत् मम्मटाचार्यैः निरूपितलक्षणा तात्पर्यानुपपत्तिबीजाविष्टव्यापाररूपः भवति । (इमामेव जिज्ञासां जगन्नाथेन नैयायिकरीत्या निरूपयता आचार्याणां मतमेव स्वाभिष्टत्वेन प्रतिपादितमिति लक्षणाविषये द्वयोः साम्यं दृश्यते ।

ग्रन्थसूची –


१. काव्यप्रकाशः नागेश्वरी टीका सहितम्

२. ध्वन्यालोकः लोचनासहितम्

३. काव्यप्रकाशः प्रदीप टीका

४. रसङ्गाधरः शारदा टीका

५. परमलघुमञ्जूषा

६. अभिधावृत्तमातृका

७. रसगङाधरः सरला टीका


***

[1] परमलघुमञ्जूषा पृ. सं. – ६३

[2] अभिधावृत्तमातृकायाः भूमिका पृ. सं. – xviii



ISSN : 2320-740X

# जैमिनीयम् आयुश्चिन्तनम्

**श्रीपतिः**

शोधच्छात्रः

अथ स्वप्राक्कृतकर्मानुषङ्गेन यथासम्भवं यथायोनिं सम्प्रविष्टो जीवः येन प्रारब्धेन कर्मणा यच्छरीरमारब्धम् आकर्मसमाप्ति तच्छरीरावस्थितः यावत्कालं कलयति स च कालः आयुः इत्युच्यते । एवमायुर्नाम जीवितकालः इति सिद्ध्यति। अयञ्च जीवितकालः जन्मकालिकग्रहस्थितिवशाद् होराविद्भिः निर्णीतोऽस्ति । अत एव व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव[1] इति । प्रत्येको ग्रहः उच्चनीचादिस्थितिवशात् प्रत्येकमायुः प्रयच्छतीति निश्चित्य अस्य आयुर्दायः इति नाम वर्तते ।

अस्मिन्नायुर्दाये अंशक–बलपिण्ड–नैसर्गिक–मिश्र–जीवशर्मादि–आयुर्विभागाः केशवश्रीपत्यादिग्रन्थे दृश्यन्ते । तत्र तावत् क्रमाल्लग्न–रवि–चन्द्रबलोत्कटत्वे अंश–पिण्ड–नैसर्गिकायुर्दायः, बलशून्ये जीवशर्मायुर्दायः, मिश्रे तु मिश्रक्रमेण आयुर्दायाः आनेतव्याः । परन्तु सर्वप्रथमम् उपदेशं व्याख्यास्यामः इत्यादिभिः सूत्रस्वरूपेण फलितज्यौतिषे उपदेशशास्त्रं रचयामास भगवान् जैमिनिः, तत्र ग्रहाणां राशिस्थितिवशात् आयुश्चिन्तनक्रमः चतुर्दशभिः सूत्रैः उपदिष्टः । तत्प्रोक्तः अयं विषयः लक्ष्मणाचार्यस्य ज्योतिःप्रदीपिकाख्यया व्याख्यया सह किञ्चिद्विमृश्यते । आदौ आयुर्दायनिर्णयार्थं कथ्यते सूत्रम् –

**आयुः पितृदिनेशाभ्याम् –** (जैमिनिसूत्रम्–२.१.१)

आयुः आयुर्दायः पितृ(६१) लग्नं, दिनम्(८) अष्टमं तयोः ईशाभ्याम् । द्वन्द्वान्ते श्रूयमाणः प्रत्येकमभिसम्बध्यते । तथा च लग्नेशाष्टमेशाधिष्ठिताभ्याम् ।

**प्रथमयोरुत्तरयोर्वा दीर्घम्**–(२.१.२)

प्रथमयोः चरचरयोः, उत्तरयोः स्थिरोभयोः स्थिरोभययोः दीर्घं दीर्घायुः ।

**प्रथमद्वितीययोरन्त्ययोर्वा मध्यम्**–(२.१.३)

प्रथमद्वितीययोः चरस्थिरयोः,अन्त्ययोः उभयराश्योः मध्यं मध्यमायुः ।

**मध्ययोराद्यन्तयोर्वा हीनम्**–(२.१.४)

मध्ययोः स्थिरयोः, आद्यन्तयोः चरोभययोः हीनम् अल्पायुः ।

**एवं मन्दचन्द्राभ्याम्**–(२.१.५)

मन्दः(८५) लग्नं, चन्द्रः चन्द्र एव । लग्नचन्द्रराशिभ्याञ्च एवं प्रकारेण योज्यम् ।

**पितृकालतश्च**–(२.१.६)

[1] लघुजातकम्–१.३


ISSN : 2320-740X

पितृ लग्नं, काल इति होरालग्नम् । लग्नहोरा–लग्नाभ्याञ्च पूर्ववदुत्तम–मध्यम–अल्पायुस्त्रिविधं चिन्तनीयम्।

होरालग्ननिर्णयप्रकारस्तु – दिवामानं रात्रिमानञ्च ज्ञात्वा प्रत्येकं द्वादशधा विभज्य जन्मलग्नमारभ्य ओजलग्ने क्रमेण युग्मलग्ने व्युत्क्रमेण इष्टं जन्मकालघटिकान्तं यावद्यल्लग्नं लभ्यते तदेव होरालग्नम् । तथा च वाञ्छिनाथः –

**दिनरात्री द्वादशांशे प्रकृत्या जन्मलग्नतः । यावत्तावच्च संसिद्धं होरालग्नं प्रचक्षते ॥**

त्रिविधे आयुर्दाये आनीते कथन्निश्चेतुं शक्यमिति चेत्तत्राह –

**संवादात् प्रामाण्यम्**–(२.१.७)

संवादः एकवाक्यता । द्वयोस्त्रयाणां वा पूर्णे पूर्णं, मध्ये मध्यम्, अल्पे अल्पम् ।

**विसंवादे पितृकालतः**–(२.१.८)

विसंवादे एकवाक्यत्वाभावे, पितृकालतः लग्नहोरालग्नाभ्यां यदागतं तदेवायुः प्रमाणमिति द्रष्टव्यम् ।

एतेषु अपवादमाह –

**पितृलाभगे चन्द्रे चन्द्रमन्दाभ्याम्**–(२.१.९)

लग्नगे सप्तमगे वा चन्द्रे चन्द्रमन्दाभ्यां – चन्द्रलग्नजन्मलग्नाभ्यां यदागतं तदैवायुः प्रमाणम् ।

एवं कृत्वा कक्ष्यावृद्धिह्रासश्च कर्तव्यः । यथा –

**शनौ तथा भूते योगहेतौ कक्ष्या ह्रासः**–(२.१.१०)

शनौ तथाभूते लग्नसप्तमस्थे योगहेतौ कक्ष्याह्रासः एककक्ष्याह्रासः । पूर्णे मध्यायुः, मध्ये अल्पायुरिति । कक्ष्याशब्दार्थस्त्रयस्त्रिंशदित्यर्थः । अपरे एकादशेति वदन्ति ।तद्यथा – लग्नसप्तमे मन्दे राहौ केतौ वा पापयोगे दुर्बले नीचे वा त्रयस्त्रिंशद्वर्षाणि ह्रासः कार्यः, नीचे शुभदृष्टियुते एकादशवर्षाणीति सम्प्रदायः ।

**विपरीतमित्यन्ये**–(२.१.११)

अन्ये आचार्यादयः विपरीतं वृद्धिः कार्येति वदन्ति । लग्नसप्तमे मन्दे स्वोच्चादिबलिनि कक्ष्यावृद्धिः कार्येति तदयुक्तम्। ह्रासकरणानां वृद्धिकरणमयुक्तमेव । लग्नसप्तमे मन्दे उच्चस्वर्क्षादिके एकादशवर्षाणि वृद्धिं वदन्ति केचित् । तदप्ययुक्तम् ।

**न स्वर्क्षे तुङ्गे**–(२.१.१२)

स्वर्क्षतुङ्गे न । उच्चस्वर्क्षे नेत्यर्थः ।

**सौरे केवलपापदृग्योगिनि च**–(२.१.१३)

सौरे केवलपापदृग्योगिनि कक्ष्याह्रासः कार्यः । शुभदृग्योगिनि नेत्यर्थः ।

**पितृलाभगे गुरौ केवलशुभदृग्योगिनि च कक्ष्यावृद्धिः**–(२.१.१४)

लग्नसप्तमे गुरौ केवलशुभदृग्योगिनि कक्ष्यावृद्धिः । एकादशवर्षाणि वृद्धिः कार्येति केचित् ।


ISSN : 2320-740X

सर्वत्र आयुर्विषये लग्नाधिपाष्टमाधिपयोः ऐक्ये लग्नाधिपतिर्यत्र वर्तते तदारभ्य अष्टमाधिपो ज्ञेयः । तत्राप्यैक्ये होरालग्नादष्टमादष्टमाधिपतिनिर्णयः । आयुर्दायविषये लग्ने चरे होरालग्ने चरे, लग्ने उभये होरालग्ने स्थिरे, लग्ने स्थिरे होरालग्ने उभये दीर्घमित्युक्तम् । लग्नादौ शतसंवत्सरं, लग्नान्ते सप्तषष्टिः, मध्ये अनुपातः कार्यः । एवं मध्यायुषि अल्पायुषि च ज्ञातव्यम् । लग्नादौ दीर्घं प्रारम्भमात्रम् । तदुक्तं गर्गेण –

**शतायुः पूर्णमाख्यातं षट्षष्टिर्मध्यमायुषः । त्रयस्त्रिंशद्भवेदल्पं तत्तन्मध्येनुपातनम् ॥**

इति लग्नाष्टमाधिपाभ्यामायुर्निर्णयः । एवं विधे आयुर्दाये आगतेपि कश्चन एतत्पूर्वं परस्ताद्वा मृतो भवति चेत् किमस्य प्रयोजनमिति नाशङ्कनीयम् । यत आह श्रीपतिः स्वीयजातकपद्धतौ –

**ये धर्मकर्मनिरता विजितेन्द्रिया ये ये पथ्यभोजनजुषो द्विजदेवभक्ताः ।**
**लोके नरा दधति ये कुलशीललीलां तेषामिदं कथितमायुरुदारधीभिः [1]॥**

ग्रन्थसूची –


१.जैमिनिसूत्रम्–लक्षमणाचार्यकृतव्याख्या ।

२. जैमिनीज्योतिष– चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

३. जैमिनि ज्योतिष का अद्ध्ययन– चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

४.Jaiminisutram (Eng)-Dr.P.S.Shastri– चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

५. Jaiminisutram (Eng)– बी.सुर्यनारायण राव्– चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

६. जैमिनीयसूत्रम् (हिन्दी)– कमलाकान्त शुक्ल– चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

७. जैमिनीयसूत्रम् – विमला (संस्कृत–हिन्दी) – चौखाम्बा संस्कृत सीरिस् ओफिस्, वाराणसी

८. जैमिनीज्योतिष (कन्नड)– बी.वि.रामन्

९. Jaiminisutram (kan)– सुकुमार आलम्पाडी

१०) श्रीपतिपद्धति:–वि.सुब्रम्हण्यशास्त्री–printed by v.b.soodbiaii& sons, b`lore-1937

११) केशवीयजातकपद्धति:–डा.सुराकान्त झा–चौखाम्बा सुरभारती,वारणासी–२००९

१२) लघुजातकम्– चौखाम्बा कृष्णदास अकाडमी, वाराणसी–२००९


***

[1]श्रीपतिपद्धतिः–५.३७


ISSN : 2320-740X

# शास्त्रमालावृत्त्यनुसारं धर्मलक्षणम्

**राजेन्द्र भट्टः**

**शोधच्छात्रः**

"धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मे सर्वं प्रतिष्ठितम् । धर्मेण पापमपनुदति । तस्मात् धर्मं परमं वदन्ति"[1] इत्यादिश्रुतिवाक्यानि धर्मस्य जगत्प्रतिष्ठापकत्वं पापनाशकत्वं च बोधयन्ति । जगतः स्थितिकारणीभूतः प्राणिनां साक्षात् अभ्युदयनिःश्रेयसहेतुः अयं धर्मः । अस्य मूलं वर्तते आम्नायः । मन्त्रब्राह्मणात्मकस्य शब्दराशेः आम्नानस्य अनादित्वात् अपौरुषेयत्वात् नित्यत्वाच्च गरीयस्त्वं माहात्म्यं च दरीदृश्यते । अपौरुषेयस्य वेदस्य प्रामाण्यकथनसौकर्याय अनुष्ठानविनियोगव्यवस्थार्थं च विधिमन्त्रनामधेयनिषेधार्थवादात्मना पञ्चधा विभागः कृतः । तादृशस्य अपौरुषेयस्य वेदस्य तात्पर्यार्थनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् ।

अस्य शास्त्रस्य आविर्भावः इत्थं श्रूयते – "ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोपीन्द्राय, स चादित्याय, स च वसिष्ठाय, सः पराशराय, स च कृष्णद्वैपायनाय, स च जैमिनये, स च स्वोपदेशानन्तरम् इमं न्यायं ग्रन्थे निबद्धवान्"[2]इति । जैमिनिना लिखतेस्मिन् ग्रन्थे सन्ति द्वादशाध्यायाः । सहस्राधिकरणयुक्तः सहस्रन्यायप्रतिपादकः च अयं ग्रन्थः द्वादशलक्षणी, न्यायसहस्री चेति प्रसिद्धिम् अवाप । द्वादशाध्यायेषु प्रमेयत्वेन अवधारितः धर्म एव । प्रमेयभूतेस्मिन् धर्मे साधनं श्रुतिः मीमांसायाः इतिकर्तव्यतात्वम् । तदुक्तम् अभियुक्तैः –

**धर्मे प्रमीयमाणे तु वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥** इति ।

धर्मः खल्वस्य दर्शनस्य प्रतिपाद्यः । अत एव तस्य जिज्ञासायां महर्षिणा जैमिनिना सूत्रेण तस्य तथ्यत्वं सङ्केतितम्। वेदबोधितत्वे सति साक्षात् फलद्वारा वा यदनर्थनिवारकमिष्टसाधकञ्च तदेव धर्मः । अयं महामुनेर्जैमिनेः सूत्रस्याभिप्रायः । वेदेनात्र विध्यर्थवादमन्त्रनामधेयात्मकाश्चत्वारो भागा अभिप्रेताः । इमे चत्वार एव धर्मे प्रमाणम्, तद्बोधका इत्यर्थः । धर्मो न खलु चक्षुरादिन्द्रियसम्बद्धः कस्यचित् । अत एव प्रत्यक्षस्य, तदाश्रितत्वेनानुमानोपमान शब्दार्थापत्त्यनुपलब्ध्यादिप्रमाणानाञ्च प्रवेशो भवितुं नार्हति । तथापि धर्मः प्रमाणरहितो नास्ति, वेदप्रमाणाश्रितत्वात् । धर्मोयं लोकस्य सामान्यरुचिविषयः । प्रायः सर्वोऽपि आत्मानं धार्मिक इति आख्यापयति, अत एव सर्वेषु सम्प्रदायेषु शास्त्रकारैः स्वशास्त्रसाफल्यायानिवार्यतयाऽस्य विवेचनं कृतम्। क्वचित् धर्मः कर्तव्याभिप्रायिको भवति, क्वचिच्च शिष्टाचारार्थकः । केचित्तु यज्ञाध्ययनदानादिक्रियासु धर्मं विभजन्ते । वेदाधारेण विहितलिङ्–लेट्–लोट्–तव्यप्रत्ययाद्यभिहितोऽपूर्वनामा कार्यः, नियोगादिपर्यायो व्यापार एव प्रभाकरमतेन धर्मः । एवमेव वेदेन निषिद्धस्य कर्मणोऽनुष्ठानेनोत्पन्नं तन्मतेऽधर्मः । नैयायिकानां वैशेषिकाणाञ्च मतेन "वेदविहितया क्रिययोत्पन्नो धर्मः",

[1]कृष्णयजुर्वेदतैत्तरीयोपनिषत्

[2]जैमिनीयन्यायमालाविस्तरः



ISSN : 2320-740X

"वेदनिषिद्ध्या च क्रिययोत्पन्नोऽधर्मः"[1]तदुभयमपि क्रमेण पुण्यपापाभिधानेनाभिधीयते । तथा चात्मनिष्ठो गुणः । "यागाद्यनुष्ठानेनोत्पन्नान्तःकरणस्य विशिष्टः वृत्तिधर्म इति साङ्ख्याः"[2], एकेन ज्ञानेनान्यस्मिन् ज्ञाने उत्पन्ना वासना धर्म इतिबौद्धाः । "अन्य शरीरप्रारम्भकाः पुद्गलशब्दवाच्या विशिष्टाः परमाणवो धर्म इति जैनाः"[3] ।

लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति न्यायेन शास्त्रप्रमितस्य धर्मस्य लक्षणं प्रत्यपादि जैमिनिना चोदनालक्षणोर्थो धर्म इति । वेदबोधितश्रेयस्साधनताको धर्म इति यावत् । अतः "ज्योतिष्टोमेन स्वर्गकामो यजेत"[4] इत्यादि वाक्यविहितयागादिरेव धर्म इति । अत्र शास्त्रे धर्मएव प्राधान्येन विचार्यते धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् इति । एवं तेषां मूलोद्देशं तु धर्मः जिज्ञासितव्यः, सर्वत्र धर्मानुष्ठानं निर्विघ्नतया भवेत्, नेष्टस्याप्यधर्मस्य नाशः भवेदिति । मीमांसाशास्त्ररीत्या धर्मविषये वेदतात्पर्यवेत्तारः वेदबोधितधर्मानुष्ठातारः मीमांसाशास्त्रतल्लजाः श्रीकमलाकरभट्टात्मजाः श्रीमदनन्तभट्टाः मीमांसाशास्त्रग्रन्थकर्तृषु अन्यतमाः । मनुष्यसामान्येनाऽपि शास्त्रज्ञानमधिगन्तुं साधनभूतगृन्थानां प्रणयने एतेषां परिश्रमः परिदृश्यते । वेदार्थसंबद्धग्रन्थान् विलिख्य विमर्शनञ्च विधाय वेदार्थप्रचारणे बद्धदीक्षाः आसन्निति एतेषां ग्रन्थशैल्या एव अवगम्यते । वैदिकदर्शने एतेषां योगदानं तु अविस्मरणीयं विफुलञ्च । अयं शास्त्रमालावृत्याख्यः ग्रन्थः मीमांसापंडितश्रीकमलाकरभट्टानां शास्त्रमाला इति ग्रन्थं परिचाययति विवृणोति च । शास्त्रमालायाः व्याख्यानरूपः अयं ग्रन्थः सरलया शैल्या मीमांसाशास्त्रस्य अतिगभीरान् विषयान् अपि सारल्येन प्रकटीकरोति इत्यत्र नास्ति संशयः । ग्रन्थेऽस्मिन् धर्मलक्षणविषये सारल्येन सूत्रविवरणरीत्या महाभागेण एवं निरूपितमस्ति ...

**अथाऽतो धर्मजिज्ञासा** ॥[5]

स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधौ स्वाध्यायस्य कर्मोत्पन्नतव्यप्रत्ययेन साध्यत्वावगतेः पारायणाद्युपयुक्तत्वादक्षरग्रहणमेव भाव्यम् । ततश्च विचारायोगादनारभ्यं शास्त्रमाह – "स्वाध्यायोऽध्यर्थधीहेतुर्न विचारं विनाभवेत्" । न तव्यप्रत्ययेन स्वाध्यायस्य भाव्यत्वं संभवति । तथात्वेऽपुरुषार्थसाधकभावनायां विधेरप्रवर्तकत्वापत्तेः। कर्मोपयुक्तार्थरूपदृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वायोगात् । तेन तव्यप्रत्ययेन साध्यत्वोक्तावपि सक्तूनितिकारणत्वे लक्षणारेवतीवारवन्तीयवद्भावनाविशिष्टभावनाविधिरिति केचन वदन्ति । क्वचिदक्षरग्रहणार्थत्वमपि पारायणविधिना तस्यापेक्षितत्वात् । न च वैरूप्यम् । यच्छक्तये तत्कुर्यादित्यनेन सर्वसङ्ग्रहात् । तेनाध्ययनविधेर्दृष्टार्थत्वात् इह विचारशास्त्रमारभ्यमिति ।

---

[1]प्रशस्तपाद भाष्यम्

[2]साङ्ख्यकारिका

[3]न्यायकुमुदचन्द्रः

[4]कृष्णयजुर्वेदतैत्तरीयब्राह्मणम्

[5]जैमिनिसूत्रम् १–१–१



ISSN : 2320-740X

**चोदनालक्षणोऽर्थो धर्मः ॥**[1]

न धर्मजिज्ञासा सम्भवति । लक्षणप्रमाणाभावेन धर्मस्वरूपस्यैवासत्वादत आह – धर्मस्वरूपप्रामाण्ये चोदनालक्षणात्वतः । अनेन सूत्रेण धर्मस्य स्वरूपं प्रमाणं च उच्यते । चोदना लक्षणं प्रमाणं यत्रेत्यर्थः । अर्थः बलवदनिष्टाननुबन्धीष्टसाधनं, तेन चोदनालक्षणात्वे सति य इष्टसाधनं स धर्म इति लक्षणमप्यर्थादुक्तं भवति । अर्थपदं तु श्येनव्यावृत्यर्थम् ।

इदं सूत्रं वेदस्य धर्मनिमित्तत्वे परीक्षाप्रतिज्ञार्थमित्याह – तत्प्रमाणपरीक्षातः । तत्सन्निकर्षात् इति । धर्मस्य प्रत्यक्षानुमानोपमानलौकिकशब्दार्थापत्यभावाख्यप्रमाणगम्यत्वसंभवान्नदवगम्यकेत्वमत आह – "प्रत्यक्षादेरमानता" । न प्रत्यक्षगम्यो धर्मः । इन्द्रियाणां सन्निकर्षाभावात् । अलौकिकप्रत्यक्षस्य वा असत्वात् । न च यागादिक्रियायाः प्रत्यक्षत्वात् प्रत्यक्षगम्यत्वमिति वाच्यम् । फलसाधनत्वस्य अप्रत्यक्षत्वात् । नानुमानगम्यः । धर्मव्याप्तलिङ्गाभावात् । सुरवदेर्दृष्टचन्दनाद्यैः सम्भवेन धर्मत्वेन सुरवत्वेन कार्यकारणभावनाङ्गीकारात् सादृश्याभावान्नोपमानम् । अनुपमानार्थाभावात् न अर्थापत्तिः । योग्यानुपलब्ध्यभावान्नानुपलब्धिः । धर्मस्य प्रमाणान्तरगम्यत्वाभावात् न लौकिकः शब्दः । तेन वेदबोध्यः एव धर्मः ।

मीमांसानाम वेदार्थविचारः न केवलं विचारः पूजितविचारः इति । परं भामत्यां वाचस्पतिमिश्राः "पूजितविचारवचनो मीमांसाशब्दः"[2]इति ।यतो मीमांसकाः तथ्येनैतेन परिचिताः सन्ति यत् – प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । एतत्प्रवृत्तिसिद्ध्य एव धर्मे प्रयोजनरूपेणेष्टसाधनताया आवश्यकत्वं मतम् । प्रयोजनवत्तया समं धर्मेऽपेक्षणीयमन्यद् यदस्ति तदेतत् तस्य वेदबोधितत्त्वमिति । यदि वेदबोधितायाः धर्मेण सम्बन्धो न क्रियते तदा घटचैत्यवन्दनादयोऽपि धर्माः स्युः, प्रयोजकत्त्वात् । धर्मस्य कृते यत् तृतीयं विशेषणमनिवार्यं मतं तदस्ति तस्यार्थतेति । तेनानर्थवता न भाव्यमित्यर्थः । यदीदं विशेषणं न स्यात् तर्हि श्येनयागादिकर्माण्यपि धर्मत्वं लभेरन् । यः शत्रुवधं काङ्क्षेत् स श्येनमनुतिष्ठेत् एतद्वेदेन विहितम्, शत्रुवधश्चास्य प्रयोजनमपि । विशेषणद्वयसत्वेऽपि अस्मिन् नायं धर्म इति वक्तुं शक्यते, यतः शत्रुवधस्य सम्बन्धो हिंसाद्वारा नरकेणाप्यस्ति । स च निषिद्धः । अनया दृष्ट्या श्येनयागः साक्षादनर्थकृदसन्नपि परम्परयाऽनर्थेनैव सम्बद्धः । यज्ञे पशुवधो यज्ञाय क्रियते, परं न सा हिंसा । सा हि यागजन्यफलान्तर्भूतत्वेन स्वतन्त्रफलरहिता । एतेषु श्येनादियागेषु धर्मता नापद्येत, अत एव अर्थवत्ता इति विशेषणमनिवार्यम् । किं बहुना, प्रयोजनवत्वे सति, वेदविहितत्वे सति अनर्थासम्बद्धत्वं धर्मत्वमिति मीमांसकानां मतम् । स नास्ति कर्मातिरिक्तः कश्चित् यस्मिन् सर्वस्यापि समावेशो भवति । एतद्विपरीतोऽधर्मः ।

---

[1]जैमिनिसूत्रम् १–१–२

[2]भामती अध्यासभाष्यम्



ISSN : 2320-740X

तत्र धर्मशब्दः धारणात् इति व्युत्पत्या धारकः इत्येवमर्थं बोधयति । अपि च "यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि"[1] इत्यादिवेदवाक्यानि यागादिरूपक्रियाजातमेव धर्मं प्राहुः । इत्थञ्च वेदबोधितश्रेयस्साधकत्वं धर्मत्वम् । वेदबोधितानिष्टसाधकत्वम् अधर्मत्वम् इति धर्माधर्मयोः लक्षणं सम्पन्नं भवति । तत् स्वरूपञ्च यागादिरेव धर्म इति । धर्माधर्मबोधकस्य वेदस्य अर्थज्ञानार्थं प्रवृत्तमिदं विचारशास्त्रम् । अपौरुषेयस्य वेदस्य अर्थं सर्वोऽपि जनाः सम्यग्विज्ञातुं न प्रभवेयुरिति धर्माधर्मविवेचनार्थं सूत्राणि विचारयामास भगवान् जैमिनिः । शास्त्रमिदं वस्तुतः परीक्षाशास्त्रम् । वेदवाक्यपरीक्षणार्थमाविर्भूतमिदमिति मङ्गलम् ॥

अनुशीलितग्रन्थसूची–कृष्णयज्वाचार्यकृत मीमांसा परिभाषा

मुरारिमिश्रकृत–अर्थसङ्ग्रहः

शबरस्वामिकृत–मीमांसादर्शनम्

आपदेवाचार्यकृत–मीमांसान्यायप्रकाशः

***

# रसस्वरूपम्

**विनायक हेगडे**

**शोधच्छात्रः**

**कारणान्यथ कार्याणि सहकारीणि यानि च । रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥**
**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः । व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ॥**[2]

लोके काव्यनाट्यातिरिक्तकामिनीकामुकव्यवहारस्थले यानि तदीयरत्यादेः कारणानि – कामिनीकामुकरूपाणि उद्यानचन्द्रोदयमन्दमारुतादीनि च, तत्कार्याणि स्वेदरोमाञ्चकटाक्षादीनि, तत्सहकारीणि तत्परिपोषणहेतुभूतानि निर्वेदग्लानिचिन्तादीनि च, तानि इमानि नाट्ये अभिनयप्रधाने नाट्यव्यापारे दृश्यते, काव्ये श्रव्ये यदि चित्रितानि स्युः तदा क्रमेण कारणानां विभाव इति कार्याणां अनुभाव इति सहकारिणां व्यभिचारिण इति संज्ञा स्युः । एतैश्च विशेषैः व्यक्तः पानकरसन्यायेन मिश्रणेनैव आस्वादनीयतां प्राप्तः, स्थायी – चिन्तादिवत् चञ्चलताविहीनः रत्यादिः भाव एव रस इत्युच्यते । उक्तं विश्वनाथाचार्येण काव्यप्रकाशदर्पणटीकायां "व्यक्तो व्यक्तीकृत एव रसः नतु दीपेन घट इव पूर्वसिद्धो व्यज्यते" । तदुक्तं लोचनकारैः "रसाः प्रतीयन्ते इति तु ओदोनं पचतीतिवत् व्यवहारः इति प्रतीयमान एव हि रसः 'व्यक्तः' । अत्र प्रदीपकारेणोक्तम् " **व्यक्तः स इति व्यक्तिश्चर्वणेति**

[1] तैत्तरीयब्राह्मणम्

[2] काव्यप्रकाश – ४ पृ. सं. २७–२८


ISSN : 2320-740X

**पर्यायः । सा च विशेषणम् । तथा च व्यक्तिविशिष्ट एव स्थायी रसः"**[1] । इत्थं च अभिनवगुप्तमम्मटभट्टग्रन्थस्वारस्येन " भग्नावरणाचिद्विशिष्टो रत्यादिः स्थायीभावो रसः" इति स्थितम् ।

"**रत्यादेश्चित्तवृत्तिविशेषस्य स्थायिनो लोके यानि कारणकार्यसहकारिशब्दव्यपदेश्यानि तान्येव नाट्ये काव्ये चेत् तदा विभावानुभावव्यभिचारिशब्दैर्व्यपदिश्यन्ते । तैश्च व्यक्तः सामाजिकानां वासनात्मतया स्थितः साधारण्येन चर्वणात्मकप्रतीतिगोचरः स्वसंबोधसिद्धः रत्यादिको भावो रसनव्यापारविषयो रसः**"[2] ।

रसः न केवलं नाट्यस्य अपितु काव्यस्यापि सर्वाधिकं महत्त्वपूर्णं तत्त्वमस्ति । रसस्य आदिप्रतिष्ठाता भरतचार्य एव अस्ति इति मन्यते । किन्तु नाट्यशास्त्रेण ज्ञायते यत् भरताद् पूर्वमपि रसमीमांसायाः परम्परा विद्यमाना आसीत् । भरतः नाट्यशास्त्रस्य षष्ठसप्तमाध्यायेषु रसभावयोः विवेचनं कृतवान् । भरतेन नाट्यप्रसङ्गे रसस्य यत् मार्मिकविश्लेषणं कृतम्, तत् नाट्यशास्त्रे सर्वथा मनोहारी प्रसङ्गोऽस्ति । तदनुसारेण "**न हि रसादृते कश्चिदर्थः प्रवर्तते**"[3] ।

उक्तञ्चापि तैत्तिरीयोपनिषदि "रसो वै सः रसं ह्येवायं लब्धाऽऽनन्दी भवति" इत्यादिश्रुतिः । रस्यते आस्वाद्यते इति रसः । दर्शनशास्त्रे रस एकगुणरूपेण वर्णितोऽस्ति, यस्य ज्ञानं रसनेन्द्रियेण भवति । स च मधुराम्ललवणकटुकषायतिक्तभेदेन षड्विधो भवति । आयुर्वेदाशास्त्रानुसारेण "रस" एकः शुक्लद्रवपदार्थोऽस्ति यः पाचनक्रिया साहाय्यकेन भोजनात् उत्पद्यते । किन्तु शृङ्गारादिषु अर्थेषु प्रयुक्तस्य रसपदस्य कोऽभिप्रायः? तस्य प्रवृत्तिनिमित्तं किमस्ति? तथा स कथं स्वविशिष्टार्थस्य नियमनं करोति? प्रयोक्ता – ज्ञानग्राहकश्च कथम् अस्मिन् प्रवृत्तौ भवतः? इत्यादीनां प्रश्नानां स्वयमेव समाधानम् आह भरतः– "यथा हि नानाव्यञ्जनौषधिसंयोगात् रसनिष्पत्तिः भवति, यथा हि गुडादिभिः द्रव्यैः व्यञ्जनौषधिभिश्च षड्वादयो रसाः निवर्तन्ते, तथा नाना भावोपगताः अपि स्थायिनः भावाः रसत्वमाप्नुवन्ति ।"[4]

अत्राह – रस इति कः पदार्थः? आह – आस्वाद्यत्वात्, कथमास्वाद्यते रसः – उक्तं हि भरतमुनिना "यथा हि नानाव्यञ्जनसंस्कृतम् अन्नं भुञ्जानाः रसान् आस्वादयन्ति, सुमनसः पुरुषाः हर्षादिञ्चाधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति।"[5] रसास्वादनम् न केवलं नाट्येन अपि तु काव्येनापि भवति परन्तु दृश्यात्मकतया नाट्यं सर्वैः ग्राह्यं भवति ।

---

1 काव्यप्रदीपटीका चतुर्थोल्लसः

2 नाट्यशास्त्र इतिहासः

3 नाट्यशास्त्र इतिहासः

4 नाट्यशास्त्रम् ६ का सं. ५४

5 नाट्यशास्त्रम् ६ का सं. ३४


ISSN : 2320-740X

साहित्यदर्पणकारेणोक्तम् – "सत्त्वोद्रेकाखण्डस्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः । स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।"[1]

रसस्यास्वादनविषये उक्तं दशरूपककारेण –

**"विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । आनीयमानः स्वाद्यत्वं स्थायिभावो रसः स्मृतः ॥"**[2]

सहायक ग्रन्थाः –

१. काव्यप्रकाशः
२. नाट्यशास्त्र इतिहास
३. नाट्यशास्त्रम्
४. साहित्यदर्पणम्
५. दशरूपकम्

***

# यन्त्रेषु शङ्कुः

**यज्ञदत्तः**

**शोधच्छात्रः**

" प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्राऽर्कौ यत्र साक्षिणौ ॥" (वेदा.ज्यो.) " प्रत्यक्षपरीक्षणैः व्यक्तिः ।" (बृ.सं.) "तन्त्रभ्रंशे प्रतिदिनमेव विज्ञाय धीमता यत्नः ॥" (ब्रह्म.सि.) "कालसंसाधनार्थाय तथा यन्त्राणि साधयेत् ॥"(सू.सि.)

इति खलु सूत्ररुपा आचार्योक्तिः सुन्दरी । श्रवणेन सुहृदामेव सुतरां मनस्तुष्टी स्यात् । परञ्च नैतावता वेधरतेन गणकप्रवरेण तुष्यते । सस्त्वाचार्याणामाशयं ज्ञात्वा प्रत्यक्षप्रीक्षणे निरतो भवति । उक्तमपि निष्क्रियं ज्ञानं ज्ञानशून्या क्रिया चेति हतप्राया। परीक्षणन्तु यतो विना यन्त्रैः कर्तुमशक्यम् अत एव यन्त्राणां ज्ञानं निर्माणं प्रयोगादिकञ्च परम्परया गुरुमुखाद्वा ज्ञेयम् । अस्तु किं प्रयोजनं यन्त्राणामिति चेत तत्राह भवान् भास्करः :–

**दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः । वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित्** ॥यं.अ.१॥

अर्थात् सुदीर्घकालोत्थं ग्रहस्थित्यादिष्वन्तरज्ञानम्, ग्रहगणितं गाणितिकप्रतिफलानाञ्च परीक्षणं, यन्त्रमाध्यमेन एव कालान्तरे सम्भावितायाः गाणितिकशिथिलतायाः ज्ञानं, त्रिप्रश्नाधिकारोक्तनिखिलपदार्थानां ज्ञानं, अक्षक्षेत्रस्थितिनामध्ययनं, क्षयाधिमासयोः कालस्य स्थितेश्च तत्वानुसन्धानं, रविचन्द्रयोः सर्वग्रहे पञ्चावस्थानां ( स्पर्शसम्मीलनमध्योन्मीलन– मोक्षाणां) सूक्ष्मज्ञानं, ग्रहनक्षत्रादिनां स्थितियुतिसमागमादिनां, राशिसंचारस्वरुपस्य ग्रहकक्षाणामवबोधश्च । गोलीयपदार्थानां प्रत्यक्षदर्शनं परिलेखादिश्च, प्रति $\frac{\text{१ प्राण}}{\text{२}}$ मितस्य कालस्य ज्ञानं, क्रान्त्याक्षांशोन्नतांशायनांशचराग्रानताशांदिनां ज्ञानं, तथा च रात्रावपि ग्रहाणां वेधप्रकारादिविविधखगोलीयपदार्थानां

[1] साहित्यदर्पण ३ का सं. ३४

[2] दशरूपकम् ४ का सं. १



ISSN : 2320-740X

सूक्ष्मतमं ज्ञानं भवति । एवं काले–काले पूर्वाचार्योक्तयन्त्राणां सम्वर्धनं लोकानुग्रहार्थं नूतनयन्त्राणाञ्च प्रकटनप्रसङ्गे यन्त्राणां द्विधा भेदः (पुरातनार्वाचीनभेदेन )कर्तुं शक्यः ।

तत्र सिद्धान्तोक्तयन्त्राणि :–

“गोलो नाडीवलयं यष्टिः शङ्कुर्घटी चक्रम् । चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम् ॥२॥” एवं भास्कराचार्यैः दश यन्त्राणि प्रतिपादितानि । तेषु यतोहि शङ्कुच्छायया दिग्देशकालानां ज्ञानं भवति । अतः शङ्कोः प्रमाणनिर्माणदोषादिनाञ्च ज्ञानं सुतरामपेक्षते। तदर्थं किञ्चिदुच्यते शङ्कुर्नाम “शङ्क्यते दीपसूर्य्योयोच्छायापरिमाणमस्मादिति” । शङ्क+ कु[1] इति प्रत्ययेन निपातितः, कीलः[2] इत्यर्थः । अर्थात् “दीपसूर्य्योयोच्छायापरिमाणार्थं दन्तिदन्तज –सुगुरुसारकाष्ठादिर्निमितः क्रमेण सूक्ष्माग्रद्वादशाङ्गुलपरिमितः कीलकः[3] ।” इति आदि पदेन अयमयादिधातु निर्मितमप्युहनीयम् । तस्य नामान्तरं नर इति प्रसिद्धम् । तत्र शङ्कुप्रमाणं यथा – सिद्धान्तग्रंथेषु नरयन्त्रं तथा साधु दिवा च विमले रवौ । छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम्॥ सूर्य सिद्धान्त(ज्यो.२४)

**अर्काङ्गुला तु सूच्यग्रा काष्ठी द्व्यङ्गुलमूलिका ।**
**शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत् ॥** इति ज्योतिस्तत्वे ।
**समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः ।**
**तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥**यं.अ.९॥
**भ्रमसिद्धः सममूलाग्रपरिधिरति सुगुरुसारदारुमयः ।**
**रज्जुव्रणराजिलाञ्छनस्तथा च समतलः शङ्कुः ॥**३१ लल्लोक्तिः
**मूले द्व्यङ्गुलविपुलः सूच्यग्रो द्वादशाङ्गुलोच्छ्रायः ।**
**शङ्कुस्तलाग्रविद्धोऽग्रविधलम्बादृजुर्ज्ञेयः ॥** ब्राह्मस्फुटसिद्धान्ते अ.१९.श्लो.१८

सि.शेखरे :– भ्रमविरिचितवृत्तस्तुल्यमूलाग्रभागो द्विरदरदनजन्मा सारदारूद्भवो वा । गुरुऋजुरवल्म्बादव्रणः षट्कवृत्तः समतल इह शस्तः शङ्कुरर्काङ्गुलः स्यात् ॥ अ.२२,श्लो. ३५

एवं सर्वेषामाचार्याणामाशयं ज्ञात्वा एवं वक्तुं शक्यते यच्छङ्कुः सुगुरुसारदारुमयः व्रणादिरहितः भ्रमसिद्धः ऋजुः मूले द्व्यङ्गुलविपुलः सूच्यग्रो मतान्तरेण सममूलाग्रपरिधिः समतलः दिग्देशकालज्ञानार्थं द्वादशाग्ङुलमितः प्रशस्तः ।

---

[1] “खरशङ्कुपीयुनीलङ्गुमुलिगु” । उणादि १/३७/२

[2] स्थाणुः, मत्स्यविशेषः, शल्यास्त्रम्, संख्याविशेषः(दशलक्षकोटी) इति शङ्को पर्यायशब्दाः ।

[3] निक्षेप्तोऽयोमयः श~कुर्ज्जलन्नस्ये दशाङ्ग्गुलः ८/२७ इति मनुः ।


ISSN : 2320-740X

**शङ्कोः आकारभेदः**




चित्रम १. ब्रह्मगुप्तज्योतिषकारयोः मते




चित्र २.लल्लश्रीपतिभास्कराचार्याणामभिमतम

**यज्ञदत्तः**

अत्र मानार्थं स्वीकृते अङ्गुलमानेऽपि वैमत्यम्[१] आचार्याणाम् । परञ्चात्र भास्करोक्तम् अङ्गुलमानं स्वीकृतं "यवोदरैरङ्गुलमष्टसंख्यैः" ८ यवोदराणां = १ अङ्गुलम् इति । अत्र माने भेदस्तु कालदेशोद्भवः ज्ञेयः । तेन तावद्गणिते दोषः न, यतः गणिते १२ संख्या स्वीक्रियते न तु यवानां संख्या । अनेनेदं फलितं यत् शङ्कोच्छ्रायः मानादिकञ्च यथेष्टं स्वीकर्तुं शक्यम् । साम्प्रतिके यान्त्रिके काले आधुनिकयन्त्रैरेव[२] दिग्ज्ञानादिकं कर्तुं शक्यते खलु! किं प्रयोजनम् ? आचार्योक्तयन्त्राणामिति चेत् मैवं चिन्त्यम् अस्ति पलभादिषु महत्प्रयोजनम् ।

**शग्ङ्कुद्वारादिग्ज्ञानम् –** दिशति अवकाशं ददाति वा, दिश+ क्विन्[१] प्रत्ययेन निपातितः । पूर्वपश्चिमदक्षिणोत्तररादिरुपा। "कृत्वैवमवधिं तस्मादिदं पूर्वश्च पश्चिमम् । इति देशो निर्दिश्येत यया सा दिगिति स्मृता ॥" वेद.निघ.

**दिशोत्तपतिर्यथा –** यथा दिशः समुत्पनाः श्रोत्रेभ्यः पृथिवीपते! ॥ ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते ॥ वराह.पु.। प्रतिवस्तुगतानि दैर्घ्यक्षेत्रघनफलानि परिमेयाणि एतत् परिमेयज्ञानार्थं दिग्ज्ञानमावश्यकम् । दिक् च विश्वनाथन्यायपंचानेन कारिकावल्यामिथमुक्ता वरीवर्ति:– " दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते । उपाधिभेदादेकाऽपि प्राच्यादिव्यपदेशभाक् " ॥४६ अस्यायमर्थः संप्रतीयते, इदं स्थानमस्मात् स्थानात् दूरं समीपं वेत्यादि बुद्धिर्यतो निमित्तविशेषात् प्रभवति, सा दिक् । सा च एका नित्या च । दिगेका सत्यपि मूर्तद्रव्यात्मकोपाधीनां भिन्नतया विभिन्नार्थकैः प्राची–प्रतीच्यादिशब्दैः व्यपदिश्यते । व्यवहर्तुः पुरुषविशेषस्य उदयाचलाभिमुखो भूभागः प्राची, तस्यैव पुरुषस्य अस्ताचलाभिमुखो भूभागः प्रतीची । एवमेव व्यवहर्तुः पुरुषस्य सुमेरुपर्वताभिमुखो भागः उदीची, तेनैव पुरुषेण सुमेरुपर्वतव्यवहितो भूभागः अवाची इत्यादयो व्यवहारा जायन्ते । एकं स्थानमधिकृत्य क्वचित् स्थाने कस्यचित् स्थानस्यापेक्षया सामीप्यस्य बुद्धिर्जायते । यथा पाटलिपुत्रात् वाराणसीमपेक्ष्य प्रयागे दूरत्वस्य प्रयागमपेक्ष्य वाराणस्यां च समीपत्वस्य । दूरत्व–सामीप्ययोरियत्ताया निश्चयस्तु मध्यवर्तिनां मूर्तद्रव्यानां बहुत्वाल्पत्वाभ्यां सम्पाद्यते । अस्तु । स्थूल–सूक्ष्मभेदाद् दिशोऽपि द्विविधाः । स्थुलदिग्ज्ञानं प्रायः सर्वेषाम् अस्ति " यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम्" इति भास्करवचनस्फुटम् । यतः सूक्ष्मदिक्


ISSN : 2320-740X

रवेर्प्रतिक्षणक्रान्तेर्वैलक्षण्यात्स्थूलदिशः भिद्यते । शङ्कुद्वारा दिग्ज्ञानं यथा दिने विमले गगने शङ्कोः सर्वाल्पछायाग्रविन्दुः सः उत्तरविन्दुः शङ्कुदिशि दक्षिणविन्दुः उभयोः मेलनेन सा याम्योत्तररेखा वृत्ते यत्र लगति ततः मत्स्यद्वारा पूर्वापररेखा ज्ञातुं शक्या। एवं प्रतिदिनं तत्देशीयस्थानीयमध्याह्नकाले दिग्ज्ञानं सुकरम् । दिग्ज्ञाने प्रकारान्तराणि सर्वेषामुत्तरतो मेरुरिति वचनबलात् प्रथमं सुमेरुशीर्षगतं ध्रुवं विध्वा वास्तवोत्तरदिशो ज्ञानं भवेत् । रात्रौ तु नक्षत्रदर्शनेन दिग्ज्ञानम् क्रियते ।

**कालज्ञानम् –** अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङानि । परापरव्यतिकरयौगपद्यायौगपद्यं चिरक्षिप्रप्रत्ययलिङ्गम् । तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पन्नावन्यनिमित्ताभावाद् यदत्र निमित्तं स कालः । सर्वकार्याणां चोत्पत्तिस्थितिविनाशदेतुस्तद्व्यपदेशात् । (प्रशस्तपादभाष्यम्) जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ (भा.प.४५) कलयतीति काल इति व्युत्पादयन्ति शब्दानुशासकावैय्याकरणाः । एतर्हि वस्तुषु गुणकर्मादीनां परिवर्तनं कालत एव बोध्यते । तत्र एकदिक्कालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च । (वै.सू.७।२।२२) क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुः । (प्रशस्तपादभाष्यम्) परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥(भा.प.) कालिकपरत्वापरत्वज्ञानं संख्यापरिमाणयोज्ञानेन भवतीति प्रतिपादितं वर्तते । वैशिषिका अन्ये दार्शनिकाश्चाऽपि स्वीयग्रंथेषु कालपरिमाणानि प्रदर्शितवन्तः, परन्तु याथार्थ्येन सूक्ष्मतया च कालस्य परिमापणार्थं गमनादिकर्मणां परिज्ञानार्थं च यन्त्रज्ञैः दैवज्ञैः महता प्रयासेन लोकानुग्रहार्थञ्च शङ्कुघटिकादियन्त्राणि तैः निर्मितानि प्रयुक्तानि चेति । एवं त्रिप्रशनाधिकारोक्तनां निखिलपदार्थानां ज्ञानं शङ्कुयन्त्रद्वारा कर्तुं शक्यम् । एतदर्थम् जिज्ञासुसुधीभिः सूर्यसिद्धान्तत्रिप्रश्नाधिकारः सकृदवलोकनीयम्। यतः अत्र सर्वमपि प्रस्तोतुं न शक्यते ।

**तदर्थम् अपेक्षितानि उपकरणानि –**

१.लक्षणोक्तभ्रमसिद्धश्शङ्कुः । २. अङ्गुलमानाङ्किता मापिका । ३. स्थानीयः सूर्योदयास्तञ्च । ४. दिनमानम् । ५. स्पष्टाभीष्टसूर्यः। ६. अभीष्टा क्रान्तिः । ७. अभीष्टायनांशाः।

१बौधायन.शु.सू.= १४ अणू= ३४तिलाः= १ अङ्गुलः। मानब.शु.– ५७६कमलपरागाः= १यवः, ६यवाः= १अङ्गुलः।

***


ISSN : 2320-740X

# उपनयनमुहूर्त:

**सुब्रह्मण्यभट्ट:**

शोधछात्र:

मुहूर्तशब्दोऽयं कालविशेषवाचक: । वेदकाले एव मुहूर्त: कालपरिमाणपर्यायान्तरेण व्यवहृत: संदृश्यते । इह जगति प्रत्येकं वस्तु संस्कृतमेव महते उपकाराय भवति । विविधै: संस्कारै: संस्कृता: मनुजा: सुवर्णसदृशं स्वव्यक्तित्वं समाजे प्रकाशयन्त: शोभन्ते । अत एव उक्तं 'जन्मना जायते जन्तु: कर्मणा जायते द्विज:' इति ।

त्रैवर्णिकेभ्य: विहितेषु षोडशसु संस्कारेषु प्रधानभूत: द्विजत्वप्रापक: श्रौतस्मार्तकर्मानुष्ठानप्रसादक: उपनयनसंस्कार:। वटो: ब्रह्मोपदेशप्रदानमेव अत्र प्रधानमङ्गम् । सवितृदेवताकस्य गायत्रीमन्त्रस्य उपासनेन धर्ममार्गे बुद्धे: प्रचोदनं भवति । शुद्धान्त:करणस्य वटो: वेदशास्त्राद्यध्ययनं सुकरं भवति । अत एव ब्रह्मोपदेशानन्तरं वेदाभ्यासार्थं वटु: गुरो: समीपम् नीयते ।

उपनयनानन्तरं कामचारकामवादकामभक्षणादीनां नावकाश: । उपनयनसंस्कार: वटो: द्वितीयं जन्म इत्युच्यते । अत एव उपनयने मुहूर्तस्य अतीव प्राशस्त्यम् । जन्मकालिकग्रहस्थितौ अशुभफलानि विद्यन्ते चेदपि उपनयनं द्वितीयं जन्म इति हेतो: उपनयनमुहूर्तवशात् भविष्यज्जीवने शुभफलानि भवन्ति इति भावना वरीवर्ति । मन्दा: अलसा: अपि वटव: उपनयनानन्तरं अध्ययने निपुणा: भविष्यन्ति । अत: सर्वप्रयत्नेन उपनयनार्थं समीचीनं मुहूर्तं चिनुयात् ।

'मुहु: तारयन्तीति मुहूर्ता:' इति मुहूर्तपदनिष्पत्त्या शुभमुहूर्ता: अस्मान् जीवने कष्टसागरात् तारयन्ति । क्रियमाणस्य कर्मण: सम्पूर्णं शुभफलं यच्छन्ति च । यथा अकाले कृतं भोजनं विषभोजनं भवति तथैव अकाले कृतानि श्रौतस्मार्तकर्माणि विपरीतफलं यच्छन्ति । अत: कालं नियम्य कार्याणि आचरेत् । वेदविहितकर्मणां शुभकालनिर्णयार्थमेव वेदाङ्गभूतस्य ज्योतिश्शास्त्रस्य आरम्भ: । अत: कालनिर्णय: एव ज्योतिश्शस्त्रस्य परमं लक्ष्यम् । कालविधानशास्त्रमिति अस्य अन्वर्थंनाम । शास्त्रेऽस्मिन् गर्गपराशरवसिष्ठाद्यष्टादशमहर्षिभि: प्रणीता: बहव:आर्षा: ग्रन्था: प्रमाणभूता: विद्यन्ते । मुनिवचनानि सम्यग्विचार्य तेषां सारं सङ्गृह्य रचिता: निर्णायका: मुहूर्तमाधवीयमुहूर्तचिन्तामणिमुहूर्तपदवीप्रभृतय: पौरुषेयग्रन्था: अपि लोके प्रसिद्धा: सन्ति। तान् ग्रन्थान् यथामति विमृश्य उपनयनमुहूर्तं स्पष्टयितुमिच्छामि ।

**जन्माब्दात् सप्तमाऽदौ स्मृतमुपनयनं पञ्चमे चान्नभं सत् नानाध्यायो निशाऽर्कस्तपसि फणिकुजौ चाष्टमे शुक्रतोऽन्ये ।**
**ते रन्ध्रे जन्मचन्द्राद्गुरुरपि सहजे जन्मभाऽचार्यरन्ध्रं कृष्ण: पक्षोऽर्कजासृग्दिनमयनमवाक् पक्षतिर्मध्यमा वा ॥**( मुहूर्तपदवी)

'अष्टमे वर्षे ब्राह्मणमुपनयीत । गर्भाष्टमे वा ।' इति आश्वलायन गृह्यसूत्रवचनानुसारेण (अष्टमे वर्षे ब्राह्मणमुपनयीत, तमध्यापयीत इति वेदविधि:) विप्रस्य गर्भाष्टमे जन्मत: अष्टमे वा वर्षे उपनयनस्य मुख्य: काल:। एवमेव मनुस्मृतौ –


ISSN : 2320-740X

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः ॥**

गर्भात् जन्मनो वा भवतु इति सर्वत्र विकल्पः दृश्यते । गर्भाष्टमंवर्षं जन्मतः सप्तमं स्यात् । अतः क्वचन मुहूर्तग्रन्थेषु 'जन्माब्दात् सप्तमादौ स्मृतमुपनयनम्' इति वचनानि दृश्यन्ते । उक्तकालात् द्विगुणितकालपर्यन्तं ब्राह्मणादीनां उपनयने गौणकालः । यथा, ब्राह्मणस्य षोडशवर्षपर्यन्तं, क्षत्रियस्य द्वाविंशतिवर्षपर्यन्तं, वैश्यस्य चतुर्विंशतिवर्षपर्यन्तं गौणकालः । अतः ऊर्ध्वमपि असंस्कृताश्चेत् सावित्रीपतिताः व्रात्याः आर्यविगर्हिताः भवन्ति । तदाह मनुः –

**आषोडशात् ब्राह्मणस्य सावित्री नातिवर्तते ॥ इति ॥**

अपरः काम्यकालोऽपि शास्त्रे दृश्यते ।

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥** इति ॥

ब्रह्मवर्चसप्रभृतिफलस्य श्रवणात् एते काम्यकालाः इत्यर्थः ॥

यः मुख्यः कालः उक्तः तत्रैव व्रती भूयात् । तमतिक्रम्य मध्यमकालश्चेत् मध्यमं फलम् । नीचवर्षेषु नीचतां याति । अतः मुख्यः कालः एव श्रेयान् । 'अष्टमाब्दं न लङ्घयेत्' इत्यादिवचनानि सन्ति । मुहूर्तपदवीकारः अस्मात् प्रबोधयति 'अधमकालजोत्तममुहूतादधिकं उत्तमकालजोऽधममुहूर्त एव मुख्यः' इति । मुख्यकाले, वक्ष्यमाणं गुरुबलं नास्ति चेदपि शान्तिं कृत्वाउपनयनं कुर्यात् ।

सामान्यतः दक्षिणायनम्, गुरुशुक्रयोः मौढ्यम्, मलमासाः, कृष्णपक्षः, कुजशनिवासरौ च उपनयने गर्हिताः। उत्तरायणेऽपि मकरकुम्भयोः रवौ सति मध्यमं, मीनमेषयोः उत्तमम्, वृषभमिथुनयोः रवौ सति अधमं स्यात् ।

तत्रापि ब्राह्मणस्य वसन्तऋतुः, क्षत्रियस्य ग्रीष्मः, वैश्यस्य शरदृतुः श्रेष्ठः । 'वसन्ते ब्राह्मणमुपानयीत' इत्यपि वेदविधिः । अतः गर्भात् जनेर्वा अष्टमे वर्षे वसन्तर्तौ शुक्लपक्षे ब्राह्मणस्योपनयनं श्रेष्ठं स्यात् ।

गर्गादिमहर्षिभिः माघादिषु पञ्चसु मासेषु उपनयनस्य विहितत्वात् शिशिरग्रीष्मावपि ग्राह्यावेव इति सिध्यति।

उपनयने विहितानि मुख्यनक्षत्राणि वसिष्ठः आह –

**हस्तत्रये च श्रवणत्रये च धातृद्वये त्र्युत्तरमैत्रभेषु । पौष्णद्वये चादितिभद्वये च शस्तं द्विजानां खलु मौंजिकर्म ॥**

एतान्येव षोडशनक्षत्राणि अन्नभनक्षत्राणि, उपनयने प्रशस्तानि । माधवीये तु चित्रा अनूराधा धनिष्ठा उत्तरात्रयं पुनर्वसुः रोहिणी हस्तः मृगशिरः एतानि दशनक्षत्राणि मुख्यानि । पुष्यः रेवती श्रवणं शतभिषा अश्विनी स्वाती एतानि षण्णक्षत्राणि मध्यमानि कथितानि । पुनर्वसुश्रवणनक्षत्रे विहाय अन्यनक्षत्रेषु स्वनवांशस्थितः चन्द्रः बहुदुःखप्रदो भवति । शाखाभेदेन अपि नक्षत्रभेदाः निर्णीताः शास्त्रेषु दृश्यन्ते ।

वसिष्ठः उपनयनविहितान् तिथीनाह –

**शुक्लपक्षे द्वितीया च तृतीया पञ्चमी तथा । त्रयोदशी च दशमी सप्तमी व्रतबन्धने ॥**

**श्रेष्ठास्त्वेकादशी षष्ठी द्वादश्येतास्तु मध्यमाः । कृष्णे च पंचमी यावत्तिथयः संप्रपूजिताः ॥**


ISSN : 2320-740X

**एकां चतुर्थीं सन्त्यज्य कृष्णपक्षेऽपि मध्यमा : ।**

बुधगुरुशुक्रस्वामिकराशय: तदंशाश्च व्रतबन्धने प्रशस्ता:। तत्रापि शुभग्रहयुतेक्षिता: राशय: प्रशस्ता: । उपनयनलग्नात् शुभग्रहा: षष्ठाष्टमद्वादशेभ्य: इतरस्थानेषु प्रशस्ता:। त्रिषडाये पापा: शोभना:। सामान्यत: सर्वकर्मसु चन्द्रोदयस्य निन्द्यत्वेऽपि गोलर्कस्थ: पूर्ण: चन्द्र: लग्नस्थ: शुभफलप्रद: स्यात् ॥

इममेव विषयं स्पष्टीकरोति माधवाचार्य: –

**शुक्ले शुक्रसमं करोति बहुले मन्दोपमश्चन्द्रमा:** ॥ इति ॥

तस्य अभिप्रायेण शुक्लपक्षे लग्नोपग: चन्द्र: शुक्रवत् शुभफलप्रद: ।

**कवित्वं गुरुत्वं बुधत्वं च केन्द्रे । शुभास्त्रीन् गुणान् सम्प्रयच्छन्ति नृभ्य: ॥**

उपनयनलग्नात् केन्द्रे बुधगुरुशुक्रा: त्रीन् गुणान् प्रयच्छन्तीति गुणोऽयं महान् ।

**कवीज्यचन्द्रलग्नपा: रिपौ मृतौ व्रतेऽधमा: । व्ययेऽब्जभार्गवौ तथा तनौ मृतौ सुते खला: ॥**

उपनयनलग्नात् षष्ठस्थाने अष्टमस्थाने च शुक्रबृहस्पतिचन्द्रलग्नस्वामिन: मरणकारका: स्यु: । चन्द्रशुक्रौ व्यये मरणकरौ, लग्नाष्टमपञ्चमस्थानेषु स्थिता: पापा: मरणकरा: । विद्यामाधवीये अष्टमशुद्धिरेव आवश्यिका इति वदति ।

**कुजार्कौ बन्धनदौ व्ययस्थौ विद्याच्छिदौ तौ धनबन्धुसंस्थौ । वयस्थमर्कं क्षितिजोऽभिपश्यन्नाचार्यमन्धं कुरुते बलाढ्य: ॥**

'द्वादशस्थौ कुजार्कजौ बन्धनप्रदौ, द्वितीयचतुर्थस्थौ विद्यानाशकौ च भवत: । व्ययस्थमादित्यं क्षितिज: पश्यति चेत् ब्रह्मोपदेष्टारमेव अन्धं करोति'॥ एवमादीनि फलानि माधवीये कथितानि सन्ति ।

'विप्रादित: शुक्रगुरू, कुजार्कौ शशी इत्युक्ता: वर्णाधिपग्रहा: 'शाखाधिपाजीवसितारबोधना:' इति क्रमेण ऋगादिशाखाधिपाश्च कथिता: । तत्तत् वर्णेशशाखेशग्रहाणां वासरा:, लग्नगतत्वं केन्द्रगतत्वं वीर्यं च उपनयने प्रशस्तं स्यात् । अत एव सामवेदिनां कुजवासर: उपनयने न गर्हित:। एवमेव क्षत्रियाणां च ।

जन्मनक्षत्रजन्ममासजन्मलग्नादौ व्रते शुभफलान्येव शास्त्रेषु दृश्यन्ते । गुरुशुक्रशाकेशा बलरहिता: नीचस्थिता: शत्रुक्षेत्रस्थिता: युद्धे पराजिताश्च यदा स्यु: तदा व्रती वटु: वेदशास्त्रविधिना रहित: स्यात् ।

वटो: जन्मराशित: चारवशात् त्रिकोणायद्विसप्तग: गुरु: श्रेष्ठ: उत्तम: । खषट्त्र्याद्ये गुरुचार: मध्यमः अत: तत्र पूजया उत्तम: स्यात् । चतुर्थद्वादशाष्टमस्थानेषु गुरु: निन्दित: ।

**वटुकन्याजन्मराशे: त्रिकोणायद्विसप्तग: । श्रेष्ठो गुरु: खषट्त्र्याद्ये पूजयान्यत्र निन्दित: ॥**

इदमेव गुरुबलं इति लोके प्रसिद्धम् । मुख्यकलादन्यत्र गुरुबलयुक्त समये एव उपनयनं कार्यम् । उपनयनविहितमुख्यकाले गुरुबलं न वर्तते चेदपि शान्तिं कृत्वा उपनयनं कार्यम् । स्वोच्चे स्वभे स्वमैत्रे वा गुरु: वर्तते चेत् चतुर्थाष्टमद्वादशस्थानेषु स्थितोऽपि ग्राह्य एव इति विधिवचनानि सन्ति । दिवसेऽपि पूर्वाह्णादय: त्रय: काला: उपनयने श्रेष्ठमध्यमाधमा: उक्ता: ।



ISSN : 2320-740X

**सर्वदेशेषु पूर्वाह्ले मुख्यं स्यादुपनायनम् । मध्याह्ने मध्यमं प्रोक्तं अपराह्ले च गर्हितम् ॥**

'अपराह्ले चोपनीत: पुन: संस्कारमर्हति' । इति अपराह्णकालस्य अतिनिषिद्धत्वमुक्तम् । यस्मिन् दिने सन्ध्याकाले प्रदोष: भवेत्तद्दिवसे व्रतबन्धो नेष्ट: ।

**चतुर्थीयाममेकं तु सार्धयामं तु सप्तमी । अर्धरात्रं त्रयोदश्यां प्रदोषो रजनीमुखम् ॥** इति गर्गवचनम् ।

तृतीयायां रात्रौ प्रहरमध्ये चतुर्थीप्रवेशश्चेत् प्रदोष:। षष्ट्यां सार्धप्रहरमध्ये सप्तमीप्रवृत्ति: तदा प्रदोष: स्यात्। द्वादश्यां अर्धरात्रात् प्राक् त्रयोदशीप्रवृत्तौ प्रदोष: स्यात् ।

उपनयनदिने सायङ्काले ब्रह्मौदनविधे: सत्त्वात्, प्रदोषे शिवार्चनं विना सर्वकर्मणां निषिद्धत्वात् च सन्ध्याकाले प्रदोषश्चेत् दिने एव उपनयनं न कार्यमित्याशय: । ब्रह्मोपदेशरूपस्य उपनयनस्य अनध्यायदिवसेष्वपि निषिद्धत्वमुक्तम् । व्रतबन्धे अनध्याया: एवं निरूपिता: ।

भूतादित्रितयाष्टमी सङ्क्रमणं च व्रतेष्वनध्याया: ।

| | |
|---|---|
| शुक्लपक्षे | चतुर्दशीपूर्णिमाप्रतिपद: |
| कृष्णपक्षे | चतुर्दश्यमावास्याप्रतिपद: |
| पक्षद्वये | अष्टमी च अनध्याय: |
| सूर्यस्य | निरयणसंक्रान्तिदिनम् |
| मन्वादय: | युगादयश्च अनध्याया: |

अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि इति सोपपदासञ्ज्ञासु तिथिष्वपि अनध्याय: ।

सोपपादा: तिथय: –

**सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता । चतुर्थी द्वादशी माघे ह्येता: सोपपदा: स्मृता: ॥**

**अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी । अमावास्योभयं हन्ति प्रतिपत्पाठनाशिनी ॥**

**इत्यादिफलान्यपि शास्त्रे विवृतानि सन्ति । त्रयोदशी चतुष्कं च नवम्यादिदिनत्रयम् ।**

**चतुर्थ्येकाकिनी चैव अष्टावेते गलग्रहा:** ॥ इति पठिता: गलग्रहतिथयोऽपि उपनयने गर्हिता: । अनध्यायदिवसे उपनीतानां पुन: संस्कार: कर्तव्य: इति विधि: ।

**विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे । अनध्याये चोपनीत: पुन: संस्कारमर्हति ॥**

इत्यस्मिन् श्लोके वसन्तर्तौ कृष्णपक्षानध्यायादिदोषाणां अल्पत्वं सूचितम् । यत: अत्र वसन्ते ब्राह्मणमुपनयीत इति वेदविधे:प्राबल्यम् । अत: वसन्तर्तौ अनध्यायादिदोषा: नासन्तीति केचन प्रमाणयन्ति । तन्न समीचीनम् । एवं चेत् वसन्तर्तौ अमावास्यामपि उपनयनं स्यात् । किन्तु मन्वादियुगादिनैमित्तिकानध्याया: अत्र विशेषत: दोषप्रदा: न भवन्ति इति पण्डितानां आशय: । अत: वैशाखशुद्धतृतीयाया: ( अक्षयतृतीया) त्रेतायुगादित्वेऽपि उपनयनविहितनक्षत्रसद्भावे पञ्चाङ्गेषु मुहूर्तान् सूचयन्ति। अस्मिन् विषये 'उदयवाणि' दिनपत्रिकायां


ISSN : 2320-740X

महती चर्चा प्रवृत्ता वर्तते । 'विनर्तुना वसन्तेन' इति प्रमाणं पुनरुपनयनविषयमिति पूर्वपक्षाणां आशय: । अत्र पण्डिता एव प्रमाणम् ॥

**ग्रन्थसूची–**


आश्वलायनगृह्यसूत्रम् मनुस्मृतिः मुहूर्तपदवी

गर्गसंहिता मुहूर्तमाधवीय


***

# न्यायदर्शने द्रव्यस्थैर्यसिद्धान्तः

## Law of Conservation of Mass in Nyaya Philosophy


**राकेशः पि**

**शोधच्छात्रः**


आधुनिकरासायनिकशास्त्रे *(Chemistry)* प्रपञ्चस्य सृष्टिस्थितिविलयाद्युपपादकत्वेन महाविस्फोटसिद्धान्तस्य *(The Big Bang Theory)* प्रसिद्धिः वर्तते । सिद्धान्तोऽयं १९२२ तमे वर्षे अलक्साण्डर् फ्रेंट्मान्[1] *(Alexander Fred Mann)* महोदयेन आविष्कृतः । "प्रपञ्च अज्ञातसूक्ष्मतमद्रव्याणां समुद्र इव आसीत्। क्षणविशेषे एतानि सूक्ष्मतमद्रव्याणि परस्परं संयुज्य क्रमेण स्थूलतरद्रव्यमुदपादयन्, ततः स्थूलप्रपञ्चस्योत्पत्ति"रिति महाविस्फोटसिद्धान्तस्य मूलभूताशयः"[2] । न्यायशास्त्रीय आरम्भवादसिद्धान्तेन साकम् अस्य सिद्धान्तस्य महत् साम्यं प्रतीयते । रासायनिकसम्युक्तसिद्धान्ताः *(Law of Chemical Combination)* इति विख्यातानां पञ्च सिद्धान्तानां परिशीलनेनेदं स्पष्टं भवति । एते पञ्च सिद्धान्ताः न केवलं महाविस्फोटसिद्धान्तस्य, अपितु सम्पूर्ण आधुनिकरासायनिकशात्रस्यैव आधारशिलारूपेण विराजन्ते । ते च–

*1 Law of Conservation of Mass*

*2 Law of Definite Proportions*

*3 Law of Multiple Proportions*

*4 Gay Lussac's Law of Gaseous Volumes*

*5 Avogadro Law*

अत्र प्रथमः प्रधानभूतश्च द्रव्यस्थैर्यसिद्धान्तः *(Law of Conservation of Mass)* अत्र परिशील्यते । सिद्धान्तोऽयम् "आण्दणि लावोयिसर्"[3] *(Antoine Lavoisier 1743—1794 )* महोदयेन १७७४ तमे वर्षे आविष्कृतः । अयं सिद्धान्तः एकविंशतिशताब्द्यां सम्पूर्णे आधुनिकविज्ञानक्षेत्रे नूतननियमानां सिद्धान्तानामाशयानाञ्च प्रवाहं प्रारम्भयतिस्म । जोसफ् प्रौस्ट् *(Joseph Proust 1754—1826)* महोदयस्य



ISSN : 2320-740X

"*Law of Definite Proportions*" जोण् डाल्टण् (*John Dalton 1776—1884*) महोदयस्य "*Atomic Theory*" इत्यादय अस्यैव सिद्धान्तस्य उपरि निर्मिताः ।

**द्रव्यस्थैर्यसिद्धान्तः :– "द्रव्यं निर्मातुं नाशयितुं वा न शक्यते"**

*Matter can neither be created nor destroyed, although it may be rearranged in space, or the entities associated with it may be changed in form. During any chemical reaction, nuclear reaction, or radioactive decay in an isolated system, the total mass of the reactants or starting materials must be equal to the mass of the products. – Law of Conservation of Mass.*

अत्र नियमे द्रव्यशब्दः न यथाश्रुतार्थकः । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि न्यायसम्मतानि द्रव्याणि । तादृश यथाश्रुतार्थस्वीकारे नियमासंगतिः,यतोहि आकाशकालदिगात्ममनांसि नित्यानि सन्ति निर्मातुं नाशयितुं वा न शक्यन्त इति स्वत एव सिद्धम्। तस्यैव पुनरुपस्थापनाय कुतोऽयं नियम इति । न च आकाशादीनां नित्यत्वस्य लाघवज्ञानसहकृत–अनुमानसाध्यत्वात् नियमस्यापि तत्रैव नैर्भर्याद्यथाश्रुतार्थस्वीकारेऽपि नासंगतिः, अथवा आकाशादीनामेव नित्यत्वं सिद्धं, नियमेनानेन द्रव्यसामान्यस्य नित्यत्वं विवक्ष्यते, तस्य एतावता असिद्धत्वात् यथाश्रुतार्थस्वीकारेऽपि नियमसङ्गतिः इति वाच्यम्। आकाशादीनाम् अग्नेश्च द्रव्यत्वमेव [4] रासायनिकशास्त्रे नाङ्गीकृतम्, अतः नवद्रव्याणां द्रव्यपदेन ग्रहण असंगतिरेव ।

द्रव्यपदस्य यथाश्रुतार्थपरित्याग इदमेव बीजम् । पृथिवी, आपः, वायुः, प्लास्मा (*Solid, Liquid, Gas, Plasma*) एत एव रासायनिकशास्त्रसम्मताः पदार्थाः (Matter) । अत एते प्रत्येकं, मिलित्वा वा द्रव्यशब्दस्य पारिभाषिकार्थः । प्लास्मायाः अग्निसाम्येन अग्निरेव सेति केचन [5]। तेषां मते च "द्रव्यारम्भकः" द्रव्यशब्दस्य पारिभाषिकार्थः ।

उक्तनियमे निर्माणशब्दस्य यथाश्रुतार्थस्वीकार असंगतिः । घटपटादीनां निर्माण संभवात् । अत्र विवक्षितं निर्माणं न तादृशम् । अपितु यत्र किमपि द्रव्यमेव नासीत् ततः नूतनद्रव्यमुत्पद्यते चेत् सैव क्रिया निर्माणशब्देन विवक्ष्यते । सर्वमपि द्रव्यम् अन्ततो गत्वा परमाणुत उत्पद्यते, न हि शून्यात् किञ्चिदुत्पद्यते । तर्हि कोऽयं निर्माणपदार्थ इति चेदुच्यते– "शून्यनिरूपित जन्यत्वम् अथवा द्रव्येतर उपादानकत्वम् निर्माणम्" ।

नाशशब्दोऽपि न यथाश्रुतः, असङ्गतेः । घटपटादिद्व्यणुकपर्यन्तानां नाशसम्भवात् । विवक्षितश्च नाशपदार्थः सर्वात्मना नाश, अर्थात् यादृशनाशानन्तरं द्रव्यं किमपि नावशिव्यते तादृशनाशः । अतः "आरम्भकद्रव्य निरवशेषता" नाशः ।

द्रव्यस्थैर्यसिद्धान्तस्य मूलभूताशया अन्यत्रापि दृश्यन्ते । शून्यात् किमपि नोत्पद्यते (*Nothing Comes From Nothing*) इति प्राचीन ग्रीक् तत्त्वशास्त्रस्याशयः । अर्थात् अद्य प्रपञ्चे यद्यदस्ति तत् सर्वदा आसीत्, सर्वदा


ISSN : 2320-740X

भविष्यति च इति। एवं, किमपि शून्यं प्रति न गच्छति *(Nothing can pass away into nothing)* इति "एम्पडोकिल्स्" (*'Empedocles'* approx 490–430 BCE)[6] महोदयेन उक्तम् *("For it is impossible for anything to come to be from what is not, and it cannot be brought about or heard of that what is should be utterly destroyed")*।

पुनः एपिक्यूरस् *(Epicurus 341–270 BCE)* प्रपञ्चस्य स्वभावविशदीकरणवेलायां लिखितवान् "वस्तुसामान्यं तदानीमपि तावदेवासीत् यवदद्यास्ति । सर्वदा च तावदेव भवति" *(The totality of things was always such as it is now, and alwaya will be)*।

नासिर्–अल्–दिन्–अल्–तुसि *(Nasīr al–Dīn al–Tūsī 1201–1274)* अपि द्रव्यस्थैर्यसिद्धान्तमुपपाद्य उक्तवान् द्रव्यं सर्वात्मना नष्टं भवितुं नार्हति, तस्य स्वरूपम्, अवस्था, स्थितिः, रूपम् इत्यादिषु परिवर्तनं भूत्वा द्रव्यान्तरं जायते, तावदेव इति *(A body of matter cannot disappear completely. It only changes its from, condition, composition, colour, and other properties and turns into a different complex or elementary matter)*

वस्तुत आण्डणि लावोयिसर् महोदयात् पूर्वं (१७७४) मैखैल् लोमोणोसोव् (*Mikhail Lomonosov 1711–1765)* महोदयेन द्रव्यस्थैर्यसिद्धान्तः १७४८ तमे वर्षे प्रस्तुतः । अनैकैः तस्य बहुधा खण्डनं कृतमिति हेतोः स न मुख्यधारापथमागतः । अन्येऽपि सन्ति शास्त्रज्ञाः लावोयिसर् महोदयात् पूर्वं सिद्धास्यास्य उपस्थापकाः यथा जोसप् ब्लाक् (*Joseph Black 1728–1799*), हेन्रि कावण्डिष् *(Henry Cavendish 1731–1810)*, जीन् रे (*Jean Ray 1583–1645*) इत्यादयः ।

न्यायदर्शनप्रपञ्चे द्रव्यस्थैर्यसिद्धान्तः न नूतनः । प्रपञ्चोत्पत्त्युपपादकारम्भवादादेव अर्थतः सिध्यत्ययं सिद्धान्तः । परमाणूनां परस्परं संयोगेन द्व्यणुकत्र्यणुकादिक्रमेण स्थूलप्रपञ्चस्योत्पत्तिरित्यारम्भवादिनां समयः । प्ररमाणुरेव कस्मादुत्पन्न इति प्रश्ने सति आकाशादिवत्परमाणुरपि नित्य इति साधयन्ति । तथा च नित्येभ्यः परमाणुभ्य एव सम्पूर्णप्रपञ्चस्य उत्पत्तिः । अतः साक्षात्परम्परया वा परमाणुनिष्ठजनकतानिरूपितजन्यतावन्ति एव तादृशद्रव्याणि सर्वाणि । तदतिरिक्ततया नूतनद्रव्यस्योत्पत्तिः न सम्भवतीति द्रव्यस्थैर्यसिद्धान्तस्य प्रथमांशोपपत्तिः। तदनु द्रव्यनाशे सति सोत्तरक्षणे तदवयवाः, अवशिष्यन्ते । द्व्यणुकनाशात् परमाणव अवशिष्यन्ते । परमाणूनां पुनः नाश एव नास्ति, नित्यत्वात् । तथा च द्रव्यं तादृशनाशस्य विधेयं नैव भवतीति द्वितीयांशस्याप्युपपत्तिः । इत्थं द्रव्यस्थैर्यसिद्धान्त आरम्भवाद एव अन्तर्भूतः ।

[1] Friedmann's 1924 papers included "*Über die Möglichkeit einer Welt mit konstanter negativer Krümmung des Raumes*" (*About the possibility of a world with constant negative*


ISSN : 2320-740X

*curvature*) which was published by the Berlin Academy of Sciences on 7 January 1924. Friedmann's equations describe the Friedmann–Lemaître–Robertson–Walker universe.

2 According to the Big Bang model, the universe expanded from an extremely dense and hot state and continues to expand today. A common analogy explains that space itself is expanding, carrying galaxies with it, like spots on an inflating balloon.

3 Antoine–Laurent de Lavoisier (also Antoine Lavoisier) 26 August 1743 – 8 May 1794; was a French nobleman and chemist. He is widely considered to be the "Father of Modern Chemistry."

4 द्रव्यत्वं – भारयुक्तत्वे सति स्वस्थित्यर्थं किञ्चित्स्थानसापेक्षत्वम्। Anything which has mass and occupies space is called **matter** in chemistry.

5 "पृथिवि आपः तेजः वायुश्च द्रव्यमिति व्यपदिश्यत" इति अरिस्टोट्टिल् (Aristotle) महोदयानां सिद्धान्तः । रोबर्ट् बोयिल् () इति शास्त्रज्ञेन *The Sceptical Chymist: or Chymico–Physical Doubts & Paradoxes* इति स्वकीये विशिष्टग्रन्थे अस्य सिद्धान्तस्य निरासः कृतः ।

**6** T. Padmanabhan: *After The First Three Minutes; The Story of our Universe*. Cambridge University Press.

***

# अज्ञानध्वान्तचण्डभास्करग्रन्थोक्तदिशा वासनाक्षयविचारः

**विक्रान्त केल्करः**

**शोधच्छात्रः**

अखण्डेऽस्मिन् जगति सर्वस्यापि प्राप्तजन्मनः जीवनलक्ष्यं तावत् सुखं मे भूयात्, ततः सद्गतिश्च मे भवेदित्येव इति सर्वविदितमेव । परं अज्ञानध्वान्तदोषेण सन्मार्गमजानन्तः संसारसागरे मज्जनोन्मज्जनाभ्याम् अत्यन्तं खिद्यमानाः, निपतिताः भूत्वा जीवनस्य परमपुरुषार्थेषु चरममोक्षप्राप्तौ अशक्ताः भूत्वा नितरां खिद्यमानाः जीवन्ति। सांसारिकलौकिकवैदिककर्मातिदुश्शीतवातेन कम्पिताः कामक्रोधादिवेतालभयनितान्तभीताः, आशाशसन्ताडिताः भूत्वा खिन्नाः भवन्ति । अतः तादृश अज्ञाननिर्मूलनाय यथोक्तमोक्षाधिकारं लब्ध्वा अज्ञाननिवृत्तिपूर्वक–आनन्दाविर्भावरूपं परमानंदमासाद्य सुखिनो भवन्त्विति मनीषया ग्रन्थकर्त्रा उक्तदिशा तत्परिहरोपायः विचार्यते ।

बहुकालमारभ्य श्रवणमननिदिध्यासनानुष्ठानं कुर्वन्तोऽपि अधिकारिणः ब्राह्मणाः ब्रह्मसाक्षात्काराभावेन संसारबद्धा एव दृष्टा इति श्रवणादीनां ज्ञानसाधनत्वम् अन्वयव्यभिचारात् कथमभ्युपगन्तव्यम् इत्युक्ते


ISSN : 2320-740X

तेषामधिकारिणां वासनाक्षयरूपसहकार्यभावेन शीघ्रं ज्ञानं नोत्पद्यत इति । तर्हि का वा एषा वासना? के वा वासनाक्षयोपायाः? इति ग्रन्थेऽस्मिन् विचार्यते । तत्र का नाम वासना इति चेत् मिथ्याभूतेऽस्मिन् जगति विद्यमानैः सह बन्ध एव । उक्तं च–

**बन्धो हि वासनाबन्धःमोक्षः स्याद्वासनाक्षयः । वासनास्त्वं परित्यज्य मोक्षार्थित्वं परित्यजेत् ॥** इति ।

ज्ञानेन्द्रियैः कर्मेन्द्रियैः वा अस्माभिः क्रियमाणानां सर्वेषामपि कर्माणां तथा दुःखनिवारणाय क्रियमाणानां सर्वेषामपि कर्माणां वासना एव मूलम् । अतः तत्र तत्र मोक्षशास्त्र प्रतिपादितत्त्वत् श्रवणादीनां सहकारित्वेनाङ्गीकृतः वासनाक्षयः सम्पादनीयः। कियतापि कालेनात्मनि विचारितेऽपि केषाञ्चित् चित्तेषु प्रबलप्रारब्धवशेन कामक्रोधलोभनिन्दावमानगर्वलोकवासनाशास्त्रवासनादेहवासनादिरूपाः ऐहिकवासनाः कर्तृत्वाभिनिवेशपूर्विकाः परलोकवासनाश्च रूढमूलाः निवसन्ति चेत् केनचिदपि प्रयासेनापि प्रज्ञास्वात्मस्वरूपे न सम्यगवतिष्ठते । जन्मान्तरे तु अवतिष्ठते "अन्तःशरीरे ज्योतिर्मयो वा शुभ्रोऽयं प्रपश्यन्ति यतयः क्षीणकल्मषा" इत्यादिश्रुतेः ।

**शरीरेऽन्तस्स्वयं ज्योतिः स्वरूपं स्वकमीश्वरम् । क्षीणदोषाः प्रपश्यन्ति नेतरे माययावृताः ॥** इति चोक्तत्वात् ।

प्रज्ञामान्द्यकुतर्कविपर्ययदुराग्रहादिदोषरहिताः समानाधिकणसूक्ष्मार्थग्रहण निपुणकुशलतीव्रप्रज्ञामहाधनाः पुरुषश्रेष्ठाः प्रागुदीरितकामादिचित्तदोषाणां प्रतीकारं तत्तद्दुर्वासनाप्रतिपक्षभूत तत्तत्सद्वासनाप्रतिपादकशास्त्रेण युक्तिबलेन च धैर्यब्रह्मचर्य सहिष्णुत्यादिस्वनैपुण्येन सत्पुरुषसमागमेन च यथोचितं सम्पाद्यभिभवं कुर्वन्ति चेत् दीर्घकालनैरतन्तर्यसत्कारसेवितानि श्रवणादीनि अविद्यानिवर्त्तनक्षमं प्रत्यगभिन्नब्रह्मसाक्षात्कारं इदानीमेव सम्पादयन्ति । तत्र प्रतिबन्धकानां काम क्रोधमोहादीनां परित्यागः अत्यावश्यकः। सत्यात्ममिथ्यादृश्यवस्तुविवेकदृष्ट्या शास्त्र प्रसिद्धैहिकामुष्मिकविषयदोषदृष्ट्या च संकल्पमूलं सर्वानर्थहेतुभूतं काममोहादिकं निहत्य एव ब्राह्मणो मोक्षार्हो भवति । भवन्ति चात्र श्लोकाः–

**काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विध्येनमिह वैरिणम् ॥**[1]

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथालोभःतस्मादेतत्त्रयं त्यजेत् ॥**[2]

**यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य सेति ॥**[3]

शरीरस्थाः विभिन्नाः वासनाः–

स्थूलशरीरे वातपित्तश्लेष्मजन्याः व्याधयः, सूक्ष्मशरीरे कामादिवासनाः प्राप्ताः, शान्त्यादिवासनाः अप्राप्ताश्च, कारणशरीरे तु आगमिस्वप्नजाग्रत्संसारदुःखबीजरूपाः वासनाः च । बहिः शत्रुव्याघ्रवृश्चिकाद्याः कोटिशः

---

[1] . गीता. ३.३७

[2] .गीता. १६.२१

[3]. गीता.२.५२


ISSN : 2320-740X

दुःखहेतवो निवसन्ति इत्यतः तेषु सर्वेष्वसंख्याकेषु एतच्छरीरत्रयं पीडयत्सु सत्सु 'तत्सर्वहिंसाबुद्धिरूपक्रोधदावाग्निना दंदह्यमानःत्वमेव विनश्यन् सन्, कं वा दुःखहेतुं हन्तुं शक्नोषि, उक्तेषु एको वा कथं तव वशे तिष्ठेत्, नैकस्यापि हनने तव सामर्थ्यं स्यात्, इत्येवं आत्मपीडनप्रकारकाः वासनाः उक्ताः ।

विभिन्नशरिरेषु वर्तमाना भेदबुद्धिः मिथ्या । अनेकस्फटिकस्तम्भप्रतिफलितः शुनकः स्वप्रतिबिम्बैः सह कलहं कर्तुमुद्यक्तश्चेत् लोकः तं यथा हि उपहसेदेवमेव अहं परमकारणाद्वितीयबिम्बभूतब्रह्मचैतन्यप्रकाशरूपस्सन् स्वाध्यस्ताज्ञानकार्यान्तःकरणोपाधिषु एक एव प्रतिबिम्बितोऽहमिति त्वमित्ययमिति स इति च जलाधारेषु अंशुमानिव चालिन्यामातप इव नानारूप इवावभासमानः स्वप्रतिबिम्बभूतैः जीवैस्सह कलहं कुर्यां चेत्तत्त्वज्ञो मामुपहसेदिति विलज्जितः शत्रुमित्रस्वदेहादिष्वेकमेव कूटस्थनिर्विकारमसंगनित्योदासीनं कार्यकारणासंस्पृष्टं परमकारणं प्रत्यग्भूतमानन्दघनं ब्रह्मचैतन्यं सम्पश्यन् प्रशान्तचित्तः चित्तमात्मनि स्थिरीकुर्यात् । स्वविषयकाधिक्षेप ताडनतर्जनभर्जनविकर्तनमूत्रविष्ठनिष्ठीवनविसर्जनादिभिः विकारैः आत्मानमन्ये पीडयन्ति चेत् प्रारब्धक्षय एव ममाभवत् ।

वासनाक्षयनिवारणेन सह मोक्षप्राप्त्युपायः–

**असन्तोषः परं दुःखं सन्तोषः परमं सुखम् । सुखार्थी पुरुषस्तस्मात् सन्तुष्टः सततं भवेत् ॥**

**तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये । आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥**

'आत्मैवेदं सर्वं'[1], 'ब्रह्मैवेदं सर्वं'[2], 'सर्वं खल्विदं' ब्रह्म'[3], 'ऐतदात्म्यमिदं सर्वं'[4], 'तत् सत्यं'[5], 'स आत्मा' , 'तत्त्वमसि'[6] इत्यादिश्रुतिशतेभ्यः इदं सर्वमहमस्मि, अहमेव ब्रह्म, ब्रह्मैवाहमस्मीति परस्परतादात्म्यं अनुभूय तं च अनुभवं दृश्यं दृगात्मनात्मनि प्रविलाप्य तच्च विलापनमात्मचैतन्यप्रकाशरूपत्वेनावलोक्य मौनैकसमधिगम्यत्वमात्रावशिष्टाखण्डब्रह्मचैतन्यप्रकाशरूपस्सन् प्रकाशमानः ब्राह्मणः ब्रह्मवित्प्रवरः जीवन्मुक्तः परममोक्षार्हो भवति । नात्र संशयः । एतावताः परमश्रेयसो वासनाक्षयः कारणमिति निरूपितम् ।

***

---

1 . छा. ७–२५–२

2 . नृ. ७–३

3 . छाः ३–१४–१

4 , छा.६–८–७, ३–४,

5 . ऐत ३–१२

6 . छा. ६–८–७


ISSN : 2320-740X

# शास्त्रेषु लौकिकन्यायानामुपयोगः

**सुनीता भट्टः**
शोधच्छात्रा

शास्त्रेषु निहितानां गभीरविचाराणां सारल्येन अवगमनाय लोकप्रसिद्धाः न्यायाः शास्त्रकृद्भिः उपयुज्यन्ते । न्यायव्याकरणमीमांसावेदान्तादिषु सूक्ष्मार्थविवेचनगर्भितेषु शास्त्रेषु परिदृश्यमानाः कतिपय लौकिकन्यायाः अत्र सङ्गृह्य संक्षेपेण निरूप्यन्ते ।

**१.सूचीकटाहन्यायः –** यत्र लोहकारं प्रति कश्चित् कटाहोत्पादनार्थी आगच्छति, पश्चात् अन्यः कश्चित् सूच्युत्पादनार्थी आगच्छति, तत्र लोहकारः प्रथमं कर्तव्यत्वेन प्राप्तमपि कटाहं बहुकालसाध्यत्वात् परित्यज्य पश्चात्कर्तव्यतया प्राप्तामपि स्वल्पकालसाध्यां सूचीं प्रथमं निर्माति । तथा च यत्र अनेकेषु पदेषु वाक्येषु वा व्याख्येयेषु सत्सु, प्रथमपठितमपि बहुविषयकं पदं वाक्यं वा परित्यज्य पश्चात् पठितमपि अल्पविषयकं पदं वाक्यं वा व्याख्यायते तत्रायं न्यायः प्रयुज्यते ।

**२.शते पञ्चाशदितिन्यायः –** शतसङ्ख्याकवस्तुषु पञ्चाशत् सङ्ख्याकवस्तूनि अन्तर्भवन्ति । यथा शतरूप्यकेषु पञ्चाशत् रूप्यकाणि । इत्थं च यत्र अधिकसङ्ख्याकवस्तुषु न्यूनसाङ्ख्याश्रयत्वेन व्यवहारः न तु न्यूनसङ्ख्यापर्याप्तिमत्वेन यथा – भूतले दशसु घटेषु सत्सु "द्वावपि घटौ भवतः अत्र" इति तत्रायं न्यायः प्रयुज्यते।

**३.काकतालीयन्यायः –** कश्चन काकः तालवृक्षस्य अधः यदा आगतः तस्मिन्नेव क्षणे वृक्षात् तालफलमेकं भूमौ पतितम् । झटिति काकः तत् फलं गृहीत्वा अभक्षयत् । अत्र फलप्राप्तेः काकागमनस्य च कार्यकारणभावो न लोके प्रसिद्धः । यद्वा काको यदा तालवृक्षाधोभागे आगतः तस्मिन्नेव क्षणे तालफलं वृक्षात् काकस्य शिरसि पतितम् । तेन काको मृतः । अत्र शिरसि फलपतनस्य काकागमनस्य च कार्यकारणभावो न सिद्धः । इत्थं यत्र द्वयोः क्रिययोः कार्यकारणभावस्य लोके असिद्धावपि पूर्वापरीभावः अदृष्टवशात् घटते सुफले दुष्फलं वा पर्यवस्यति तत्रायं न्यायः प्रयुज्यते ।

**४.चालनी न्यायः –** चालन्याः पौनः पुन्येन भ्रमणे सति तत्स्थाः सारभूताः अल्पाः तण्डुलादिकणाः रन्ध्रद्वारा क्रमशः अधः पतन्ति । असारभूताः स्थूलाः तुषादयः उपर्येव अवशिष्यन्ते । यद्वा सारभूताः स्थूलाः धान्यादयः उपर्येव अवशिष्यन्ते, असाराः अल्पाः कणादयः अधः पतन्ति । इत्थं यत्र कस्याश्चित् प्रक्रियायाः आवर्तनेन प्रकृतानां सर्वेषां साराणाम् असाराणां वा क्रमशः पृथक्करणं सम्भवति तत्रायं न्यायः प्रयुज्यते ।

**५.घट्टकुटीप्रभातन्यायः –** घट्टः नदीतीरादिस्थानम् । कुटी – राजग्राह्यकरग्राहकाणां राजभृत्यानां अल्पः निवासस्थानविशेषः। घट्टकुटीं सन्निहिताः तत्र करग्राहिभ्यः भीत्या मार्गान्तरेण गन्तुमुद्दिश्य रात्रौ पलायिताः पथिकाः वणिजः अटित्वा अटित्वा प्रभातकाले पुनः तत्रैव घट्टकुट्याम् आगताः । तथा च यत्र प्रकृतस्य कस्यचन दोषस्य परिजिहीर्षया गुरुभूतमार्गान्तरमनुसृत्यापि पुनस्तद्दोषग्रासो भवति, तत्रायं न्यायः प्रयुज्यते । यत्र तु प्रकृतस्य


ISSN : 2320-740X

कस्यचन दोषस्य परिजिहीर्षया अनुसृतेन उपायान्तरेण गुरुभूतदोषान्तरनिपातः तत्र तु वृश्चिकभिया पलायमानस्य आशीविषामुखे निपातः इति न्यायः प्रयुज्यते ।

**६.भक्षितेऽपि लशुने न शान्तो व्याधिः –** लशुनस्य भक्षणं शास्त्रेण निषिद्धम् । लशुनस्य दुर्गन्धः असह्यश्च । तदेतत् जानन्नपि कश्चित् पुरुषः व्याधिपीडितः 'लशुने भक्षिते व्याधिरयं शाम्यति' इति कस्यचिद्वचनं श्रुत्वा कथञ्चिदपि व्याधिं शमयितुकामः शास्त्रमुल्लङ्घ्य लशुनं भक्षयति । परन्तु तावतापि व्याधिः न शान्तः । इत्थं यत्र फलविशेषप्राप्तीच्छया नियममुल्लङ्घ्य अनीप्सितकर्म कृत्वापि उद्दिष्टफलं नावाप्यते तत्रायं न्यायः प्रयुज्यते ।

**७.उत्पलशतपत्रभेदन्यायः –** सूच्या उत्पलस्य शतपत्राणां भेदने सति शतसङ्ख्याकानामपि पत्राणां भेदनं युगपदेव जातम् इति प्रतीयते । यद्यपि क्रमशः एकैकमेव पत्रं सूच्या भिन्नं, न तु युगपत् तावन्ति तथापि नानाभेदनक्रियाणां तत्तत् सूक्ष्मक्षणेषु वेगातिशयेन अव्यवधानेन निष्पादितत्वात् यौगपद्यभ्रमो जायते । तथा च यत्र वेगातिशयेन जायमानासु क्रमिकासु क्रियासु यौगपद्यभ्रमो जायते तत्रायं न्यायः प्रयुज्यते । यथा दीर्घशष्कुलीभक्षणदशायां शष्कुलीदर्शन–तद्रसरासन–तच्चर्वणजनितशब्दश्रवणानां क्रमिकाणामपि यौगपद्यभ्रमः ।

**८.वीचीतरङ्गन्यायः –** सरसि वेगवतो वायोरास्फालनात् प्रथमं एका वीचिः, ततोऽन्यस्तरङ्गः ततस्तरङ्गान्तरम् इत्येवमुत्तरोत्तरं तरङ्गपरम्परा जायते । तथा च यत्र एकस्याः व्यक्तेः सकाशात् तदुत्तरं तत्सदृशव्यक्त्यन्तरस्य ततः तदुत्तरं पुनस्तत्सदृशव्यक्त्यन्तरस्य इत्येवं बहूनां व्यक्तीनाम् उत्तरोत्तरमुत्पत्तिः क्रमशः अनुवर्तते तत्रायं न्यायः प्रवर्तते । यथा भेरीदेशे उत्पन्नशब्दात् शब्दान्तरोत्पत्तिक्रमेण दूरस्थश्रोत्रदेशपर्यन्तं शब्दपरम्परा जायते ।

**९.कदम्बगोलकन्यायः –** गोलके प्रथमं विकसितं कदम्बपुष्पं स्वसमीपदेशे परितः सर्वासु दिक्षु अन्यानि स्वसजातीयानि कदम्बपुष्पाणि जनयति । तानि पुनः तस्मिन्नेव गोलके तत्समीपदेशे सर्वदिक्षु सजातीयान्यन्यानि पुष्पाणि जनयन्ति । तथा च यत्र एकव्यक्तेः सकाशात् तत्समीपदेशे परितः युगपत् नानासजातीयव्यक्त्यन्तराणामुत्पत्तिः ततश्च पुनः एकैकशः सजातीयनानाव्यक्त्यन्तराणां तथैवोत्पत्तिः तत्रायं न्यायः प्रयुज्यते । यथा भेर्यवच्छेदेन जायमानः शब्दः तत्समीपदेशे दशसु दिक्षु सजातीयशब्दान्तराणि दशोत्पादयति, तानि पुनः तथैव शब्दान्तराणि जनयन्ति ।

**१०.मणिमन्त्रादिन्यायः –** वह्निः दाहं प्रति असाधारणं कारणं, तथापि वह्नौ चन्द्रकान्तमणिसंयोगे सति दाहो न जायते । एवं मन्त्रविशेषप्रयोगे ओषधिलताविशेषसंयोगे सत्यपि दाहो न जायते । एतदनुभवानुरोधेनैव मणिमन्त्रादीनां दाहं प्रति प्रतिबन्धकत्वं कल्प्यते । न तु मण्यादेः दाहादन्यत्र क्वचित् कार्ये प्रतिबन्धकत्वं दृष्ट्वा अत्रापि दाहं प्रति प्रतिबन्धकत्वं स्वीक्रियते । तथा च यत्र स्वातन्त्र्येण (विशेषरूपेण) प्रतिबन्धकत्वं स्वीक्रियते, न तु अन्यत्र क्वचित् प्रसिद्धं सामान्यप्रतिबन्धकत्वं तत्रायं न्यायः प्रयुज्यते । यथा – पुरुषस्य ज्ञानसामान्योत्पत्तौ कामिनीजिज्ञासायाः स्वातन्त्र्येण प्रतिबन्धकत्वम् ।


ISSN : 2320-740X

**११.उभयतः पाशा रज्जुः –** मृगादेः बन्धनार्थं रज्जोः द्वयोरपि अग्रभागयोः ग्रन्थिविशेषः निर्मीयते । तत्र रज्जौ प्रविष्टो मृगादिः पुनः इतः ततो वा चलनेऽपि रज्वा बद्धो भवति । इत्थं, यत्र प्रकृतयोः द्वयोः पक्षयोः यस्य कस्यचिदाश्रयणेऽपि दोषापातो दुर्निवारः, तत्रायं न्यायः प्रयुज्यते ।

**१२.दण्डचक्रन्यायः –** दण्ड–चक्र–सलिल–कुलालादीनां सर्वेषां कारणानां सत्त्वे एव घट उत्पद्यते, न तु दण्डादेः एकमात्रस्य सत्त्वे । अत एषां दण्डचक्रादीनां परस्परसहकारेणैव घटं प्रति कारणत्वं न तु परस्परनिरपेक्षतया । एवञ्च, यत्र एकधर्मावच्छिन्नं प्रति नानाधर्मावच्छिन्नानां परस्परसहकारेणैव कारणता तत्रायं न्यायः प्रयुज्यते ।

**१३.करिबृंहितन्यायः –** बृंहितम् इति पदस्य करिगर्जनम् इत्यर्थः 'बृंहितं करिगर्जितम्' इति कोषात् । 'करिबृंहितम्' इत्यत्र तु बृंहितशब्दात् गर्जनमित्येवार्थो बोध्यते न तु करिसम्बन्धिगर्जनम् । करिसम्बन्धस्तु करिशब्दात् बोध्यते । एवं, '**तत्र स द्विरदबृंहितशङ्की**' इत्यत्रापि द्विरदशब्देन करिसम्बन्धबोधनात् बृंहितशब्दात् गर्जनमात्रं बोध्यते । तथा च यत्र विशेषणवाचकपदाव्यवहितोत्तरं विशिष्टवाचकपदस्य प्रयोगोऽस्ति तत्रायं न्यायः प्रयुज्यते । एतन्न्यायार्थ एव नियमे पर्यवस्यति **'विशिष्टवाचकपदानां सति पृथग् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्'** इति ।

**१४.अलङ्कृत्य शिरश्छेदः –** काभ्यश्चित् तामसदेवताभ्यः अजादिबलिप्रदानावसरे, बलित्वेन प्रदेयपशुः पुष्पादिभिः अलङ्कृत्य पश्चात् शिरसि छिद्यते । एवमेव, यत्र पूर्वपक्षः सयुक्तिकं बहुधा परिष्कृत्य अन्ते सिद्धान्तिना प्रबलदूषणेन दूषयित्वा खण्ड्यते, तत्रायं न्यायः प्रयुज्यते ।

**१५.अश्मलोष्टन्यायः –** लोष्टस्योपरि अश्मखण्डस्य क्षेपणे सति लोष्टं विशीर्यते, न तु अश्मखण्डम् । अश्मन उपरि लोष्टस्य क्षेपणेऽपि लोष्टमेव विशीर्यते । इत्थं, यत्र कस्मिंश्चित् दुर्बले प्रबलः वैरं साधयति, दुर्बलेन पुरुषेण वा प्रबलः विरोधं प्राप्नोति उभयथापि च दुर्बल एव क्लेशमनुभवति तत्रायं न्यायः प्रयुज्यते ।

**१६.तुलोन्नमतन्यायः –** तुलायाः एकस्मिन् पार्श्वे यत्नेन उन्नमिते सति तत्प्रतिद्वन्द्वी अपरः पार्श्वः विना यत्नम् अधो नमति । इत्थं, यत्र एकस्य उत्थापनेन सम्माननेन वा तत्प्रतिद्वन्द्विनः अपरस्य अधोनयनं अपमाननं यद्वा एकस्मै उपकृतिप्रदानेन तत्समकक्षस्य अपरस्य अपकृतिर्भवति तत्रायं न्यायः प्रयुज्यते ।

**१७.कूपमण्डूकन्यायः –** कूपस्थजले उत्पद्य तत्रैव वसन् मण्डूकः कूप एव समस्तं जगदिति, कूपादतिरिक्तं जगन्नास्तीति मन्यते। इत्थं, यः अल्पज्ञः स्वेन अवगतमल्पमेव बहुमन्यते, ज्ञेयस्य प्रपञ्चस्य विस्तारं न विजानाति, तस्मिन् अयं न्यायः प्रयुज्यते ।

**१८.शिरोवेष्टनेन नासिकास्पर्शन्यायः –** प्राणायामकरणावसरे हस्ताङ्गुल्या नासिकास्पर्शनमावश्यकम् । तत्र हस्तेन साक्षात् नासिकां स्प्रष्टुं शक्यत्वे, शिरो वेष्टयित्वा तत्स्पर्शनम् अयुक्तम् । इत्थं यत्र ह्रस्वेन उपायेन साधनीयकार्याय सुदीर्घ उपायः आश्रीयते तत्रायं न्यायः प्रयुज्यते ।

**१९.चक्रभ्रमणन्यायः –** कुलालः घटनिर्माणावसरे दण्डेन चक्रं भ्रामयित्वा ततो दण्डं प्रतिनिवर्तयति । किन्तु भ्रमणहेतोः दण्डस्य निवृत्तावपि चक्रे दण्डजनितवेगसंस्कारवशात् चक्रस्य भ्रमणं किञ्चित्कालमनुवर्तते । तथा च यत्र


ISSN : 2320-740X

कारणनिवृत्तावपि तज्जनितसंस्कारानुवृत्तिं यावत् कार्यस्यानुवृत्तिः तत्रायं न्यायः प्रयुज्यते । यथा संसारहेतोः मिथ्याज्ञानस्य तत्त्वसाक्षात्कारेण निवृत्तावपि मिथ्याज्ञानजनितप्रारब्धकर्मजसंस्कारं यावत् संसारो अनुवर्तते ।

**२०.खलेकपोतन्यायः –** खले पतितान् धान्यकणान् अत्तुं वृद्धकपोताः युवकपोताः शिशुकपोताश्च युगपदेव खले पतन्ति । इत्थं, यत्र सुचिरात् चिरात् अचिराच्च निष्पन्नानां बहूनां वस्तूनाम् एकस्मिन् कार्ये युगपदेव अन्वयः तत्रायं न्यायः प्रयुज्यते । यथा 'ग्रामं गच्छति' इति वाक्यात् क्रमशः उपस्थितानां ग्राम–कर्मत्व–गमनादीनां पदार्थानां युगपदेव शाब्दबोधेऽन्वयो भासते ।

**२१.शृङ्गग्राहिका न्यायः –** गवां समुदाये 'त्वदीया गौः का?' इति पृष्ठः कश्चित् गोपालः स्वकीयधेनुं शृङ्गग्रहणेन प्रदर्श्य वदति 'इयं मदीया' इति । इत्थं यत्र सामान्यतोऽवगतमपि प्रकृतं वस्तु, विशेष प्रतिपत्त्यर्थं विशिष्य निर्दिश्यते, तत्रायं न्यायः प्रयुज्यते।

**२२.देहलीदीपन्यायः –** रात्रौ गृहद्वारस्थदेहल्यां स्थापितस्य दीपस्य प्रभा गृहस्यान्तः बहिश्च प्रसरति । एवमेव यत्र वाक्यमध्यस्थपदस्यार्थः पूर्वपदार्थेन उत्तरपदार्थेन च अन्वेति तत्रायं न्यायः प्रयुज्यते ।

**२३.कैमुतिकन्यायः –** किमुत इत्यस्य भावः कैमुतिकम् । यत्र प्रकृतकार्यात् गुरुभूतकार्यान्तरसम्पादकत्वम् उल्लिख्य प्रकृतकार्यसम्पादने सामर्थ्यं दृढीक्रियते तत्रायं न्यायः प्रयुज्यते । यथा– 'हनूमान् अब्धिमेव अतरत् किमुत तडागम्' इति ।

***

## "अथ शब्दानुशासनम्" इत्यत्र शब्दकौस्तुभ–शाब्दिकचिन्तामणिकारयोराशयः

**श्री टि. आर्. कृष्णमूर्तिः**

शोधच्छात्रः

भगवान् भाष्यकारः प्रयोजनप्रवणत्वात् श्रोतृप्रवृत्तिसिद्धये शास्त्रादौ तत् तात्पर्यलोचनालभ्यस्य प्रयोजनस्य अवश्यवक्तव्यत्वात् व्याकरणस्य साक्षात् प्रयोजनमवोचत् "अथ शब्दानुशासनम्" इति । तत्र चिन्तामणिकारः — यद्यपि अनेन वाक्येन शास्त्रारम्भः प्रतिपाद्यते तथापि प्रयोजनाभावादनारम्भशङ्कायाम्– "यतश्शब्दानुशिष्टिफलकरणं व्याकरणम् अतः आरम्भणीयम्" इति प्रयोजन–कीर्तनेन आरम्भसमर्थनात् प्रयोजनकथने वाक्यस्य तात्पर्यं बोध्यम् इति ।

तत्र "स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इति लक्षणमनुसृत्य स्ववाक्यं व्याख्यास्यन् 'अथ' इत्ययं शब्दः अधिकारार्थः प्रयुज्यते इति भाष्यकारः विवृणोति ।

तत्र चिन्तामणिकारः आह — इति शब्दोऽनेकार्थोऽप्यत्र पदार्थविपर्यासं द्योतयन् 'गौरित्याह' इत्यादिवदर्थपदार्थत्वात् अथशब्दं प्रच्याव्य स्वरूपपदार्थकत्वं व्यवस्थापयति । अयमत्र कैयटाभिप्रायः —

 ISSN : 2320-740X

“अधिरुपरिभावे वर्तते ह्यर्थे च अयं च पठितः” इति शब्देन विनापि स्वरूपपरत्वं दृश्यते तथापि इतिशब्दप्रयोगे स्वरूपपरत्वं स्पष्टं भवतीति इतिशब्द इह प्रयुक्तः । स च इदं शब्दप्रयोगात् आगतस्य अथ शब्दस्य व्यावर्तनाय । तेन एतद् वाक्यगतोऽथशब्दोऽधिकारार्थ इति लभ्यते । अन्यथा लोके सर्वोऽपि अथशब्दोऽधिकारार्थ इति प्रतीतिः स्यात् । ततश्च अथशब्दस्य लोके आनन्तर्याद्यनेकार्थदर्शनादिदं व्याख्यानमसमञ्जसं स्यात् । सम्प्रति अथ इति निपातस्य द्योतकत्वं वा वाचकत्वं वा ? इति मनाक् अत्र प्रस्तूयते । तत्र कौस्तुभकारः ‘अथ’ शब्दः प्रारम्भस्य द्योतकः न तु वाचकः निपातत्वात्, उपसर्गवत् इति अभिप्रैति । न च तेऽपि वाचका एवेति वाच्यम् । उपास्यते गुरुः, अनुभूयते सुखम् इत्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव उक्तत्वात् । उक्तयुक्त्या अस्तु उपसर्गाणां द्योतकता, निपातानान्तु वाचकत्वमेवेति चेत् उच्यते – साक्षात् क्रियते, अलङ्क्रियते, उररीक्रियते इत्यादौ कर्मणि लकार दर्शनात्, कर्मीभूतगुर्वादीनां तत्र वाच्यत्वमङ्गीकर्तव्यम् । उपसर्गत्वापेक्षया निपातत्त्वस्य अधिकवृत्तितया तदवच्छेदेनैव द्योतकता कल्पनाच्च । सामान्ये प्रमाणानां पक्षपातित्वात् ।

किञ्च चादीनां वाचकत्वे समानाधिकरणप्रातिपदिकयोः अभेदान्वयः इति व्युत्पत्तिः निपातेतरविषयकतया विना प्रमाणं सङ्कोचनीया स्यात् । स्याच्च समुच्चयादि शब्दयोग इव चादियोगेऽपि घटादेः षष्ठी । किञ्च समुच्चयादिपदसत्तायां यथा विशेषणसम्बन्धः तथा चादियोगेऽपि स्यात् । द्योतकत्वपक्षे तु पृथक् पदार्थाभानात् न तत्र विशेषणान्वयः । अतः निपातानां द्योतकत्वमेव न वाचकत्वम् । यदि निपातानां वाचकत्वं स्वीक्रियेत तदा घटस्य समुच्चयः इत्यत्र समुच्चयपदयोगे षष्ठीवत् च शब्दयोगेऽपि षष्ठ्यां घटस्य च इति प्रयोगापत्तिः ।

अत एव आकृत्यधिकरणे भट्टपादैरुक्तम् –

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः क्रियते संशयोत्पत्तेः नोपसर्गनिपातयोः ।**

**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते यदर्थद्योतकौ तौ तु वाचकस्स विचार्यते ॥ इति**

यत्तु अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (सू. सं. १–२–४५) इति सूत्रे ‘अधातुः’ इत्यादौ उपसर्गविशिष्टस्यैव धातोः अर्थवत्वं प्रतिपादितम् । तेन उपसर्गस्य वाचकत्वं धातोः निरर्थकत्वञ्च लभ्यत इति चेत् तदभ्युच्चयवादेनोक्तमिति मन्तव्यम् । तत्र चिन्तामणिकारः निपाताः वाचकाः इति येषां मतं तदभिप्रायेण द्रष्टव्यमिति अभिप्रैति ।

पूर्वोत्तरमीमांसयोः तत्र नञः पर्युदासे लक्षणेति ग्रन्थाः अपि पूर्वोक्तरीत्या व्याख्येयाः । तत्र कौस्तुभकारः अस्तु वा मतान्तरं निपाताः वाचकाः सर्वथापि प्रादयो द्योतकाः चादयस्तु वाचकाः इत्येवं रूपमर्धजरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेवेति ।

अथशब्दः मङ्गलार्थः इति अभिप्रयन् चिन्तामणिकारः द्योतकत्वञ्च पदान्तरप्रत्यायितस्य अर्थस्य अभिव्यञ्जकत्वमधिकृत्य शब्दानुशासनम् इत्यादिवाचकशब्दवत् प्रयोक्तव्ये द्योतकः “अथ


ISSN : 2320-740X

शब्दस्योपादानमधिकारार्थस्यैव सतश्शब्दस्यैव श्रवणमात्रेण शास्त्रादौ मङ्गलार्थमपि यथा स्यादिति" । तदुक्तं सूत्रभाष्ये "अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति" । अथ शब्दस्य मङ्गलार्थत्वे –

**ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥**

इति स्मृतिः प्रमाणम् ।

शास्त्रादौ च मङ्गलम् अवश्यमनुष्ठेयम् । आह च भाष्यकारः पश्पशायाम् – मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत् पुरुषाणि चेति ।

सम्प्रति अनुशासनशब्दविचारोऽत्र प्रस्तूयते । तत्र कौस्तुभकारः अनुशिष्यन्ते विविच्य असाधुभ्यः विभज्य बोध्यन्ते येन इति करणल्युडन्तः । ततः शब्दानामिति कर्मणि षष्ठी तदन्तेन समासः ।

न च 'कर्मणि च' इति सूत्रेण समासनिषेधः शङ्क्यः । तत्र 'च' इति शब्दस्य इतिशब्दार्थकतया यत्र कर्मणि इति शब्दप्रयोगः तत्रैव 'कर्मणि च' इति षष्ठीसमासनिषेधः । अत्र तु षष्ठी 'कर्तृकर्मणोः कृति' (सू. सं. २–३–६५) इत्यनेन विहिता, न तु उभयप्राप्तौ कर्मणीति । आचार्यस्य कर्तुः सत्त्वेऽपि इहानुपादानात् ।

चित्रं गवां दोहोऽगोपेन इत्यत्र हि आश्चर्यं प्रतिपाद्यम् । तच्च यदि अशिक्षितः दोग्धा दुदोह गावश्च दोग्धव्याः तदैव निर्वहति न तु अन्यथा । अतः कर्तृकर्मणोर्विशिष्योपादानादस्ति उभयप्राप्तिः । इह तु शब्दानामिदमनुशासनम्, न तु अर्थानामिति अर्थनिवृत्तिपरं वाक्यं न तु कर्तृविशेषनिवृत्तिपरम् । अतो नास्ति उभयप्राप्तिः । अस्तु वा यथाकथञ्चित् उभयप्राप्तिः तथापि न क्षतिः । 'उभयप्राप्तौ कर्मणि' इति सूत्रेण विकल्पेन षष्ठी विधीयते । अतो नात्र तत्सूत्रेण । अतः 'कर्मणि च' इति निषेधः न भवति । अतः शब्दानुशासनमिति युज्यते । तत्र चिन्तामणिकारः अस्तु वा यथाकथञ्चित् उभयप्राप्तौ अपि नियमप्राप्तिप्रवृत्तिरिति अभ्युपगमः तथापीह न दोषः । भाष्ये हि उभयप्राप्तौ इति सूत्रे अकाकारयोः प्रतिषेधो नेति वक्तव्यमिति उक्तम् । तत्र प्रतिषेधफलकत्वात् प्रतिषेधशब्देन नियम उच्यते । तथा च अकाकारयोः स्त्रीप्रत्ययप्रयोगे नियमो न भवतीति तदर्थः । 'भेदिका बिभित्सा वा रुद्रस्य जगतः इत्युदाहरणम् । तदनन्तरं 'शेषे विभाषा' इति वचनमुक्तम् । तत्र केचित् अकाकारव्यतिरिक्तं स्त्रीप्रत्ययं शेषशब्दार्थमाहुः । तन्मते अकाकारव्यतिरिक्तस्त्रीप्रत्ययप्रयोगे नियमो वा स्यादिति तदर्थः । विचित्रा जगतः कृतिः हरेः हरिणा वा इत्युदाहरणम्।

अन्ये तु अकाकारव्यतिरिक्तप्रत्ययमात्रं शेषशब्दार्थमाहुः । तन्मते अकाकारव्यतिरिक्तप्रत्ययमात्रप्रयोगे नियमो वा स्यादिति तदर्थः । शब्दानाम् अनुशासनम् आचार्यस्य आचार्येण वा इत्युदाहरणम् । तत्र द्वितीयव्याख्याने शब्दानुशासनमित्यत्र पक्षे नियमाप्रवृत्तौ कृद्योगषष्ठ्या समाससिद्धिः शेषषष्ठ्या वा समासः । एवञ्च शब्दानुशासनमिति रूपं सर्वथा अनवद्यम् । इत्थं माङ्गलिकस्य अथ शब्दानुशासनमित्यस्य विवरणं कौस्तुभकारदृष्ट्या चिन्तामणिकारदृष्ट्या च निरूपितम् ।

सन्दर्भग्रन्थाः – 1.कैयटोद्योतसहितं पातञ्जलमहाभाष्यम् 2. न्यासपदमञ्जरीसहितकाशिका 3.सिद्धान्तकौमुदी 4.शब्दकौस्तुभः 5.शाब्दिकचिन्तामणिः


ISSN : 2320-740X

# न हि पदान्ताः परेऽणः सन्ति इति वाक्यतात्पर्यविमर्शः

**भारती. एस्**

शोधच्छात्रा

तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रे भाष्ये होतृकार इत्यादिरूपान्वाख्यानसन्दर्भे ऋकारलृकारयोः मिथः स्थानप्रयत्नवैभिन्न्यात् उपसंख्यायते सवर्णविधिः वार्तिककारेण । स चासौ सवर्णविधिः दीक्षितैः कौमुद्यामित्थमन्ववादि – “ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्” इति । तत्र ऋलृवर्णयोरिति पदविग्रहविषये सन्दृश्यते दीक्षितानां नागेशभट्टानां च मिथो विमतिः ।

दीक्षितास्तावन्मनोरमायां वार्तिकमदः समुल्लिख्य आ च आ च रलौ, तौ च तौ वर्णौ च ऋलृवर्णौ, तयोः ऋलृवर्णयोः इति विजगृहुः । परिनिष्ठितविभक्त्यन्तेन समास इति शास्त्रकृत्सम्मते पक्षान्तरे च उश्च उल्च ऋलोः, तयोश्च तयोः वर्णयोः ऋलृवर्णयोः इति विग्रहं ते दर्शयामासुः।

नागेशभट्टास्तावत् नायं विग्रहप्रकारः साधीयानिति मेनिरे । ते च ऋलृवर्णयोः इत्यत्र आ च लृवर्णश्च इत्येव व्यग्रहीषत। नान्यत् किमप्यवोचन् । तेषामिदमाकूतम् – “आ च आ च रलौ इति न विग्रहीतव्यम् । ‘न पदान्ताः परेऽणः सन्ति’ इति लण्सूत्रस्थभाष्यप्रामाण्येन लृशब्दात् सुपः अनभिधानात् । सत्यां च लृशब्दात् सुब्विभक्तौ षष्ठ्याम् ‘उल्’ इति रूपमापद्येत । पदान्ते च परोऽण् लकारः अवतिष्ठेत इति भाष्यविरोधापत्तिः । अतः आ च लृवर्णश्चेत्येव विग्रहीतव्यं, न तु आ च आ चेति” इति । अत एव दीक्षितोक्तविग्रहप्रकारः तैः उपेक्षितः ।

वस्तुतः विचार्यमाणे लृवर्णशब्दनिष्पत्तिरपि अन्तरा समासं न भवितुमीष्टे । सति च समासे वर्तितव्यमेव एकाधिकेन सुबन्तेन ‘सह सुपा’ इति सूत्रे सुबित्यनुवर्त्य सुबन्तानामेव समास इति राद्धान्तात् । आ चासौ वर्णश्चेति विग्रहीतव्यमेव अमनस्कैरपि तत्रभवद्भिः ।

किञ्च लृशब्दात् सुब्विभक्तेरभावे “लृतुलसानां दन्ताः”, “दन्त्याः लृतुलसाः स्मृताः” इत्यादिशिक्षावचने द्वन्द्वानुपपत्तिः । द्वन्द्वस्य च सुबुत्पत्तौ सत्यामेव वचनार्हत्वात् । अतः द्वन्द्वस्योपपत्तये लृशब्दात् सुबुत्पत्तिः भवत्येवेति आस्थेयम्।

***दीक्षिताशयः*** *– न पदान्ताः परेऽणः सन्ति इति भाष्यस्य पदान्ताः परेऽणः अनुनासिककार्यभाजः न भवन्ति इति ।*

***नागेशाशयः*** *– न पदान्ताः परेऽणः सन्ति इत्यस्य पदान्ते हलणः सर्वथा न सन्ति, यदि स्युस्तर्हि तदन्तानां शब्दानामनभिधानमेव कल्पनीयमिति ।*

वस्तुतः लण्सूत्रस्थभाष्यसन्दर्भः इत्थम् – अणोऽप्रगृह्यस्यानुनासिकः इति सूत्रस्थाण्पदे पूर्वणकारेण प्रत्याहारः, उत परेण इति संशये समापन्ने समाहितम् – “असन्दिग्धं पूर्वेण, न परेण । कुत एतत् ? पराभावात् । न हि पदान्ताः परेऽणः सन्ति। ननु चायमस्ति – कर्तृ, हर्तृ । एवं तर्हि सामर्थ्यात् पूर्वेण, न परेण । यदि हि परेण


ISSN : 2320-740X

स्यात्, अण्ग्रहणमनर्थकं स्यात् । 'अचोऽप्रगृह्यस्यानुनासिकः' इत्येव ब्रूयात् । अथवा एतदपि न ब्रूयात् । अच एव हि प्रगृह्या भवन्ति" इति ।

अत्र अवधेया अंशाः –

- लण्सूत्रे भाष्ये तावत् न पदान्ताः **परेऽणः** सन्ति इत्येव पठ्यते, न तु हलोऽणः इति । अतः तत्र तत्र (वृक्षव् करोतीत्यादेरनभिधानप्रतिपादनपरनागेशग्रन्थे) 'न पदान्ताः हलोऽणः सन्तीति लण्सूत्रभाष्यविरोधात्' इत्युक्तिः स्वरूपतो विरुध्यते । तया आनुपूर्व्या भाष्यपाठानुपलम्भात् । उपलम्भेऽपि स असमञ्जस एव । अप्रगृह्यस्येति पर्युदासाश्रयणेन अचामेव अनुनासिककार्यभाक्त्वात् इतरे कार्यभाजो न सन्तीत्येवंपरतया एव कैयटेन विवरणात्[1] 'अच एव हि प्रगृह्या भवन्ति' इत्युपसंहारभाष्यानुरोधेन तादृशेऽर्थे एव भाष्यकृतः तात्पर्योपवर्णनस्योचिततरत्वाच्च, ननु चायमस्ति कर्तृ हर्तृ इति उतरग्रन्थेनास्य दूषितत्वाच्च । अतः न पदान्ताः हलोऽणः सन्तीति यदि पठ्येत, तर्हि उत्तरभाष्यस्योक्तिसम्भव एव न स्यात् । एवं च **"न पदान्ता हलोऽणः सन्तीति लण्सूत्रस्थभाष्यात्"** इति पाठोऽसङ्गत एव ।
- अथ 'ननु चायमस्ति कर्तृ, हर्तृ' इत्युत्तरभाष्यग्रन्थसन्दर्भेण सम्बुद्धौ एकारादेः परस्याणः अवश्यम्भावात् (हरे विष्णो इत्यादौ) च परेऽणः इत्येतत् हलोऽण इति सङ्कुच्यते । सङ्कोचश्चायम् उत्तरभाष्यग्रन्थानुसारेणैव, न तु निर्मूलः । एवं च पूर्वोत्तरभाष्यसन्दर्भादुपलब्धः मथितार्थ एवायं "न पदान्ताः हलोऽणः सन्तीति" इति न काचिदनुपपत्तिः नागेशोदाहृते पाठे इति यद्युच्यते तत्रेदं पृच्छ्यते –

किं पदान्ते हलणः सत्तैव निषिध्यते (परिनिष्ठिते रूपे हलः अणः पदान्ते न स्युरेवेति) उताहो पदचरमावयभूतहलणः शास्त्रीयकार्यभाक्त्वं निषिध्यते? नाद्यः, पदान्ताः हलोऽणः **न सन्ति** इति पदान्ते हलणां सत्तायाः सर्वतो निषेधे किँय् ह्यः, किँव् ह्वलयति, किँल् ह्लादयति इत्यादीनां शास्त्रेण व्युत्पादितानामप्यसाधुताप्रसङ्गात् । यणः प्रतिषेधो वाच्यः इत्यादिनिषेधसामर्थ्यात् पदान्ते यणः सत्तायाः सर्वथा अपलपितुमशक्यत्वाच्च । नापि द्वितीयः, हकारस्यापि हलण्त्वेन लिह्, दुह् इत्यादौ पदान्तनिमित्तकढत्वविधानस्य (हो ढः इत्यादिसूत्रेण) अनुपपत्तेः । प्रातरित्यादिरेफान्ताव्ययस्य विसर्गानापत्तेश्च, र्वोरुपधाया दीर्घ इक इत्यादेः रेफांशे (गीः इत्यादौ) अप्रवृत्त्यापत्तेः ।

---

[1] **न हि पदान्ताः परेऽणः सन्तीति ।** ननु भोभगो इत्यत्र अश्ग्रहणस्य प्रयोजनं वक्ष्यते – वृक्षव् करोतीत्यत्र 'हलि सर्वेषाम्' इति लोपो मा भूदिति, तत्कथमुच्यते – 'नहि पदान्ताः परेऽणः ' इति । उच्यते – '**अप्रगृह्यस्य**' इति पर्युदासेन अच एव अनुनासिकेन भाव्यं, न तु हल इत्युक्तं – **न हि पदान्ता इति ।** कार्यभाज इत्यर्थः ।

उद्योते च – भाष्येऽपि सत्त्वं न निषिद्ध्यते, किन्तु कार्यित्वमेवेत्याह – **कार्यभाज इति ।** एवं च न अनुनासिकप्राप्तियोग्याः पदान्ताः न सन्तीत्यर्थः ।


ISSN : 2320-740X

यद्येतेषु स्थलेषु तत्तत्सूत्रारम्भसामर्थ्यमाश्रित्य नियमे तद्व्यतिरिक्तत्वं कल्प्यते तर्हि महद्गौरवम्। तदपेक्षया (अनभिधानं प्रकल्प्य तत्र सङ्कोचकरणापेक्षया) न पदान्ता हलोऽणः सन्तीत्यस्य प्रकरणबलात् पदान्ताः हलः अणः अनुनासिककार्यभाजो न भवन्तीत्यर्थपरतया व्याख्यानमेव समञ्जसं प्रतिभाति ।

- यदप्युच्यते नागेशभट्टैः लोपः शाकल्यस्येतिसूत्रे अश्ग्रहणप्रयोजनविचारसन्दर्भे –

**"परे तु 'न पदान्ता हलोऽणः सन्ति' इति लण्सूत्रस्थभाष्याद् वृक्षवादेरनभिधानमेव । भोभगोअघो इति सूत्रेऽश्ग्रहणमनर्थकमन्यत्राभावादिति वार्तिकाच्च । अशोऽन्यत्र तन्निमित्तकार्यकार्यिणोऽभावादिति तदर्थः। न ह्यन्यत्र रुरस्तीति तद्व्याख्यानभाष्ये रुग्रहणमुपलक्षणम् । एतदाशयमजानानेनैकदेशिना 'उत्तरार्थं हलि सर्वेषामिति वृक्षव् करोतीत्यत्र मा भूत्' इत्युक्तम् । अस्य चैकदेश्युक्तित्वं लण्सूत्रस्थोक्तभाष्यविरोधेन स्पष्टमेव कैयटेनोक्तम् । अत एव भाष्ये उत्तरार्थमित्युक्त्वा हलि सर्वेषामित्यत्रैव प्रयोजनमुक्तम् । हलि सर्वेषामित्यत्र वकारनिवृत्त्यैवात्र तद्वारणसम्भवान्न तत्राप्यश्ग्रहणस्य प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरेवेत्याहुः"**

इति । अत्रेदं विचार्यते – किं लण्सूत्रस्थभाष्यानुरोधेन (तद्भाष्यस्य पदान्ताः परेऽणो न सन्तीति नागेशोक्तरीत्या व्याख्यानेन) भोभगो इति सूत्रस्थभाष्यस्य एकदेश्युक्तित्वम् उत भोभगो इति सूत्रे वृक्षव् करोतीत्युदाहरणदानात् लण्सूत्रस्थभाष्यस्य निरुक्तार्थपरत्वम् (परेऽणः अनुनासिककार्यभाजो न भवन्तीत्येतावन्मात्रार्थतात्पर्यकत्वम्) ? इत्यत्र किं विनिगमकम् ? इति ।

नागेशेन वृक्षव्करोतीत्यश्ग्रहणप्रत्युदाहरणप्रतिपादनपरभाष्यस्य एकदेश्युक्तित्वे उपाश्रिताः युक्तयः –

- न पदान्ता हलोऽणः सन्ति इति लण्सूत्रभाष्यविरोधः ।
- भोभगो इति सूत्रे अश्ग्रहणमनर्थकम् अन्यत्राभावात् इति वार्तिकम् ।
- लण्सूत्रस्थोक्तभाष्यविरोध इति प्रतिपादयन् कैयटग्रन्थः (भोभगोसूत्रस्थः) ।
- हलि सर्वेषामित्यत्रैव अश्ग्रहणप्रयोजनवचनम्, यच्च वकारनिवृत्त्यैवान्यथा सिद्धम् ।

तत्रादौ न पदान्ता हलोऽणः इति लण्सूत्रभाष्यस्य वृक्षव् करोतीत्यादिभोभगोसूत्रस्थभाष्येण सह विरोधः तदैव आपतति यदा लण्सूत्रभाष्यस्य पदचरमावयवरूपहलण्कर्तृकसत्तात्यन्ताभावः इत्येवार्थः (न तु हलणः अनुनासिककार्यभाजो नेति) निश्चीयते, यश्चेदानीमपि न निश्चितः, अस्य भाष्यस्यायमेवार्थः न तु अर्थान्तरम् (अनुनासिककार्यभाजो न) इत्यत्र मानाभावात् । पूर्वोक्तरीत्या व्याख्याने क्रियमाणे विरोधाभावाच्च । वृक्षव् इत्याद्युदाहरणदानात् एव लण्सूत्रभाष्यस्य द्वितीय एव अर्थः न तु प्रथमः इति युक्तेरपि वक्तुं शक्यत्वाच्च ।


ISSN : 2320-740X

अथ भोभगो इति सूत्रे 'अश्ग्रहणमनर्थकम् अन्यत्राभावात्' इति वार्तिकं, न ह्यन्यत्र रुरस्ति इति तद्व्याख्यानभाष्यं च द्रढयति वृक्षवादेरनभिधानमिति चेत् वस्तुतः तद् भोभगोसूत्रविषये प्रवृत्तम्, अशः अन्यत्र तन्निमित्तं यत् कार्यं यत्वरूपं तत्कार्यिणः रोः अभावात् इत्यर्थतात्पर्यकम् आक्षेपभाष्यम् । न तु हलि सर्वेषाम् इति सूत्रविषयकं तत् । रुग्रहणमुपलक्षणमिति कथने मानाभावात् । लण्सूत्रभाष्यं तु नैव मानं भवितुमीष्टे, तस्य तादृशार्थकत्वे एव विप्रतिपत्तेः । व्याख्यानान्तराश्रयणे उपलक्षणताया एव निर्मूलत्वात् ।

ननु लण्सूत्रभाष्येण सह विरोधादियमेकदेश्युक्तिः इति कैयटोऽप्याह, अतः तद्वचनादेव इयमेकदेश्युक्तिः इति कथनं तु न स्वरसतामावहति । दृढतरयुक्तिसहकृतस्य भाष्यानुगृहीतस्यैव च कैयटग्रन्थस्य दीक्षितैः तत्रभवद्भिः नागेशभट्टैश्च प्रमाणत्वेनेतरत्र अभ्युपगमात् । न पदान्ताः परेऽणः सन्तीत्यत्र वृक्षवाद्युदाहरणविरोधोद्भावनपुरःसरं कोऽभिप्रायः इति स्वयं कैयटोपाध्यायैरेव लण्सूत्रे भाष्ये **'न हि पदान्ताः इति । कार्यभाज इत्यर्थः'** इति विशदीकरणाच्च ।

यदप्युक्तं उत्तरार्थमित्युक्त्वा हलि सर्वेषामित्यत्रैव प्रयोजनमुक्तं, तच्च तत्र वकारनिवृत्त्यैवान्यथा सिद्धमिति, तत्रेदं पृच्छ्यते – व्योर्लघुप्रयत्नतरः शाकटायनस्येति सूत्रात् हलि सर्वेषामित्यत्र अविशेषेणानुवर्तमानं यत् व्योरिति समस्तं पदं तत्र वकारमात्रनिवृत्तौ किं प्रमाणम्? न च ओतो गार्ग्यस्येत्यत्र निवर्तनीय एव वकारः, तद्वदत्रापि निवर्त्यते इति वाच्यम् । दृष्टान्तस्य विषमत्वात् । तत्र ओद्ग्रहणात् ओकारात्परस्य वकारस्यासम्भवादेव निवर्तते वकारः । अत्र तु परं (हलि सर्वेषाम् इत्यत्र) वृक्षव् करोतीत्यादिप्रत्युदाहरणप्रदर्शनपरभाष्यप्रामाण्यात् अनुवर्तत एव वकारो निर्विशयम् । लोपस्तु न प्रवर्तते अशि इत्यनुवर्त्य अशात्मके हलि परे एव लोपविधानात्, ककारस्य च अतथात्वात्। अत एव भाष्यप्रामाण्यात् वृक्षव् हसतीत्यादेरनभिधानम् । अन्यथा प्रकृतव्याख्यानानुरोधेन अत्र लोपप्रवृत्तेः दुर्वारतया भाष्यकारस्य तद्विषयकाक्षेपसमाधानाकरणरूपनैयून्यापत्तेः । अतो वृक्षव् हसतीत्यादेरनभिधानम् । वृक्षव् करोतीत्यस्य अनभिधानं तु दुर्वचम् । मानाभावात् । लण्सूत्रभाष्यं तु न मानम्, पूर्वोक्तयुक्तेः। भाष्यकारैः कण्ठरवेण असकृत् तस्य प्रत्युदाहरणत्वेनोदाहृतत्वाच्च । न हि अनभिधानविषयस्य कस्यचित् शब्दस्य असकृत्[1] प्रयुक्तिरुचिता साक्षात्कृताशेषशब्दानां भाष्यकाराणाम् ।

इत्थं च शिष्टजनप्रयुक्तानां वृक्षवादिहलणन्तशब्दानाम् अनभिधानकल्पनं दृढतरभाष्यप्रमाणविरहात् युक्त्यभावाच्च अन्याय्यम् इति प्रतिभाति । अतश्च ॠलृवर्णयोः इत्यादावपि दीक्षितैरादृता विग्रहरीतिः निर्दुष्टैव । एवमेव लिहादिवत् कमल् इत्यादयोऽपि हलणन्ताः शब्दाः कौमुद्यादावुपनिबद्धाः साधुत्वबाधकयुक्त्यनुपलब्धेः न दुष्यन्तीति भाति ।

***

[1] विभाषा भवद्भगवदघवतामोच्चावस्य इति वार्तिकव्याख्यानभाष्ये अपि वृक्षवयतेरप्रत्ययः वृक्षव् करोतीति दर्शनात् ।


ISSN : 2320-740X

# धात्वर्थविचारः

**राघवेन्द्र पी आरोल्ली**

शोधच्छात्रः

इह किल जगतीतले शब्दैरेव सर्वेऽपि व्यवहरन्ति, शब्दैरेव स्वविचारानुपस्थापयन्ति जीविनः । अत एव शब्दः प्रमाणत्वेनाङ्गीकृतः दार्शनिकैः । तत्र नैयायिकाः शब्दस्य पृथक्प्रमाणत्वं उररीकृत्य शाब्दबोधविचारमपि युक्तियुक्ततया निरूपयन्ति । सर्वेषामपि शब्दानां मूलं भवति धातुः । तस्यार्थनिर्णये तत्र तत्र विदुषां मतभेदो दरीदृश्यते। न्यायदर्शनेऽपि प्राचीनाः व्यापारमात्रं धात्वर्थः इति वदन्ति । नव्याः फलावच्छिन्नव्यापारो धात्वर्थ इति कथयन्ति । अन्ये केचन फलं व्यापारश्च धात्वर्थ इति प्रतिपादयन्ति । तदत्र किञ्चिद्विव्रियते ।

**प्राचीनन्यायमतम्**

व्यापारस्य धात्वर्थत्वात् क्रियाजन्यफलशालित्वस्य कर्मत्वस्य[1] द्वितीयार्थत्वं न सम्भवति । तत्र क्रियायाः धातुत एव लाभात् । जन्यजनकभावस्य संसर्गमर्यादया भानसंभवात् फलमात्रं कर्मप्रत्यायार्थः । फलत्वं च धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थजन्यत्वम् । 'मन्दं गच्छति', 'द्रुतं गच्छति' इत्यादौ धात्वर्थव्यापारे तादात्म्येन मन्दादेरन्वयात् मन्दादावतिप्रसङ्गवारणाय विशेष्यदळम् । गम्यादिधात्वर्थसंयोगानुकूलव्यापारजन्यत्वस्य पूर्वदेशविभागादौ सत्त्वात् तत्रातिव्याप्तिवारणाय सत्यन्तदळम् ।

न च संयोगविभागरूपफलमपि धातुलभ्यमेव । गमित्यजिप्रभृतीनां संयोगविभागादिफलावच्छिन्नव्यापारवाचकत्वादिति वाच्यम् । व्यापारमात्रस्य धात्वर्थत्वात् । न च व्यापारमात्रस्य धात्वेर्थत्वे 'ग्रामं गच्छति', 'ग्रामं त्यजति' इत्यादिवाक्यजन्यप्रतीतीनां वैलक्षण्यं न स्यादिति वाच्यम् । फलविशेषान्वयबोधे धातुविशेषजन्यव्यापारोपस्थितेः हेतुतया 'ग्रामं त्यजति' इत्यादौ धात्वर्थव्यापारे ग्रामनिष्ठविभागजनकत्वमेव प्रतीयते । 'ग्रामं गच्छति' इत्यादौ तु धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयत इति स्वीकारेण प्रतीतिवैलक्षण्यमुपपद्यते । 'ग्रामं गच्छति' इत्यादिवत् 'ग्रामं स्पन्दते' इत्यादयो न प्रयोगाः । द्वितीयादेः गम्याद्युपस्थापितस्पन्दादावेव फलान्वयबोधकत्वात् , स्पन्दिप्रभृत्युपस्थापिते तस्मिन् द्वितीयादिना फलान्वयबोधजननासम्भवात् । न हि येन केनचित् पदेनोपस्थापितयोरपि घटकर्मत्वाद्योः परस्परमन्वयबोधः सम्भवति । कृञ्समानार्थकयतिधातूपस्थापितयत्ने द्वितीयार्थविषयितात्मककर्मत्वान्वयसम्भवेन 'घटं करोति' इतिवत् 'घटं यतते' इति प्रयोगप्रसङ्गात् । अपि तु ययोर्यादृशान्वयबोधे आकाङ्क्षा तदुपस्थापितयोरेव तादृशान्वयबोधः । आकाङ्क्षात्र द्वितीयादेः गम्यादिनाकृञादिना च कल्प्यते, न तु तत्समानार्थकेनापि स्पन्दियतिप्रभृतिना इति ।

[1] कर्तुरीप्सिततमं कर्म इत्यनुशासनेन अयमर्थः लभ्यते ।



ISSN : 2320-740X

न चाकाङ्क्षात्र समभिव्याहारः । स च गम्यादिनेव स्पन्द्यादिनापि समान एवेति वाच्यम् । यतो द्वितीयादेः गम्यादिसमभिव्याहारस्यैव फलबलात् अन्वयबोधौपयिकत्वमुपगम्यते, न तु स्पन्दिप्रभृतिसमभिव्याहारस्येति न तस्याकाङ्क्षात्वम्। अन्वयबोधौपयिकस्यैवाकाङ्क्षात्वात् । अत एव समानार्थकत्वेऽपि गम्यादेरिव न स्पन्द्यादेः सकर्मकत्वव्यवहारः। सकर्मकत्वञ्च फलान्वितव्यापारबोधकधातुत्वम् । स्पन्द्यादौ फलान्वितव्यापारबोधकत्वविरहादेव तेष्वकर्मकत्वव्यवहारः ।

न च 'घटं जानाति' इत्यादौ ज्ञानाद्यर्थकधातूनां सकर्मकत्वं न स्यात्[1] । विषयित्वादेस्तु अखण्डोपाधित्वात् जन्यत्वस्यैवाभावात् फलत्वं न सम्भवति । न चेष्टापत्तिः तथासति घटमिति द्वितीयान्तप्रयोगो अनुपपन्नः स्यादिति वाच्यम् । धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति व्यापारत्वभिन्नत्वं फलत्वम् । तच्च फलत्वं विषयित्वादौ सम्भवति, तस्य धात्वर्थज्ञानभिन्नत्वात् तत्र विशेषणतया भासमानत्वाच्च ।

अथ फलविशेषबोधे धातुविशेषजन्योपस्थितेः कारणत्वं परिकल्प्य व्यापारमात्रस्य धात्वर्थत्वसमर्थनेऽपि 'ग्रामं गच्छति', 'ग्रामं त्यजति' इत्यादितः प्रतीतिवैलक्षण्योपपादनेऽपि 'गच्छति त्यजति', 'त्यागो गमनम्' इत्यादिकमेव वाक्यं यत्र प्रयुक्तं न तु द्वितीयान्तादिकमपि, तत्र तेभ्यो वाक्येभ्यः सर्वानुभवसिद्धं प्रतीतिवैलक्षण्यं नोपपद्यते । न हि शक्तिभ्रमाद्यजन्ययोः तादृशवाक्यजन्यबोधयोः अवैलक्षण्यं कश्चिदभ्युपैति । अविलक्षणबोधोपगमे सति त्यागादितात्पर्येण गमनादिपदं व्युत्पन्ना अपि प्रयुञ्जीरन् । न च तत्र फलविशेषावच्छिन्नव्यापारे लक्षणास्वीकारात् विलक्षणबोधोपपत्तिरिति वाच्यम् । लक्षणया विलक्षणबोधजननेऽपि शक्त्या अविलक्षणबोधसम्भवेन दर्शितातिप्रसङ्गस्य दुर्वारत्वात् । न च व्यापारमात्रस्य धात्वर्थत्वेऽपि केवलव्यापारबोधस्याकिञ्चित्करतया फलविशिष्टव्यापारविषयक एव बोधः तत्र अङ्गीक्रियते । तथा च व्यापारमात्रं धात्वर्थः ।

**अत्र गङ्गेशोपाध्यायः**

तत्त्वचिन्तामणौ मण्डनमतं[2]निराकृत्य धात्वर्थः निरूपितः वर्तते । तथा हि 'ओदनकामः पचेत' इत्यत्र विधिप्रत्ययेन लिङा धात्वर्थे प्रवृत्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वं च बोध्यते । न च फले विक्लित्यादौ ओदनसाधनत्वं, न वा फले प्रवृत्तिः सम्भवति । उपायमकृत्वा फलस्य साक्षात् कृत्या साधयितुमशक्यत्वात् । उपायविषयककृतित एव फलसिद्धेः । अधस्सन्तापनादेः व्यापारस्य कृतिसाध्यत्वमिष्टसाधनत्वञ्च विना विक्लित्तिरूपफलार्थमप्रवृत्तेश्च । अतः फलानुकूलव्यापार एव धात्वर्थः ।

**अत्र शिरोमणेराशयः**

धातोः फलमात्रवाचकत्वे आख्यातस्य व्यापारत्वावच्छिन्नवाचकत्वे च पचतीत्यादौ यत्नत्वेन रूपेण पाकानुकूलयत्नाननुभवप्रसङ्गः । एवं पाकानुकूलादृष्टवत्यपि पचतीति प्रयोगप्रसङ्गः । एवं

[1] ज्ञानादिजन्यसंस्कारादेः द्वितीयार्थत्वाभावात् ।

[2] फलमात्रं धात्वर्थः इति मण्डनमतम् ।


ISSN : 2320-740X

विभागानुकूलपूर्वदेशसंयोगवति निश्चले विहगे त्यजतीतिप्रयोगप्रसङ्गः । 'नासंयुक्तस्य विभाग' इतियुक्तेः संयोगस्य विभागानुकूलत्वात्[1] । फलावच्छिन्नस्य धात्वर्थत्वे तु विभागानुकूलस्पन्दस्यैव त्यजधात्वर्थतया तदाश्रयत्वस्य आख्यातार्थस्य तत्राभावान्न प्रसङ्ग इति ।

**अत्र नव्यन्यायमतम्**

संयोगादिरूपफलविशेषावच्छिन्नव्यापारो गम्यादिधात्वर्थः । तद्धात्वर्थानधिकरणत्वे सति तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वम् । चैत्रो गच्छति इत्यादौ गम्धात्वर्थतावच्छेदकसंयोगवतः चैत्रस्य गमनकर्मत्वं स्यात् । तादृशसंयोगस्य चैत्रेऽपि सत्वात् अतः सत्यन्तदळम् । उदासीनघटपटादावतिव्याप्तिवारणाय विशेष्यदळम्। अत्र फलपदं क्रियाजन्यलरूपम् । तेन धात्वर्थतावच्छेदकीभूतं व्यापारत्वमादाय न व्यापारस्य कर्मत्वापत्तिः । फलावच्छिन्नव्यापारवाचकत्वं सकर्मकत्वम् इति ।

**अत्रेदं चिन्त्यते**

धातोः व्यापारमात्रार्थकत्वे 'ग्रामं गच्छति' इत्यादौ द्वितीयार्थस्य संयोगरूपफलस्य धात्वर्थव्यापारे जनकत्वसम्बन्धेनान्वयो वक्तव्यः । जनकत्वस्य वृत्यनियामकत्वात् 'ग्रामं न गच्छति' इत्यादौ शाब्दबोधो न स्यात्[2]। एवं 'त्यजति गच्छति' इत्यादौ केवलतिङन्तप्रयोगस्य प्रामाणिकत्ववारणाय फलमपि धात्वर्थः इति अवश्यमभ्युपगन्तव्यम् । अतः न व्यापारमात्रं धात्वर्थः ।

फलावच्छिन्नव्यापारस्य धात्वर्थत्वे 'चैत्रः ग्रामं गच्छति' इत्यत्र ग्रामवृत्तिसंयोगावच्छिन्नव्यापारानुकूलकृतिमांश्चैत्रः इति बोधः सम्भवति । तथा कर्मणि स्थले 'चैत्रेण ग्रामः गम्यते' इत्यत्र चैत्रकर्तृकः यः संयोगावच्छिन्नव्यापारः तज्जन्यसंयोगाश्रयः ग्रामः इति बोधो वर्णनीयः । तदा संयोगस्य द्विधाभानमङ्गीकरणीयमिति गौरवम् । एवं द्विधा अनुभूतस्य संयोगस्य द्विःशब्दादुपस्थितिरपि कल्पनीया इति गौरवम्। अनन्यलभ्यः शब्दार्थ इति न्यायविरोधाच्च । तदपेक्षया धातोः फले व्यापारे च खण्डशक्तिस्वीकरणमेव वरम् । तदा कर्मणि स्थले चैत्रकर्तृकव्यापारजन्यसंयोगाश्रयः ग्रामः इत्येव बोधो भवति । अत्र कस्यापि द्विधाभानं न सम्भवति इति लाघवम् । एवं च फलं व्यापारश्च धात्वर्थः । अकर्मकधातुस्थले तावत् व्यापारमात्रं धात्वर्थः । तत्र फलस्यैवाभानादिति ।

आकरग्रन्थाः

१. मुक्तावलीः
२. दिनकरी
३. तत्त्वचिन्तामणिः
४. दीधितिः
५. व्युत्पत्तिवादः

***

[1] अत्रानुकूलत्वं विभागप्रयोजकत्वमेव ।

[2] वृत्यनियामकसम्बन्धस्य अभावप्रतियोगितानवच्छेदकत्वात् ।


ISSN : 2320-740X

# रामपाणिवादविरचितं "मदनकेतुचरितं" प्रहसनम्

दीपा हेगडे

शोधच्छात्रा

दृश्य–श्रव्यकाव्ययोः श्रव्यकाव्यापेक्षया स्ववैशिष्ठ्येन न केवलं भिद्यते अपि तु रमणीयतामप्यधिकतयाऽवहति दृश्यकाव्यम्। आङ्गिकादिचतुर्विधैरभिनयैः रमणीये दृश्यकाव्यप्रपञ्चे दर्शनयोग्यानि रूपकाण्युपरूपकाणि चान्तर्भवन्ति। तेषां कर्तारः भासः, कालिदासः, भारविः, माघः, भवभूतिः, विशाखदत्तः–इत्यादयः प्रथिता वर्तन्ते । तत्र नाटकस्य अनुत्तमत्वात् तल्लक्षणमेव सामान्यतः सर्वेषामपि रूपकाणामुपरूपकाणाञ्च भवतीति विश्वनाथोक्तदिशा[1] च सर्वेषामपि रूपकाणां कृते नाटकमित्येव व्यवहारः लोके प्रचलति । तथापि अल्पोऽपि व्यत्यासः परिगणनीय इत्यनया दृष्ट्या प्रकरणादिनाम्ना व्यवहारः क्रियते । संस्कृत–प्राकृतादिभाषासु नाटकं विहाय वीथीप्रहसनादीनां रूपकप्रकाराणामपि रचना दृष्टुं शक्यते । तत्र हास्यरसप्राधान्येन विरच्यमानं रूपकं प्रहसनमित्युच्यते । दशरूपकेष्वन्यतममिदम्–

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यःप्रहसनमिति रूपकाणि दश** [2]॥ इति

भास–कालिदासादयः रूपकनिर्माणेष्वप्रतिमाः विश्वप्रसिद्धानि शाकुन्तल–स्वप्नवासवदत्तादीनि विरचय्य यथा सहृदयानां मनसि विराजन्तेऽद्यापि, तथैव तादृशदृश्यकाव्यरचयितारः सन्ति प्रभूता आधुनिकाः कवयः । तत्र केरलदेशीयेन श्रीमता रामपाणिवादेन स्वस्याप्रतिहतप्रतिभया रूपकाणि ग्रथितानि । यथा 'सीतराघवम्' इति नाटकम्, 'चन्द्रिका–लीलवत्या'ख्यं वीथीद्वयम्, 'मदनकेतुचरितम्' इत्यभिधेयं प्रहसनं च विशिष्यते। प्रहसनस्य लक्षणं तावदेवमुच्यते –

**भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम् । भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम् ॥**

**अत्र नारभटी, नापि विष्कम्भकप्रवेशकौ । अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा** [3]।।

यथा भाणाख्यरूपके मुख–निर्वहणसन्धी, सन्ध्यङ्गानि, दशलास्यानि, एकोऽङ्कः तथैव प्रहसनेऽस्मिन् मुखनिर्वहणाभ्यां सन्धिभ्यां यथासम्भवं सन्ध्यङ्गैर्लास्याङ्गैः एकाङ्केन च विनिर्मितम् । वृत्तं कविकल्पितं, न तु नाटकवत् पुराणेतिहासप्रसिद्धम् । प्रकृष्टं हसत्यनेनेति प्रहसनम् । अपि च आरभटीवृत्तिरहितः, विष्कम्भक–प्रवेशकैर्निषेधितः, हास्याङ्गी, न तु अनिवार्यरूपेण, इच्छायां सत्यां वीथ्यङ्गानां योजनं यत्र विद्यते तत्प्रहसनमिति विदितम्। प्रकारेऽस्मिन् तपस्विनः, कृच्छान्द्रायणसन्तापनादिवृतानुष्ठानविधायिनः, ब्राह्मणप्रभृतिषु एकः नायकः भवेत् । प्रहसनेऽस्मिन् शुद्ध–सङ्कीर्ण–विकृतमिति भेदत्रयमुच्यते । धृष्टनायको भूत्वा हास्यविषयीभूतप्रहसनं

---

[1] विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ( साहित्यदर्पणम् )

[2] सा.द. ( ६। ३ )

[3] सा.द. ( ६। २ ६४–२६५ )


ISSN : 2320-740X

शुद्धमुच्यते। यदि धृष्टनायकं विना अन्यः नायकः वर्तते चेत् तद् सङ्कीर्णप्रहसनमित्युच्यते । सङ्कीर्णस्य लक्षणमुच्यते भरतमुनिना –

**वेश्याचेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः । अविकृतवेषपरिच्छदचेष्टितकरणं तु सङ्कीर्णम् ॥**[1] इति ।

यत्र क्लीबकञ्चुकीतापसविटनटभटराजभृत्यादयो वेषभाषाभिर्युताः सन्तोऽभिनयन्ति विकृतरूपप्रयुक्ताभिनयात्मकत्वाद्विकृतं नाम प्रहसनस्य तृतीयभेद उच्यते ।

रामपाणिवादविरचितस्य "मदनकेतुचरित"मित्यस्य प्रहसनस्य कथावस्तु एवं वर्तते – मदनकेतुर्नाम सिंहलदेशाधिपतिः कलिङ्गदेशं पराजित्य तत्र स्वभ्रातरं राज्यपरिपालनार्थं नियोजितवान् । सिंहलदेशे विष्णुमित्रनामकः भिक्षुः स्वधर्मनियमान् उपेक्ष्य, सर्वदा मनसि अनङ्गलेखाख्यगणिकायाः चिन्तन एव कालयापनं कुर्वन्नासीत् । भिक्षोरीदृशाधर्माचरणं ज्ञात्वा तत्र धर्मपरिपालनार्थं, भिक्षोर्मनसि विरक्तिमुत्पादयितुं चाद्भुतशक्तिसम्पन्नं कापालिकं शिवदासं प्रेषयति । मदनवर्मणा प्रेषितः शिवदासः मदनकेतुं राजसभायां मिलति । तदानीं राजा मदनकेतुः तस्य मनसि विद्यमानं द्रविडदेशस्थगणिका(चन्द्रलेखा)विषयकं अनुरागं निवेद्य साहाय्यं याचते । समयेऽस्मिन् कुट्टिनी (अनङ्गलेखायाः माता) भिक्षुं गृहीत्वा "मम पुत्रीम् अनङ्गलेखां पीडितवानि"ति आरोपयति । राजा भिक्षोस्समीपे जनान्तिके समालोच्य, एतत्सर्वं शृङ्गारमञ्जर्याः विनोदनमिति मत्वा कुट्टिनीम् गृहं प्रेषयति । अपि च भिक्षोर्मनसि विद्यमानम् अनङ्गलेखागत– अनुरागविषयमपि ज्ञास्यति ।

शिवदासस्य यौगिकशक्तिद्वारा चन्द्रलेखा तत्रैव आविर्भवति । प्रथमं शृङ्गारमञ्जरी चन्द्रलेखां विरुणद्धि, अनन्तरञ्च शिवदासोपदेशेन तां स्वीकरोति । घटितसर्वचमत्कारान् दृष्ट्वा भिक्षुः स्वापेक्षां निवेदयति । शिवदासेन अनङ्गलेखामाहूय भिक्षोरिच्छा उच्यते । तया भिक्षोरिच्छा विरुद्ध्यते । अपि च शिवदासोपदेशानुसारं भिक्षोर्मनसि कोपोत्पादनं कारयति । परस्परविवादात्परं शिवदासेन तत्परिहृत्य अनङ्गलेखा निर्गच्छति । सर्पेण अनङ्गलेखा दंशिता इति नेपथ्ये कश्चन विलपति । तदानीं शिवदासेन ततः निष्कृत्य अनङ्गलेखायाः शरीरे प्रविश्य स्वकलेवरं गोपयित्वा तस्या आत्मानं कस्यचित् पशुशरीरे संस्थाप्य भिक्षोर्मनश्चापल्यमपनेतुं मदनकेतोस्समीपे गम्यते । तत्र स्त्रीसहजगुणविरुद्धतया लज्जाविहीनतया संभाषणं कृत्वा भिक्षोर्मनसि संसारविरक्तिं उत्पाद्य स्वकार्यसाधनं करोति ।

ततः गोपितशिवदासकलेवरमुद्वहन् जम्भकः प्रविशति । सर्वे शिवदासकृतकार्याणि संस्मृत्य विलपन्ति । समयेऽस्मिन् शिवदासः स्वशरीरं प्रविश्य जीवति । अपि च तेन स्वयौगिकशक्त्या कस्यचित्प्राणिशरीरे संस्थापितान् अनङ्गलेखायाः प्राणान् तस्याः शरीर एव संस्थाप्य तां जीवयति । अज्ञातप्रचलितसङ्घटनाम् अनङ्गलेखां सर्वे दूषयन्ति । शिवदासेन विषयाः सर्वे विशदीक्रियन्ते । ततः राजपरिवारः, भिक्षुर्विष्णुमित्रश्च धन्यवादान् समर्पयन्ति । भिक्षुणा स्वकृतापराधान् परिहर्तुं पुण्यसंचयनार्थं पुण्यक्षेत्रं गम्यते इति कथावस्तु।

---

1 नाट्यशास्त्रम्


ISSN : 2320-740X

रामपाणिवादेन रचितप्रहसनस्यास्य कथावस्तु काल्पनिकमस्ति । स्वशैल्या पात्रचित्रणमपि सुष्ठुतया कृतं वर्तते । प्रहसनस्यास्य अङ्गी रसो वर्तते हासस्थायिभावात्मकः हास्यरसः । कैश्चित् रूपकमिदं प्रहसनलक्षणे नान्तर्भवतीति उच्यते । किन्तु रामपाणिवादेन प्रस्तावनायां ' मारिष ! अपि शृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वशे वर्तत ' इति उक्तमस्ति । किन्तु तेनैव तस्यान्ते एवमभिहितम्–

**प्रहसनलक्षणलेशैः स्पृष्टं चेत् प्रहसनाभिधां लभताम् । नो चेत्पुनरन्यदिदं विनोदनं पाणिवादस्य** ॥ इति ।

विमर्षदृश्ट्या अवलोकयामश्चेत् ' नापि विष्कम्भकप्रवेश्कौ ' इति लक्षणमत्र न सङ्गच्छते यतः, प्रहसनेऽस्मिन् कविना शुद्धविष्कम्भकः प्रयुक्तः । यतः मध्यमाभ्यां पात्राभ्यां संस्कृतसंभाषणयुक्तमस्ति इति । अपि च प्रहसनलक्षणे सर्वप्रमुखांशः भवति हास्यरसप्रधानता । अत्र प्रथमतया भिक्षोर्विष्णुमित्रस्य स्वभावः हास्यद्वारा एव परिचायितः । अपि च शिवदासस्य स्म्भाषणान्यपि सर्वत्र हास्यमयमेव दृश्यते । यदा शिवदास अनङ्गलेखायाः शरीरे प्रविश्य आगच्छति तदा विलोमरीत्या व्यवहारं प्रदर्शयति तदानीमपि हास्यरसस्य गाढत्वं दृष्टुं शक्यते। तथापि स्थूलतया अवलोकयामश्चेत् प्रहसनलक्षणविरुद्धं सविष्कम्भकं विहाय अन्यत्सर्वं प्रहसनलक्षणाः दृश्यते इत्यस्मात् रूपकमिदं प्रहसनप्रकारमेव इति वक्तुं शक्यते इति शम् ।

सन्दर्भग्रन्थाः

1. साहित्यदर्पणम्
2. मदनकेतुचरितम्
3. नाट्यशास्त्रम्

***

# आत्मस्वरूपम्

**युवराज घिमिरे**

शोधच्छात्रः न्यायविभागः

भारतीयदर्शनशास्त्रपरम्परायां दर्शनमिति पदं विशिष्टं स्थानं भजते । तच्च स्थानं तत्पदार्थगौरवादेव सम्भवति । व्युत्पत्तिदृष्ट्या दर्शनपदार्थः द्विविधः । दृश्यते अनेनेति दर्शनम् । अथवा दृश्यते इति दर्शनम् । यदा भावे व्युत्पत्तिः तदा दर्शनमिति पदं तत्तदनुभवम् अभिव्यनक्ति । यदा च करणे व्युत्पत्तिः तदा तत्तदनुभावकं शब्दपुञ्जम् कथयति । दर्शनञ्च आस्तिकनास्तिकभेदेन द्विविधम् । तत्र प्रतिपाद्यं मुख्यं वस्तु आत्मा एव । स च सर्वाभीष्टं वस्तु । तस्य च स्वरूपतः ज्ञानाय अथवा तत्त्वतः उपलब्धये च दर्शनमेव प्रथमं शरणम् अस्माकम् । अतः दर्शनसरणिः अवश्यम् अनुसर्तव्या आत्मबुभुत्सुभिः ।


ISSN : 2320-740X

जगति आस्तिको नास्तिको वा न कोऽपि अहं नास्मीति अनुभवति , प्रत्युत अहमस्मीति अनुभवः सार्वजनीनः वर्तते एव । किन्तु अहन्त्वेन अनुभूयमानः आत्मा किं शरीरमेव उत तस्माद्विलक्षण अन्य एव इति अस्ति चर्चा दर्शनशास्त्रेषु । अत्रैव आत्मविषये बहवः पक्षाः समजायन्त । पुनश्च श्रुतौ अपि "आत्मा वाऽरे श्रोतव्यो मन्तव्यो, निदिध्यासितव्य" इत्याद्यनेकवचनानां विद्यमानत्वात् भौतिकचक्षुषा द्रष्टुमशक्यं निगूढं आत्मतत्वं वर्तत इति सिध्यति। पुनरपि श्रुतौ तैत्तिरीयोपनिषदि अन्नमयप्राणमयमनोमयादिकोशानां आत्मत्वेन व्यपदेशात् शरीरादिकमेवात्मेति आगच्छति । पुनश्च 'अहं स्थूलः' 'अहं कृशः' इति सर्वानुभवात् स्थूलत्वस्य कृशत्वस्य शरीर एव दृष्टत्वाच्च शरीरमेवात्मा इति साधितमेव भवति ।

किन्तु अयं सिध्दान्तः न विचारसहः यत येन अहमिति शरीरस्य सामानाधिकरणेन आत्मत्वं साध्यते तेनैव तर्केण अहं बधिरः, अहं काणः, इति प्रतीतिसहकृततर्केण इन्द्रियाणामपि आत्मत्वं प्रतिपादयितुं शक्यते । अत एव सुषुप्तिदशायामिन्द्रियेषूपरतेषु सत्यपि देहे चैतन्यानुपलम्भः । चक्षुराद्यन्वयव्यतिरेकानुविधायिनो ज्ञानादेः तन्निष्ठत्वमेवोचितम् । अत एव 'चक्षुः पश्यति' इत्यादिव्यवहारः । किञ्च इन्द्रियेषु सकलेषु विकलेषु वा 'अहं सकलः, अहं विकलः' इति सर्वेऽपि प्रतियन्ति ।

अतः इन्द्रियाणामेव आत्मत्वं भवति इति चेन्न । यतः प्राणेषु गतेषु सत्सु च इन्द्रियेषु चेतनत्वव्यवहारः नावलोक्यते। अतः अपरोऽपि प्राणात्मवादः समुदीर्यते । तत्रोभयमपि प्रमाणं भवत्येव । 'बुभुक्षितोऽहं, पिपासितोऽहं' इत्यनुभवः सामानधिकरण्येन भवति । अतः प्राणाः एव आत्मा इति पक्षः पर्यवस्यति ।

अपरे पक्षमिमं न सहन्ते – यतः "आत्मेन्दियमनः संयोगस्यैव ज्ञानकारणत्वमङ्गीक्रियते । अनुभवोऽपि अत्र प्रमाणम् एव । अन्यत्र मनसि संलग्ने इन्दियसंयोगेऽपि वस्तुनः प्रत्यक्षत्वं न भवति" । अत एव 'पश्यन्नपि न पश्यति, श्रुण्वन्नपि न श्रुणोति' इति वाक्यमपि अनुकूलमाचरति । तस्मात् मन एव आत्मा इति उदयते । यतोहि संङ्कल्पम् अहं करोमि , विकल्पमहं करोमि इति अनुभवबलात् मनसः आत्मत्वं सिध्यति इति चेत् न । तत्र न्यायसिध्दान्तमुक्तावलीकारः इमान् पक्षान् खण्डयन् समाधत्ते –

**शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः । तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥**

**मनोऽपि न तथा ज्ञानाद्यानाध्यक्षं तदा भवेत् । इति ।**

आत्मनः करणतया सिध्यत्मनः ज्ञानाश्रयो न भवति । वास्यादेः करणस्य कर्तृभेददर्शनात् लोके तथैव दृष्टत्वात् ।

तर्हि स च कः इति विचारे बौध्दाः वदन्ति विज्ञानमेव आत्मा इति संप्रतिपन्नत्वात् । तच्च क्षणिकं सत्वात् । यत् सत् तत्क्षणिकम् इति न्यायात् इति चेत् न, 'स एव अहमि'ति प्रतिसन्धानानुपपत्तेः । प्रतिसन्धानं हि – 'योऽहं दुःखम् अन्वभूवं स एवाहमिदानीं सुखमनुभवामी'ति । अनुसन्धानमेतत् भ्रान्तिरितिचेत्, न अबाधात् । 'नाहं स'


ISSN : 2320-740X

इति बाधकप्रत्ययः नहि कस्यापि भवति । उक्त प्रतिसन्धानेन ज्ञातृत्वस्थिरत्वयोः विषयीकरणात् पुनश्च ज्ञानस्य सविषयकत्वनियमात् च विज्ञानातिरिक्तः स्थिरश्च कश्चित् अस्तीति ज्ञायते स एव आत्मा ।

ननु अस्तु तर्हि क्षणिकविज्ञाने दोषबाहुल्यात् नित्यविज्ञानमेव आत्मेति चेत् न विज्ञानस्य सविषयकत्वनियमात् । अङ्गीकृते च तस्मिन् सर्वज्ञत्वादिप्रसङ्गः निर्बाध एव । इत्थं च ये दोषाः क्षणिकविज्ञानमते उद्भूताः त एव दोषाः नित्यविज्ञानात्मस्वीकारपक्षेऽपि वरीवृतीति । पुनश्च अत्र मते ज्ञानं निर्धर्मकमिति सिध्दान्तः । स तु सर्वथा न सम्भवति । ज्ञानं चेत् सधर्मकमेव सविषयकमेवेति सर्वेषां अनुभवः । अतः केवलं विज्ञानस्वरूपः आत्मा न स्वीकारार्हः । स च ज्ञानाश्रयः न तु ज्ञानमात्रम् । इमां वार्तां विशदयन् महर्षि बादरायणः स्वकीये वेदान्तग्रन्थे "ज्ञोऽत एव" इति सूत्रं सूत्रयामास । तदाशयश्च आत्मा ज्ञानवानेवास्ति न तु ज्ञानमात्रम् । कुतः इति चेत् 'अत एव' इत्यनेन आत्मनो ज्ञातृत्वस्य श्रुतिसम्मतत्वं व्यक्तीकरोति। श्रुतिश्च – "य इत्थं जानाति यदहं जिघ्रामि स एव आत्मा विद्यते" इति । अतः श्रुत्यनुमानप्रमाणाभ्याम् सिध्यत्यात्मा शरीरादिभ्यः विलक्षणः इति । स च आत्मा द्विविधः । जीवात्मा, परमात्मा चेति । परमात्मा एक एव जीवात्मा तु नाना इति वैशेषिकसूत्रकृतोक्तम् – " व्यवस्थातो नाना" इति । "अजो नित्यः शाश्वतोऽयं पुराणः" श्रुतिप्रमाणेन आत्मानः नित्याः शाश्वताः पुराणाः इति आत्मनः नित्यत्वम् अनेकत्वं च सिध्यति ।

***

# साङ्ख्यवेदान्तदर्शनयोः अव्यक्ततत्त्वम्

**गीता याजि**

**शोधच्छात्रा**

शारीरकमीमांसाशास्त्रे प्राधान्येन साङ्ख्यदर्शनं निराकृतमिति प्रसिद्धमेतत् । साङ्ख्या हि श्रुतिं प्रमाणतया अङ्गीकृत्यापि तस्याः युक्त्यपेक्षया दौर्बल्यं मन्यमानाः युक्त्यैव स्वसिद्धान्तं स्थापयन्ति । अत एव ते तार्किका इति प्रसिद्धाः । श्रुत्युक्तमर्थं स्मृत्या युक्त्या चालोच्य तत्त्वं निर्धारयन्ति । तन्मतानुसारम्, परमर्षिणा कपिलेन ये अर्थाः यथा प्रतिपादिताः, ते तथैव श्रुत्याऽपि अनूद्यन्ते । अतः साङ्ख्यैः बहूनि वाक्यानि पदानि च तादृशानि प्रदर्श्यन्ते, यत्र स्वीयसिद्धान्तानुकूलः अर्थः प्रतीयते । प्रकृतिमूलप्रकृतिप्रधानादिशब्दैः अव्यक्ताख्यं तत्त्वं श्रौतीकर्तुं प्रवृत्ताः ते काठकवाक्यम् उदाहरन्ति ।

तथा हि कठोपनिषदि श्रूयते **महतः परमव्यक्तमव्यक्तात् पुरुषः परः**[१] इति । अत्र महदादिपदानि साङ्ख्यतत्त्वपराणि। **य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धाः त एवेह प्रत्यभिज्ञायन्ते**[२] इति वदद्भिः भाष्यकारैः साङ्ख्यानामाशयः प्रकटीकृतः । साङ्ख्याः स्वानुकूलश्रुतिस्मृतिन्यायान् कांश्चित् आश्रित्य अव्यक्तस्य जगत्कारणत्वं स्थापयन्ति इति **तदेव च जगत्कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य** इति भाष्ये दर्शितम् ।


ISSN : 2320-740X

तस्मादपि पुरुषः परः, भोग्यस्य भोक्त्रर्थत्वात् । महदिति मूलप्रकृतेः प्रथमः विकारः अहङ्कारप्रकृतिः महत्तत्त्वमुच्यते । तस्मात् परं अव्यक्तशब्दितं प्रधानम्, प्रधानस्य महत्तत्त्वप्रकृतित्वात् । यद्यपि तस्याव्यक्तस्य जगत्कारणत्वमत्र न श्रुतम् । तथापि परत्वोक्त्या जगत्कारणत्वसिद्धिः। तदुक्त्या हि अर्वाचीनमहत्तत्वापेक्षया पूर्वकालत्वं प्रधानस्य लभ्यते । तेन तत्कारणत्वं सिद्ध्यति । तर्हि **अव्यक्तात्पुरुषः परः** इत्यत्र परत्वं न कारणत्वम्, पुरुषस्य प्रधानं प्रति कारणत्वाभावात् इति शङ्कायमेवं साङ्ख्याः वदन्ति– पूर्वपूर्वस्मात् उत्तरोत्तरस्य श्रैष्ठ्यमुच्यमानं यस्य यथा सम्भवति तत्तथा उपपादनीयम् । अव्यक्तस्य तु महत्तत्वकारणत्वसम्भवात् परत्वोक्त्या कारणत्वं सिद्ध्यतीति।

एतन्मतं खण्डयितुं शारीरकमीमांसाशास्त्रे आनुमानिकाधिकरणम् आरचितम् । आदौ **आनुमानिकमप्येषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च**[३] इति सूत्रेण पूर्वपक्षमनूद्य तस्य निरासः क्रियते । सूत्रेऽस्मिन् आनुमानिकपदस्य अनुमानप्रमाणगम्यं प्रधानम् इत्यर्थः । लाघवात् सुलभावगमाच्च सूत्रकारेण प्रधानम् इत्येव सूत्रयितुम् उचितम् । तथापि आनुमानिकमिति पदं प्रयुञ्जानः सूत्रकारः इदं संसूचयति यत् प्रधानम् अनुमानप्रमाणगम्यमेव न तु तत् श्रुतिप्रमाणकमिति । एकेषामिति पदं निवेशयतः सूत्रकारस्य अयमाशयः– एके केचन साङ्ख्यतत्त्ववाचकत्वेन भासमानान् शब्दान् अधीयते, न त्वेतावता सर्वत्र वेदान्तेषु तादृशानि पदानि उपलभ्यन्ते । तेन इदमपि सूच्यते यत् इतरेषां तद्विरुद्धार्थप्रापकानां प्रमाणानां सत्त्वे एकेन प्रमाणाभासमात्रेण न अभिमतार्थसिद्धिरिति ।

न इति सिद्धान्तप्रतिपादकशब्दस्य इममाशयं निस्सारयन्ति भाष्यकाराः– **न ह्येतत्काठकवाक्यं स्मृतिप्रसिद्धयोः महदव्यक्तयोः अस्तित्वपरम्** इति । श्रुतौ पुरुषपदस्यापि सत्त्वेऽपि महदव्यक्तयोरेव ग्रहणं साङ्ख्यप्रतिपाद्यं पुरुषस्वरूपं वेदान्तिनामपि समानमिति ज्ञापयति । अव्यक्तमिति शब्दमात्रं साङ्ख्यमतप्रसिद्धं प्रधानं नोपस्थापयति । यतः शब्दस्य प्रत्यभिज्ञानेऽपि नास्त्यत्र अर्थस्य प्रत्यभिज्ञानम् । अर्थस्वरूपे विरुद्धे कथं शब्दमात्रं अर्थं स्मारयेत् ? यत्स्वरूपं अव्यक्तस्य वर्ण्यन्ति साङ्ख्याः न तस्य अत्र ईषन्मात्रेणापि प्रत्यभिज्ञानमस्ति। न व्यक्तमव्यक्तमिति व्युत्पत्तिः यद्यपि प्रधाने सम्भवेत् । तथापि सा व्युत्पत्तिः प्रधानदन्यस्मिन्नपि अर्थे सम्भवति । **न व्यक्तमव्यक्तमिति यौगिकत्वात् अन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते** इति भाष्यम् । इदं वचनम् अव्यक्तशब्दः प्रधानमभिधत्ते इति साङ्ख्यवादं प्रति कुठारायते । तथा हि इन्द्रियागोचरो हि पदार्थः अव्यक्तशब्दाभिधेयः । गीतायां पुरुष एव अव्यक्तश्ब्दः प्रयुक्तः **अव्यक्तोऽयमचिन्त्योऽयम्**[४] **अव्यक्तं व्यक्तिमापन्नम्**[५] **क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्**[६] **मया ततमिदं सर्वं जगदव्यक्तमूर्तिना७** इत्येवम् । सूत्रकार एव **तदव्यक्तमाह हि** इति चक्षुराद्यग्राह्ये ब्रह्मणि अव्यक्तशब्दमाह । साङ्ख्यमतेऽपि कारणमात्रे अव्यक्तशब्दः प्रयुक्तो दृश्यते । यथा **प्रतिसर्गे तु मृत्पिण्डं सुवर्णपिण्डं वा घटमुकुटादयो विशन्तःअव्यक्तीभवन्ति । तत्कारणरूपमेव अनभिव्यक्तं कारणमपेक्ष्य अव्यक्तं भवति । एवं पृथिव्यादयः तन्मात्राणि विशन्तः स्वापेक्षया स्वमात्राणि अव्यक्तयन्ति**[८] इति । एवमपि साङ्ख्यैः, अस्माकं शास्त्रे प्रधान एव अव्यक्तशब्दः रूढ इत्युच्येत । तत्राहुः भाष्यकाराः **या तु प्रधानवादिनां रूढिः सा तेषामेव**


ISSN : 2320-740X

**पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते** इति । अनेन वाक्येनापि साङ्ख्यसिद्धान्तस्य उपनिषदां च न कोऽपि सम्बन्धः, उपनिषदमनपेक्ष्य यत्किञ्चित् मतं ते स्थापयन्ति इति ज्ञाप्यते । तथा च काठकभाष्ये **तार्किको ह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति**९ इति । किञ्च साङ्ख्याः यस्मिन्नर्थे यत्पदं प्रयुञ्जते, तस्मिन्नेवार्थे अन्यैरपि तत्पदं प्रयुज्यत इति नास्ति नियमः । यथा गुणशब्दः शास्त्रे विभिन्नार्थेषु प्रयुज्यते । यथा वा प्रकृतिशब्दः । साङ्ख्याः पदमिदं प्रधानवाचकमिति मन्यन्ते। अन्येषां तु मते उपादानकारणमिति तदर्थः । अत एव **प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्**[१०] इति सूत्रे ब्रह्मण उपादानकारणत्वं प्रकृतिशब्देन अभिहितम् । अतः अव्यक्तपदमपि न प्रधानवाचकम् ।यदि साङ्ख्यैः स्मृतिप्रतिपादितः क्रम एवात्र प्रत्यभिज्ञायत इत्युच्यते, तदयुक्तम्, स्वरूपस्य प्रत्यभिज्ञाभावे क्रममात्रस्य पदार्थनिर्णायकत्वासम्भवात् । उपहसितं च भाष्यकारैः **न ह्यश्वस्थाने गां पश्यन् अश्वोऽयमिति अमूढः अध्यवस्यति** इति । तथा च श्रौतमव्यक्तपदं प्रधानवाचकमिति वदन् साङ्ख्यः मूढ एवेति न पुनर्वक्तव्यम्।

एतावता भाष्ये अव्यक्तशब्दमात्रं न कस्यचित् पदार्थस्य निर्णायकम्, तत्स्वार्थनिश्चयाय प्रमाणान्तरापेक्षमेव तिष्ठति इत्युक्तं भवति । तच्च प्रमणान्तरं प्रकरणमेव, अप्रकृतप्रतिपादनस्य असम्भवात् । प्रकरणे चाश्रियमाणे अव्यक्तशब्दार्थः शरीरमेव न प्रधानमिति शरीररूपकविन्यस्तगृहीतेः इति सूत्रभागः वक्ति । शरीरमेव रूपकेण रथसादृश्येन विन्यस्तम्, तस्य पूर्ववाक्ये आत्मबुद्ध्योः मध्यस्थाने पठितस्य अत्रापि मध्यस्थेन अव्यक्तशब्देन ग्रहणादिति सूत्रार्थः । तथा हि

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥**

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः**[११] ॥

इति पूर्वम् आत्मशरीरादीनां रथिरथादिकल्पनां दर्शयित्वा इन्द्रियादिभिः संयतैः प्राप्तव्यं विष्णोः परमं पदं दर्शयितुम् इदमुपन्यस्तम्–

**इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः ॥**

**महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः**[१२] ॥ इति ।

अत्र प्रकृतहानाप्रकृतप्रक्रियावारणाय पूर्वं रथरूपककल्पनायाम् उक्ता एव आत्मादयः परिगृह्यन्ते । तदानीं पूर्वप्रकृतं शरीरमेव परिशिष्यते । इहापि इन्द्रियादीनां प्रकृतानामेव ग्रहणात् अव्यक्तमेकं पूर्वप्रकृतं किञ्चित् अनभिहितं परिशिष्यते । अतः परिशिष्टं शरीरमेव इह परिशिष्यमाणेन अव्यक्तशब्देन अभिधीयत इति ज्ञायते । प्रकरणपर्यालोचने च सति न केवलं परिशेषन्यायेन अपि तु पूर्वोत्तरग्रन्थस्य संसारमोक्षगतिनिरूपणेन प्रत्यगात्मब्रह्मैक्यं प्रतिपिपादयिषितमिति ज्ञायते । साङ्ख्यपक्षे तु एतत्प्रकरणप्रतिपाद्यं वस्तु प्रधानमेव इति उपपादयितुं न शक्यते । तथा च भाष्यम् **पूर्वापरपर्यालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्य अवकाशः** इति । अपि च कठोपनिषदि वैष्णवपदस्य अधिगमार्थमेव योगः दर्शितः–


ISSN : 2320-740X

**यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेतद्यच्छेच्छान्त आत्मनि१३** ॥ इति । स च योगः आत्मदर्शनार्थमात्रमिति साङ्ख्येन वक्तुं न शक्यते, **सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्** इति तत्रैव श्रुतत्वात्। प**रमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति** इति कथयद्भिः भाष्यकारैः अयमप्यर्थो कटाक्षविधया विवक्षित इति कथनं नायुक्तम् ।

एवं प्रकरणपरिशेषाभ्याम् अव्यक्तशब्दः शरीरपर इति निर्णीते, शरीरस्य स्थूलत्वेन सर्वजनप्रत्यक्षत्वात् व्यक्तशब्दार्हस्य तस्य अव्यक्तशब्देन कथमभिधानमिति प्रश्न उद्भवति । तत्रेदं सूत्रं प्रणीतं **सूक्ष्मं तु तदर्हत्वात्**[१४] इति। शरीरमत्र स्वकारणात्मना अव्यक्तशब्दार्हम् । शरीरस्य कारणम् अव्यक्ताव्याकृतादिशब्दव्यपदेश्या माया । तस्या अव्यक्तत्वात् श्रुतौ तत्कार्यभूते शरीरे अव्यक्तशब्दः प्रयुक्तः । अत्रायमाशयः सूत्रभाष्यकाराणाम्– अव्यक्तशब्दस्य सूक्ष्मसुदुर्लक्ष्यवस्तुवाचकत्वात् साङ्ख्याभिमतप्रधानस्य तु प्राकरणिकत्वेन ग्रहणासम्भवे वेदान्तप्रसिद्धा मायैव अभ्युपेया । अत एव विवेकचूडामणौ

**अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या ।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते**[१५] ॥

इति मायैव अव्यक्तशब्देन व्यपदिष्टा । अस्मिन्नेव श्लोके तस्या मायायाः जगत्कारणत्वमभिहितम्, यद्धि **मायां तु प्रकृतिं विद्यात्**[१६] इत्यादिश्रुतौ दर्शितम् । किञ्च व्याकृतनामरूपात्मकस्य अस्य प्रपञ्चस्य उत्पत्तेः पूर्वं नामरूपव्याकरणाभावात् अव्याकृतमिति नाम प्रयुक्तं श्रुतौ **तद्धेदं तर्ह्यव्याकृतमासीत्**[१७] इति ।अत उत्पत्तेः पूर्वं कार्यस्य कारणात्मना व्यपदेशो दृष्टचरः । इदं साङ्ख्येनापि अङ्गीकर्तव्यमेव भवति , तेनापि कार्यकारणयोः अभेद इति, कारणस्य अभिव्यक्त्यवस्था एव कार्यमिति च निरूपितत्वात् । तावताऽपि साङ्ख्यप्रक्रिया अत्र आश्रिता इति तु न मन्तव्यम्, **गोभिः श्रीणीत मत्सरम्**[१८] इति वेद एव गोविकारे पयसि कारणवाचिगोशब्दप्रयोगदर्शनात् ।तथा च अव्यक्तशब्दायाः मायायाः जगत्कारणत्वात् शरीरे च अव्यक्तशब्दस्य प्रयोगात् कारणवाची अव्यक्तशब्दः अत्र कार्ये शरीरे प्रयुक्त इत्यभ्युपेयम् । एवमत्र सूत्रकृता भाष्यकृता च साङ्ख्यमतनिराकरणे तदीयोऽपि सिद्धान्तः अनुसृतः । एवमेव इतरैः **तदधीनत्वादर्थवत्, ज्ञेयत्वाचनाच्च, वदतीति चेन्न प्राज्ञो हि प्रकरणात्, त्रयाणामेव चैवमुपन्यासः प्रश्नश्च, महद्वच्च**[१९] इतीमान्यपि सूत्राणि साङ्ख्यमतनिरासे उपयुक्तानि । तस्मात् अव्यक्तशब्दः न प्रधानवाचीति वेदान्तशास्त्रस्य सिद्धान्तः।

**सङ्केतसूची–**

१ कठोपनिषत् २–३–११
२ ब्रह्मसूत्रशाङ्करभाष्यम् १–४–१
३ ब्रह्मसूत्रम् १–१–४
४ भगवद्गीता २–२५
५ भगवद्गीता ७–२४
६ भगवद्गीता १२–५
७ भगवद्गीता ९–४
८ साङ्ख्यतत्त्वकौमुदी पृष्ठम् ३४


ISSN : 2320-740X

९ काठकोपनिषद्भाष्यम् १–२–९

१० ब्रह्मसूत्रम् १–४–२३

११ काठकोपनिषत् १–३–३, ४

१२ काठकोपनिषत् १–३–१०, ११

१३ काठकोपनिषत् १–३–१३

१४ ब्रह्मसूत्रम् १–४–२

१५ विवेकचूडामणिः–११०

१६ श्वेताश्वतरोपनिषत् ४–१०

१७ बृहदारण्यकोपनिषत् १–४–७

१८ ऋग्वेदसंहिता ९–४६–४

१९ ब्रह्मसूत्रम् १–४–३, ४, ५, ६, ७

***

# लघुपाणिनीयग्रन्थस्य परिचयः वैशिष्ट्यञ्च

**आनन्द पण्ड्या**

**शोधछात्रः**

"षडङ्गविदस्त तथा धीमहे" इति गोपथब्राह्मणोक्त्या ब्राह्मणेन निष्कारणः धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति महाभाष्यवचनेन तथा शिक्षावचनैश्च ज्ञायते यद् अस्माभिः साङ्गं वेदः पठनीयः । तत्राऽपि वेदाङ्गेषु शब्दसाधुत्वज्ञापकं व्याकरणं मुखस्थानीयत्वेन परिकीर्त्यते । प्रधानञ्च षट्स्वङ्गेषु व्याकरणमिति महाभाष्यकाराः । शब्दानुशासनम् एव अस्य मुख्यं प्रयोजनं, "साधुत्वाज्ञानविषया सैषा व्याकरणस्मृतिः" इति मञ्जूषायां नागेशः । शब्दोत्पत्तिविषये यथा उच्यते यत्सृष्टिकालिकोत्पत्तिमतः प्रलयकालिकनाशवन्तः तद्वत् इदं शास्त्रमपिनाऽधुनिकं यथा पस्पशाह्निके महाभाष्यकाराः अवोचन्" एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । बृहस्पतिश्च प्रवक्ता इन्द्रश्च अध्येता दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम इति भाष्येण ज्ञायते व्याकरणशास्त्रं नाधुनिकम् एव । तत्राऽपि नानाविधानि व्याकरणानि बहुभिः महर्षिभिः प्रणीतानि यथा –

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनीयकम्** ॥ इति ।

सत्सु बहुषु व्याकरणेषु पाणिनीयमेव मूर्धावतंसतया विराजते । एतत्पणिनीयव्याकरणमाधारीकृत्य अनेके ग्रन्थाः लिखिताः तेषु ग्रन्थेषु लुप्तस्य लघुपाणिनीयग्रन्थस्य परिचयः मया अत्र प्रस्तूयते ।

**लघुपाणिनीयमिति ग्रन्थस्य परिचयः**

अयं ग्रन्थः 03 August 1911 तमे वर्षे केरलविश्वविद्यालयेनप्रकाशितः । राजराजवर्ममहोदयैः 1863 – 1918 मध्ये अयं ग्रन्थः व्यलेखि तदा अस्य ग्रन्थस्य प्रकाशनाभावात् नष्टोऽभूत्, नैकैः विद्वद्भिः (भारतीयाः एवं पाश्चात्यैः) अस्य ग्रन्थस्य प्रति प्राप्त्यर्थं यत्नः अकारि तथापि न केनापि प्राप्तम् । अशीतिवर्षाणाम् अनन्तरम् अस्य ग्रन्थस्य काचित्प्रतिः (copy of book ) प्राप्ता । अतः Dep. Of Publication, University of Kerala द्वारा


ISSN : 2320-740X

प्रकाशितः। केरलविश्वविद्यालयेन बहवः ग्रन्थाः प्रकाशिताः परन्तु तेष्वत्यन्तंयोग्यः एवं महत्वपूर्णोऽयं "लघुपाणिनीयम्" ग्रन्थः वर्तते इति Pro. Harihar Shastri महोदयेन पीठिकायामलिख्यत । ग्रन्थोऽयम् अध्यापकेभ्यः एवमेव छात्रेभ्यश्च बहूपकरोतीति पीठिकायामलिख्यत । ग्रन्थोऽयं विशिष्टया शैल्याप्रस्तुतः, अत्रमुख्यतया तिस्रः शैल्यो वर्तन्ते तद्यथा 1.विषयोपस्थापनम्, 2.अर्थवर्णनम्, 3. सिध्दान्तोपस्थापनम् । अयंग्रन्थः षट्सु काण्डेषु विभक्तोऽस्ति । 1.शिक्षाकाण्डः, 2.परिनिष्ठाकाण्डः, 3.निरुक्तकाण्डः, 4.आकांक्षाकाण्डः, 5.वैदिककाण्डः, 6.स्वरकाण्डः इति । ग्रन्थकारः प्रक्रियासर्वस्वम्, एवं वाक्यपदीयमिति द्वयोः उदाहरणानि बहुत्र प्रदर्शयामास । तेन ज्ञायते यत् ग्रन्थकारोऽपि परम्परामेवानुसरति । प्रकाशितोऽयं ग्रन्थः देशेषु विदेशेषु (जर्मनेत्यादि) विख्यातिं प्राप्नोत् । ग्रन्थोऽयं वैयकरणसिध्दान्तकौमुद्यपेक्षया सरलो अस्ति । एतेन कार्येण व्याकरणशास्त्रपठितॄणां छात्राणां, व्युत्पित्सूनामपि महानुपकारो भविष्यति । अतः सम्प्रति ग्रन्थोऽयं बहुषु विश्वविध्यालयेषु पाठ्यांशत्वेन गृहीतः ।

**ग्रन्थस्यवैशिष्ट्यम्**

१. "अइउण्" इत्यादिसूत्राणां रचनाक्रमे वैशिष्ट्यमस्तीति एतैः प्रतिपादितम् । तत्र अ, इ, उ इति मूलस्वरैः प्रथमं सूत्रम् । रेफलकाररुपव्यञ्जनांशोपस्कृताभ्याम् ऋलृभ्यां व्दितीयम् । अ+ ए= ऐ, आ+ ओ =औ इति संकीर्णाकारविशिष्टसंसृष्टिरुपाभ्याम् ऐ–औ–भ्याम्चतुर्थम् । ए, ओ, ऐ, औ इत्येते स्वराः संकररूपत्वात् संध्यक्षराणीत्युच्यन्ते ।

२. संज्ञाप्रकरणेव "न विभक्तौ तुस्माः" "आदिर्ञिटुडवः" "षः प्रत्ययस्य" "चुटू" "लशक्वतध्दिते" "तस्य लोपः" सूत्राणि व्याख्यातानि । सिध्दान्तकौमुद्याम् एतानि सूत्राणि संज्ञाप्रकरणे न व्याख्यातानि ।

३.परिभाषायाः लक्षणं एवमुक्तं लाघवाय असंदेहाय च शास्त्रेषु स्वातन्त्रेण निबध्दाव्यवस्थाः परिभाषाशब्देनोच्यते । अत्रैव प्रकरणे "एच इग्घ्रस्वादेशे" "उरण् रपरः" "स्वंरुपं शब्दस्याशब्दसंज्ञा" "अणुदित्सवर्णस्यचाप्रत्ययः" "येनविधिस्तदन्तस्य" यथासंख्यमनुदेशः समानाम्" इत्यादीनि सूत्राणि व्याख्यातानि ।

४. "आद्गुणः" वृद्धिरेचि इति द्वयोः सूत्रयोः स्थाने "आदकिगुणः" "एचि वृद्धिः" वक्तुं शक्यते।

५. "चोः कुः" "हो ढः" "दादेर्धातोर्घः" हलः कार्यबोधकानि सर्वाणि सूत्राणि अत्र प्रकरणेव व्याख्यातानि ।

६. शब्दविभागप्रकरणे प्रातिपदिकसंज्ञा, धातुसंज्ञा, पदसंज्ञा, अव्ययसंज्ञा, निपातसंज्ञा, गतिसंज्ञा, विधायकानि सूत्राणि सर्वाणि व्याख्यातानि ।

७. परिनिष्ठाकाण्डे पदानां रूपनिष्पतिः प्रदर्शिता । तत्र स्त्रीप्रत्ययविधायकानि सूत्राणि प्रोक्तानि ।

८. सुबन्तप्रक्रियायां सर्वनामसंज्ञा, नदीसंज्ञा, घिसंज्ञा, पदसंज्ञा, भसंज्ञाबोधकानि सूत्राणि तेषां प्रक्रिया च दर्शिता। ततः परं सन्धिकार्याणि (पदमध्यसन्धिः) यथा – प्रथमयोः पूर्वसवर्णः, अमिपूर्वः, इत्यादीनि ।


ISSN : 2320-740X

९. अङ्गकार्यविधायकानि सूत्राणि विचारितानि । ततः परं प्रकरणान्तरविहितकार्याणि प्रोक्तानि । युष्मदस्मद्प्रक्रिया पृथक्प्रकरणे निरूपिता । तदनन्तरं षत्वणत्वप्रकरणयोः विचारः कृतः ।

***

# न्यायनये अपवर्गसाधनसरणिः

**सुमेधा के. के.**
आचार्यद्वितीयवर्षम्

प्राचीननैयायिकेन श्रीभासर्वज्ञेन प्रणीतन्यायसारे अपवर्गनिरूपणोपयोगितया प्रमेयस्य चातुर्विध्यमुपदर्शितम् । तथाहि, **प्रमेयं चतुर्विधं** – हेयम्, तस्य निर्वर्तकं, हानमात्यन्तिकं, तस्योपाय इति ॥

१. **तत्र हेयं दुःखमनागतम्** ॥

तच्च एकविंशतिप्रकारकम् – शरीरम्, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं दुःखञ्चेति । तत्र चेष्टाश्रयः शरीरम्। घ्राणरसनचक्षुस्त्वक्छ्रोत्रमनांसि षडिन्द्रियाणि । गन्धरसरूपस्पर्शशब्दाः पञ्च बहिर्विषयाः, ज्ञायमानतया सुखदुःखहेतवः। मनोविषयस्तु स्मृतिसङ्कल्पौ यद्वा निद्रालस्यकामादिः यद्वा ज्ञानेच्छादयः । विषयाणामिन्द्रियाणाञ्च षड्विधत्वात् बुद्धयोऽपि षडित्युच्यन्ते । तत्र शरीरं दुःखायतनतया दुःखम् । इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात् । सुखं दुःखानुषङ्गाद् दुःखम् । दुःखं तु बाधपीडासन्तापात्मकं मुख्यत एवेति ।

२.**दुःखस्य निर्वर्तकमसाधारणकारणमविद्यातृष्णे धर्माधर्माविति च** । सम्यगध्यात्मविद्भिः प्रदर्शितेऽर्थे **विपरीतज्ञानमविद्या** सह संस्कारेणेति । तद्यथा – " अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ।
जराशोकसमाविष्टं रोगायतनमातुरम् रजस्वलमनित्यं च भूतावासमिमं त्यजेत्"॥ इति आत्मविद्भिः प्रदर्शिते शरीरस्य यथार्थस्वरूपे विपरीत ज्ञानम् –
"अमृतस्येव कुण्डानि सुखानामिव राशयः । रतेरिव निधानानि योषितः केन निर्मिताः "॥ इत्येवं रुपमविद्या ।
पुनर्भवप्रार्थना **तृष्णा** । पुनर्भवस्य विशिष्टशरीरादिलाभस्य प्रार्थना वाञ्छा । सुखदुःखयोरसाधारणहेतू **धर्माधर्माविति**।

३. **हानमात्यन्तिकम्** । हानं दुःखविच्छेदः । आत्यान्तिकमिति न कदाचित् कथञ्चिद् दुःखसम्बन्ध इत्यर्थः । अत एव संसारदशायामौषधाद्युपयोगेन दुःखविच्छेदसद्भावेऽप्यात्यन्तिकं हानमिति नोच्यते । विनष्टाया दुःखव्यक्तेः पुनरुत्पत्यभावेऽपि तज्जातीयस्य व्यक्त्यन्तरस्योपादानात् ।


ISSN : 2320-740X

४. **दुःखस्य आत्यन्तिकनिवृत्तेः उपायः**। तस्योपायस्तत्त्वज्ञानमात्मविषयकम् । तथाचोक्तम् "**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**" इति । "**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः ॥**" इति । '**तरति शोकमात्मविदिति**' च ।

स आत्मा द्विविधः परश्चापरश्चेति । तथाचोक्तं '**द्वे ब्रह्मणी वेदितव्ये परं चापरं चे**'त्यादि । तत्रैश्वर्यविशिष्टः संसारधर्मैरप्यस्पृष्टः परो भगवान् परमेश्वरः सर्वज्ञः सकलजगद्विधाता । स अनुमानादागमाच्च ज्ञातव्यः । तथाहि – विवादाध्यासितं अंकुरादिकम् उपलब्धिमत्कारणकम् , अभूत्वाभावित्वात् वस्त्रादिवदिति । सामान्यव्याप्तेरनवद्यत्वेन निराकर्तुमशक्यत्वात् ततः सामान्यसिद्धौ परिशेषात् कार्यविशेषाच्च कर्तृविशेषसिद्धिः । "**एको रुद्रो न द्वितीयाय तस्थे य इमाल्लोकानीशत ईशिनीभिरि**"त्याद्यागमाच्चेति ।

संसारफलोपभोक्त अनन्तोऽपरः । स खलु बुद्ध्यादिकार्याणामाश्रयभूतोऽनुमातव्यः । नहि कार्यं किञ्चिदनाधारमुपलब्धम् । तत्सिद्धमेतत् – शरीरादिव्यतिरिक्तः आत्मा व्यापको नित्य इति । नित्यत्वं कुत इति चेत् अनादित्वात् । तदेव कथमिति चेत् जातमात्रे जन्मान्तरानुभवसूचकस्मरणलिङ्गस्य हर्षशोकभयस्तन्याभिलाषादेरुपलम्भात् । अणिमाद्युपेतस्य आत्मनः युगपदसंख्यातशरीराधिष्ठातृत्वाच्च व्यापकत्वसिद्धिः । तथाचोक्तं पुराणेषु –

"**आत्मनो वै शरीराणि बहूनि मनुजेश्वर । प्राप्य योगबलं कुर्यात् तैश्च सर्वां महीं चरेत् ।**
**भुञ्जीत विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत् । संहरेच्च पुनस्तानि सूर्यस्तेजोगणानिव ॥**"इति

तदेवमपरमात्मतत्त्वज्ञानं परलोकसद्भावेन परलोकप्रवृत्युपयोगित्वादधर्मक्षयहेतुत्वाच्च निःश्रेयससाधनमिति । परमात्मज्ञानं च तदुपासनाङ्गत्वेन अपवर्गसाधनम् ।

स चोपासनविधिः क्लेशक्षयसमाधिलाभार्थमनुष्ठानम् । तथाचोक्तम् – "**तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः**"(२.१) "**क्लेशतनूकरणार्थः समाधिभावनार्थश्च**"(२.२) इति । तत्रोन्मादकामादिव्यपोहार्थमाध्यात्मिकादिदुःखसहिष्णुत्वं **तपः** । प्रशान्तमन्त्रस्य ईश्वरवाचिनोऽभ्यासः **स्वाध्यायः**। परमेश्वरतत्त्वस्य प्रबन्धेनानुचिन्तनम् **ईश्वरप्रणिधानम्** ।

रागद्वेषमोहाः **क्लेशाः** । तेच समाधिप्रत्यनीकाः संसारापत्तिद्वारेण क्लेशहेतुत्वात् । तथा **यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि** । तत्र देशकालावस्थाभिरनियताः पुरुषस्य बुद्धिहेतवो **यमाः अहिंसाब्रह्मचर्यास्तेयादयः** । देशकालावस्थापेक्षिणः पुरुषस्य पुण्यहेतवः क्रियाविशेषा **नियमा देवताप्रदक्षिणसन्ध्योपासनजपादयः** । योगकर्मविरोधिक्लेशजयार्थः करणबन्ध **आसनं पद्मकस्वस्तिकादि** । कोष्ठ्यस्य वायोर्गतिविच्छेदः **प्राणायामो रेचकपूरककुम्भकप्रकारः** । स शनैर्शनैर्जेतव्यो वनगजेन्द्रवत् । समाधिप्रत्यनीकार्थेभ्यः समन्ताच्चेतसो व्यावर्तनं **प्रत्याहारः** । देशबन्धश्चित्तस्य **धारणा** । तत्र प्रत्ययैकतानता **ध्यानम्**।


ISSN : 2320-740X

तदेवार्थनिर्भासमात्रं स्वरूपशून्यमिव **समाधिः** । तदेव ध्यानोत्कर्षान्निवाताचलप्रदीपावस्थानमिवैकत्र चेतसोऽवस्थानं समाधिरभिधीयते ।

एवमेतानि योगाङ्गानि मुमुक्षुणा अभिरतिसंज्ञितं परं वैराग्यं महेश्वरे च परां भक्तिमाश्रित्यात्यन्ताभियोगेन सेवितव्यानि । ततोऽचिरेणैव कालेन भगवन्तमनौपम्यस्वभावं शिवमवितथं प्रत्यक्षतः पश्यति । तं दृष्ट्वा निरतिशयं श्रेयः प्राप्नोति । तथाच श्रूयते – "**यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥**"

" **तमेव विदित्वातिमृत्युमेति** " इति ।

***

# आनन्दवर्धनोक्तं चित्रकाव्यम्

**पंकज भट्टः**

आचार्य द्वितीयवर्षम्

**स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः । त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥**

परमानन्दसन्दोहजनकतया सुख–दुःख–मोहात्मके प्रपञ्चेऽस्मिन् केवलमानन्ददायकत्वेन सहृदयहृदयान् अनुरञ्जयितुं विलसन्ति काव्यरत्नानि । विद्यन्ते च तानि काव्यानि ध्वनिकाव्यम्, गुणीभूतव्यङ्ग्यकाव्यम्, चित्रकाव्यम् इति त्रैविध्येन । विद्वत्–वरिष्ठेन आनन्दवर्धनाचार्येण एवमेव काव्यविभागोऽकारि ।

तत्र ध्वन्यालोके तृतीयोद्योते ध्वनि–गुणीभूतकाव्यविलक्षणतया चित्रकाव्यम् इत्थम् पर्यालोचितम् –

**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते । काव्ये उभे ततोऽन्यद्यत्तच्चित्रमभिधीयते ॥**

अर्थात् व्यङ्ग्यस्य प्राधान्ये ध्वनिः, तस्य गुणीभावे तु गुणीभूतव्यङ्ग्यम् । एतस्मात् काव्यद्वयात् भिन्नं रसभावादितात्पर्यरहितं केवलवाच्यवाचकवैचित्र्ययुक्तम् आलेख्यप्रख्यं काव्यं चित्रमिति उच्यते –

**चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम् । तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम् ॥**

अर्थात् चित्रकाव्यं द्विविधम्–शब्दचित्रमपरमर्थचित्रञ्चेति । दुष्करयमकादयः शब्दचित्रान्तर्गता भवन्ति । एवमपि रसभावादिशून्यम् अर्थालङ्कारप्रधानं काव्यम् अर्थचित्रं भवति । चित्रकाव्यं स्पष्टयितुम् आनन्दवर्धनः पुनः कथयति यत् :–

*यत्र न प्रतीयमानार्थसंस्पर्शः, एवं च न तादृक्काव्यप्रकारोऽस्ति यत्र रसादीनामप्रतीतिः, किन्तु यदा रसभावादिविवक्षाशून्यः कविः शब्दालङ्कारमर्थालङ्कारं वोपनिबध्नाति तदा तद्विवक्षापेक्षाया रसादिशून्यताऽर्थस्य परिकल्प्यते । विवक्षोपारूढ एव हि काव्ये शब्दानामर्थः ।*


ISSN : 2320-740X

*वाच्यसामर्थ्यवशेन च कविविवक्षाविरहेऽपि तथाविधे विषये रसादिप्रतीतिर्भवन्ती परिदुर्बला भवतीत्यनेनापि प्रकारेण नीरसत्त्वं परिकल्प्य चित्रविषयो व्यवस्थाप्यते* । अतः उक्तम् :–

**रसभावादिविषयविवक्षाविरहे सति । अलङ्कारनिबन्धो यः सः चित्रविषयो मतः ॥**

**रसादिषु विवक्षा तु स्यात्तात्पर्यवती यदा । तदा नास्त्येव तत्काव्यं ध्वनेर्यत्र न गोचरः ॥**

अर्थात् यत्र रसभावादितात्पर्यमनपेक्ष्य वाच्यालङ्कारप्राधान्येन कविर्व्यवहरति, तत्र चित्रविषयत्वमुत्पद्यते । तद्विपरीततया, यत्र तु तात्पर्यादेव रसादिषु कवेराग्रहस्तत्र ध्वनिविषयबाह्यं न किमपि काव्यमिति ।

पुनः आनन्दवर्धनाचार्यः स्पष्टीकरोति यत्, *एतच्च चित्रं विशृङ्खलगिरां कवीनां रसादितात्पर्यमनपेक्ष्यैव काव्यवृत्ति– दर्शनादस्माभिः परिकल्पितम् । यतः परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शोभते* । रसादितात्पर्ये च नास्त्येव ध्वनिभिन्नः काव्यभेदः । किञ्च सति काव्यकर्तरि रसादितात्पर्यप्रेरिते सर्वमेव वस्तु रसाद्यङ्गतां प्राप्नोति न केवलं चेतना एव, अपितु अचेतना अपि पदार्था उपयुक्तरसविभावत्वेन वा चेतनत्वारोपेण रसाङ्गतां प्राप्नुवन्त्येवेति ।

उच्यते :–

**अपारे काव्यसंसारे कविरेवः प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्त्तते ॥**

**शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् । स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥**

**भावानचेतनानपि चेतमवच्चेतनानचेतनवद् । व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया** ॥ इति ।

अत्र अयमाशयः – ब्रह्मणोऽपि विशिष्टैव कवेः सृष्टिः, यत पूर्वस्य तु अदृष्टाधीना निश्चितस्वरूपा सुखदुःखमोहस्वभावा परमाण्वाद्यनुपादानकर्मादि–सहकारिकारणपरतन्त्रा, कवेस्तु स्वतन्त्रा यथेच्छरुपा सुखमयी, तत्र करूणादावपि सुखोत्पदकत्वात् , अनन्यपरतन्त्रा षड्–रसा च, पूर्वस्य साद्यन्ताऽपरस्यानाद्यन्ता च । तेन कविः प्रजापतिः । स यथा वाञ्छति तथैव जगदिदं परिणमते । यदि सः शृङ्गाराञ्चितः सर्वमेव रसमयं भवति तस्मिन् विरक्ते तु सरसमपि नीरसमेव । स तु जडानपि चेतनवच्चेतानानऽपि जडवद्यथेच्छं प्रवर्तयति इति तस्य परमप्राजापत्यम् । तस्माद्रसपरकस्य कवेः सर्वमेव वस्तु रसाविभावादितां याति सौन्दर्यातिशयञ्च बृंहयति । एवंरूपेण चित्रकाव्यविषये गहनरूपेण गदित्वा चित्रकाव्यमपि काव्यस्य अपरः प्रकारः स्वीकरणीयैव भवति इति सप्रमाणं प्रतिपादितमानन्दवर्धनाचार्येण ।

***


ISSN : 2320-740X

# छन्दश्शास्त्रम् & Digital Electronics

**उमामहेश्वरः एन्**
आचार्यद्वितीयवर्षम्

कतिपयवर्षेभ्यः पूर्वमध्ययनावसरे मनसि अङ्कुरितस्य बीजरूपचिन्तनस्य विकासवृक्षः कालक्रमेण प्रवृध्य लेखनरूपं फलं प्रादात् । तदिदमिदानीं भवत्करकमलयोः संस्थाप्यते । पुण्यभूम्यां भारतदेशे बहवो हि ऋषयो घनपरम्परानिष्ठागरिष्ठाः परमं मोक्षसुखमेव अवेप्सव आत्मसंस्कारमार्गे आत्मसाक्षात्काराय शास्त्राणि प्रवर्तयामासुः । तेष्वन्यतमो महर्षिः पिङ्गलः । अनेनैव वेदाङ्गेष्वन्यतमं छन्दश्शास्त्रं लोके प्रकाशतामवापेत्युक्तिः न कदापि अतिशयोक्तिः । येन शास्त्रेण सम्प्रत्यपि जनाः जेगीयन्ते रामायणं येन च महाभारमनवरतं पापठ्यन्ते किं बहुना इदानीमपि पद्यकाव्यानि साहित्यप्रपञ्चे राराज्यन्ते तदिदं छन्दश्शास्त्रम् । अस्यैव शास्त्रस्य काचन मर्यादा लोकेऽवलोक्यते । प्रतिशास्त्रमिव शास्त्रप्रवर्तने संज्ञापरिभाषादिप्रकरणानि यथासम्प्रदायम् आदावेव न्यवेशिषत । गुरुः लघुः यतिः पादः इत्यादीनि तच्छास्त्रीयपारिभाषिकपदानि व्याख्यातानि । सूत्राण्यपि यथापेक्षं प्राणायिषत । तत्र गुरुसंज्ञाविधायकं सूत्रं तावत् 'ग्वक्रः' इति । अस्मिन् सूत्रे ग् इत्युक्ते = गुरुरिति वक्रः इत्यस्य रेखाविन्यासः 'ऽ' इत्थम्भवति । लघुसंज्ञाविधायकं सूत्रं तावत् 'लृजुः' इति । अत्र ल् इत्युक्ते लघुः तस्य रेखविन्यासस्तु '।' एवं भवति । सम्पूर्णे शास्त्रे लाघवसम्पादनाय आविष्कृताभ्यां गुरु (ऽ) लघु (।) चिह्नाभ्यामेव शास्त्रं प्रवर्त्यते ।

अस्ति किञ्चन आधुनिकं शास्त्रं Digital Electronics इति । इदञ्च विद्युन्मानशास्त्रेऽवान्तरशास्त्रं सत् परममुख्यञ्च । व्याख्यानेनैवावगम्यते यत्

1) Digital Electronics is that a branch of an Electronics which deals with the digital signal to perform various tasks and meets various requirements.

2) It is based up an digital design methodologies and consists of digital Circuits, IC and logical gates

अत्र सर्वत्रापि उल्लेखनाय 0 1 इति सङ्केते उपयुज्येते । नाम Binary code इति कथ्यते । अस्माकं भाषासु यः कश्चित् भवतु ज्ञानराशिः स सर्वोऽपि 0 1 सङ्केतभाषया सङ्गणके निरूप्यते । इति अस्य एतावान् परिचयः ।

छन्दश्शास्त्रेऽपि सम्पूर्णं शास्त्रं निर्वहतः लघुगुरू । एतावेव नानाविन्यासविशेषैः साहित्यलोके सहृदयानां मनांसि आवर्जयतः । Digital Electronics विज्ञानशाखायां 0 1 इति एतावेव तद्विदां साकल्येन नैकप्रचुरप्रकारैः निखिलं विद्युन्मानशास्त्रं परिपोष्य तेषां तोषाय कारणीभवतः इति तद्विद्भिः स्वयं ज्ञायत एव । एतयोः शास्त्रयोः परस्परं साम्यमासमन्तादवलोक्यते तमशं सोदाहरणं साक्षात्कुर्मः ।


ISSN : 2320-740X

छन्दश्शास्त्रे

| गुरुः | लघुः |
|---|---|
| S | I |

Digital Electronics

| Input 1 | Input 2 |
|---|---|
| 0 | \| |

सप्तर्षिमण्डलमिव सप्तभिः गणैः छन्दश्शास्त्रं व्याप्नोति । ते च गणाः यगणादयः । तेषां सरंचनाख्यापनाय "यमाताराजभानसलगम्" इति आरभ्य बहुक्रमाः दृश्यन्ते । तेषु अयमपि अन्यतमः क्रमः ।

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥

एवमेव Digital Electronics विज्ञानशाखायामपि एतत्समानाकारिकां तैरुपयुज्यमानां संरचनां दृष्टुं शक्नुमः । तत्र तस्य Binary coded Decimal इति निर्दिश्यते ।

Digital Electronics

| Or[1] | I1 I2 I3 | Status |
|---|---|---|
| 0 | 0 0 0 | All zero |
| 1 | 0 0 1 | End one |
| 2 | 0 1 0 | Middle one |
| 3 | 0 1 1 | Beginning zero |
| 4 | 1 0 0 | Beginning one |
| 5 | 1 0 1 | Middle zero |
| 6 | 1 1 0 | End zero |
| 7 | 1 1 0 | All one |

छन्दश्शास्त्रे

| आदौ | मध्ये | अन्त्ये | स्थितिः | नामानि |
|---|---|---|---|---|
| S | S | S | सर्वगुरुः | मगणः |
| S | S | I | अन्त्यलघुः | तगणः |
| S | I | S | मध्यलघुः | रगणः |
| S | I | I | आदिगुरुः | भगणः |
| I | S | S | आदिलघुः | यगणः |
| I | S | I | मध्यगुरुः | जगणः |
| I | I | S | अन्त्यगुरुः | सगणः |
| I | I | I | सर्वगुरुः | नगणः |

1)Octal representation


ISSN : 2320-740X

तथैव छन्दश्शास्त्रे उपजातिवृत्तमिति तत्तल्लजानां परिचितमेव भवति इन्द्रवज्रोपेन्द्रवज्रवृत्तयोः चतुर्दशधा विन्यासकरणमेव उपजातिरिति । आङ्लभाषायां permutation combination इति नाम्ना प्रसिद्धिः अस्य अस्ति । वृत्तरत्नाकरे लक्षणं तस्याः इत्थं वर्तते ।

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इति ।

| छन्दश्शास्त्रे (उपजातिवृत्तभेदाः) | | |
|---|---|---|
| क्र,सं | नामानि | पा१ पा२ पा३ पा४ |
| १ | उपेन्द्रवज्रा | उ उ उ उ |
| २ | जाया | उ उ उ इ |
| ३ | प्रेमा | उ उ इ उ |
| ४ | माला | उ उ इ इ |
| ५ | ऋद्धिः | उ इ उ उ |
| ६ | हंसी | उ इ उ इ |
| ७ | आर्द्रा | उ इ इ उ |
| ८ | कीर्तिः | उ इ इ इ |
| ९ | बुद्धिः | इ उ उ उ |
| १० | बाला | इ उ उ इ |
| ११ | भद्रा | इ उ इ उ |
| १२ | वाणी | इ उ इ इ |
| १३ | रामा | इ इ उ उ |
| १४ | शाला | इ इ उ इ |
| १५ | माया | इ इ इ उ |
| १६ | इन्द्रवज्रा | इ इ इ इ |

| Digital Electronics (Binary coded decimals) | | | | |
|---|---|---|---|---|
| $I_3$ | $I_2$ | $I_1$ | $I_0$ | Hexadecimal Representation |
| 0 | 0 | 0 | 0 | 0 |
| 0 | 0 | 0 | 1 | 1 |
| 0 | 0 | 1 | 0 | 2 |
| 0 | 0 | 1 | 1 | 3 |
| 0 | 1 | 0 | 0 | 4 |
| 0 | 1 | 0 | 1 | 5 |
| 0 | 1 | 1 | 0 | 6 |
| 0 | 1 | 1 | 1 | 7 |
| 1 | 0 | 0 | 0 | 8 |
| 1 | 0 | 0 | 1 | 9 |
| 1 | 0 | 1 | 0 | A |
| 1 | 0 | 1 | 1 | B |
| 1 | 1 | 0 | 0 | C |
| 1 | 1 | 0 | 1 | D |
| 1 | 1 | 1 | 0 | E |
| 1 | 1 | 1 | 1 | F |


ISSN : 2320-740X

अत्र स्थानद्वये binary क्रमः आश्रित इति हेतोः q= 2 परिगणयामः । चत्वारि स्थानानि इति हेतोः p= 4 $q^p$= $2^4$ = 16 per mutational combinations लभ्यन्ते ।

Digital electronics शाखायां चत्वारि input's दीयन्ते चेत् Binary इति हेतोः तस्य चतुर्दशधा प्रकाराः भवन्ति । तदेव Binary coded decimal इति प्रसिद्धम् अस्ति ।

जयदेवेनापि अस्य रचनाविषये क्रमो दर्शितः ।

**पादेन पादत्रितयेन चाष्टावर्धार्धयोगेन षडेव भेदाः इतीन्द्रमालाखिलपूर्वमिश्राः प्रमाणतः षोडशभेदभिन्नाः** ॥ इति ।

किञ्च

**एकत्रपादे चरणद्वये वा पादत्रये वान्यतरः स्थितश्चेत् । तयोरिहान्यत्र तदोहनीया चतुर्दशोक्ता उपजातिभेदाः ॥**

उपजातिविन्यासावगमविषये अयञ्च श्लोको वाराणसीनगरे शिलाक्षरैर्मुद्रिते कस्मिंश्चिद्वृत्तरत्नाकरपुस्तके दृश्यते । आर्याः! वयं केवलम् अस्माकं अधीयमानानि शास्त्राणि एकया दृष्ट्या एकेन प्रकारेण अधीमहे नतु तच्छास्त्रस्य मूलतत्त्वानि परिष्कुर्वन्तः । सामान्यतस्सर्वशास्त्राणां मूलतत्त्वमेकमेव भवति । तच्च नानाप्रकारैः अभिव्यज्यते । एवमेव छन्दश्शास्त्रस्योपयोगः केवलं स्त्रीप्रकृत्यादीनां वर्णनार्थम् उत देवानां स्तवनार्थमेव न । अस्ति तत्राऽपि मूलं किञ्चन विज्ञानं । तच्छास्त्रीया शैली एव किल इदानीमस्माभिः यथोचितं Digital Electronics विज्ञानशाखायामवालोकि । विवेकानन्देनोक्तं स्मर्यते यत् "Every science had it's origin in India but was developed elsewhere " इति । अतो वयं भारतीयमूलं भारतीयं मान्यमान्यं तत्त्वं ज्ञात्वा आत्मानं धन्यं मन्यामहे ।

***

# काव्यलक्षणार्थः ग्रन्थकृत्परिचयपूर्वकमनुवादश्च

**स्वर्णदत्तः ए. बि.**

**आचार्यप्रथमवर्षम्**

१.तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

–मम्मटाचार्यः काव्यप्रकाशे ।

अर्थः– श्रुतिदुष्टादयः ये दोषाः सन्ति तादृशदोषैः रहितौ यौ शब्दार्थौ, माधुर्यौजःप्रसादाः ये गुणाः सन्ति तादृशगुणैः सहितौ यौ शब्दार्थौ, अनुप्रासोपमादयः ये अलङ्काराः सन्ति तादृशस्फुटैरस्फुटैर्वा अलङ्कारैः सहितौ तादृशशब्दार्थौ काव्यमित्याशयः ।

२.अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम् ।

–हेमचन्द्रः काव्यानुशासने ।


ISSN : 2320-740X

३.शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यम् ।

–वाग्भटाचार्यः काव्यानुशासने ।

अर्थः–"प्रायः" इति पदेन अलङ्काराणाम् अनियतधर्मत्त्वं सूचितम् ।

४. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ।

–दण्डी काव्यादर्शे ।

अर्थः– वक्तुमिष्ट अर्थः तज्ज्ञापकं सुप्तिङन्तपदम् उभयं काव्यशरीरं भवति ।

५. इष्टार्थव्यवच्छिन्ना पदावली काव्यम् ।

–कान्तिचन्द्रभट्टाचार्यः काव्यदीपिकायाम् ।

६. शब्दार्थौ सहितौ काव्यम् ।

–भामहोक्तिः काव्यालङ्कारे ।

अर्थः– यत्र दोषाभावगुणालङ्काररीतिरसादिभिः परस्परं शोभां वर्धयन्तौ सहितभावेनावस्थितौ च शब्दार्थौ भवतः तत् काव्यम् इत्यर्थः ।

७. शब्दार्थौ काव्यम् ।

–रुद्रटः काव्यालङ्कारे ।

अर्थः– शब्दश्च अर्थश्च शब्दार्थौ । अनेकविध वर्णानां समुदाय एव शब्दः, तस्मात् शब्दात् समुद्भूतः यः सोऽर्थः इति। एतादृशशब्दार्थौ सम्मिलितौ यत्र तदेव काव्यम् ।

८. काव्यं स्फुटवदलङ्कारं गुणवद् दोषवर्जितम् ।

–व्यासः अग्निपुराणे ।

अर्थः– अनुप्रासोपमादिस्फुटालङ्कारैः सहितम्, माधुर्यौजःप्रसादाख्यैः गुणैः सहितम्, श्रुतिदुष्टादिभिः दोषैः वर्जितं यत् अलौकिकं तत्त्वं तदेव काव्यम् ।

०९.काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते । भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ॥

–वामनोक्तिः काव्यालङ्कारसूत्रवृत्तौ ।

अर्थः– "काव्यम्" इत्ययं शब्दः माधुर्यौजःप्रसादगुणैः,अनुप्रासोपमाद्यलङ्कारैश्च सुसंस्कृतः सन् शब्दार्थयोः द्वयोरपि बोधकः भवतु ।

लक्षणया शब्दार्थयोः द्वयोः बोधकत्त्वेनैवात्र गृहितः काव्यम् इत्ययं शब्दः ।

१०.सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ ।

–धर्मसूरिः साहित्यरत्नाकरे ।



ISSN : 2320-740X

अर्थः– माधुर्यौजःप्रसादादिगुणैः सहितौ यौ शब्दार्थौ, अनुप्रासोपमाद्यलङ्कारैः सहितौ यौ शब्दार्थौ, श्रुतिदुष्टादिदोषैः वर्जितौ यौ शब्दार्थौ तदेव काव्यमित्यर्थः ।

११.रसालङ्कारयुक्तं सुखविशेषसाधनं काव्यम् ।

–केशवमिश्रः अलङ्कारशेखरे ।

अर्थः– शृङ्गारादिरसैः अनुप्रासोपमाद्यलङ्कारैः युक्तं यत् सुखविशेषस्य साधनं तदेव काव्यव्यपदेशभाक् इति आशयः।

१२. रमणीयार्थप्रतिपादकः शब्दः काव्यम् ।

–जगन्नाथः रसगङ्गाधरे ।

अर्थः– अलौकिकानन्दोत्पादकः प्रतिपाद्यः योऽर्थः तादृशार्थस्य प्रतिपादकः यः शब्दः स एव काव्यम् ।

१३.शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभिधायि ध्वनिः ।

–विद्याधरः एकावल्याम् ।

अर्थः– यत्र काव्यस्य शब्दार्थौ शरीरम् आत्मस्थाने स्थितं किञ्चन "ध्वनिः" इति तत्वं वर्तते तत्र विद्वद्भिः काव्यमिति व्यवहारः कृतः ।

१४. तत्र निर्दोषशब्दार्थं गुणवत्त्वे सति स्फुटम् ।

–अच्युतरायः साहित्यसारे ।

अर्थः– यत्र श्रुतिदुष्टादिदोषैः रहितं स्फुटञ्च शब्दार्थम्, माधुर्यौजःप्रसादगुणवच्च तत्र काव्यव्यवहारः इत्याशयः ।

१५. साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥

–वाग्भटः(द्वितीयः) वाग्भटालङ्कारे ।

अर्थः– रमणीयार्थप्रतिपादकशब्दानां समुच्चयेन समन्वितम्, माधुर्यौजप्रसादैः गुणैः अनुप्रासोपमाद्यलङ्कारैश्च भूषितम्, स्पष्टरूपेण वैदर्भीगौडीपाञ्चालीरीतिभिः युक्तम्, शृङ्गारादिभिः रसैः सहितमेव काव्यम् इत्याशयः ।

***


ISSN : 2320-740X

# कर्माजीवविचारः

**गणेशकृष्ण भट्टः**

आचार्यप्रथमवर्षम्

नैतदविदितं सर्वेषां यत् मनुष्यजीवने अर्थः प्रधानतम इति । तमर्थमर्जयितुं कः पन्थाः स्वानुकूलो भवेदिति जिज्ञासन्ते सर्वेऽपि मानवाः । तस्यार्थस्य प्राप्तौ बहून्यपि मूलानि भवितुमर्हन्ति । सर्वमिदं जातकमाश्रित्य कथं विचिन्त्यमिति निरूपयितुं कर्माजीवविचारः उपनिबद्धः होराग्रन्थेषु ।

तत्रादौ दशमस्थग्रहैः अर्थागममूलानि निरूप्यन्ते । तद्यथा– **"अर्थाप्तिः पितृजननीसपत्नमित्रभ्रातृस्त्रीभृतकजनात् दिवाकराद्यैः । होरेन्द्वोर्दशमगतैर्विकल्पनीया"** इति ।

अर्थात् लग्नात् चन्द्रात् वा दशमगतैः रव्यादिभिः ग्रहैः क्रमेण पितृतः, मातृतः, शत्रोः, मित्रात्, सोदरात्, स्त्रियाः, भृत्यजनाच्च अर्थाप्तिः भवतीति वक्तव्यम् । यदि लग्नात् चन्द्रात् सूर्यात् दशमे यः कोऽपि नास्ति चेत् तर्हि दशमाधिपस्य नवांशराशिवशात् अर्थाप्तिः वक्तव्या ।

ततः वृत्तिं विधत्ते– **"भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या"** इति । अस्यार्थः लग्नरविचन्द्रेभ्यः दशमाधिपतेः यो नवांशः तत्पतिः अर्कांशे तृणकनकोर्णभेषजाद्यैः इति या वृत्तिः कथ्यते सा आदेष्टव्या । तदिदम्– अर्कांशे तृणकनकोर्णभेषजनखदन्तचर्मक्रौर्याध्र्वभूपाहवैः, चन्द्रेण कृषिजलजाङ्गनाश्रय इक्षुक्षीरविकारवस्त्रकुसुमक्रीडातिलान्नश्रमैः, कुजेन धात्वग्निप्रहरणसाहसारिविमर्दभूपसहजक्षित्यादिभिः, बुधेन लिपिगणितादिकाव्यशिल्पदौत्यसुहृद्गुरुद्विजयुक्तिद्रव्यसुवर्णवेसरमहीहास्योपासनादिभिः च अर्थाप्तिः भवति इति वक्तव्यम् । एवमेव गुरोः नवांशे सति द्विजविबुधादिधर्ममाहात्म्योद्यममन्त्रनीतिनृपतिस्वाध्याययन्त्रैः, शुक्रांशे सति मणिरजतादि – गोमहिषीसुरभिद्रव्यान्नपानाम्बरस्त्रीरत्नद्युतिमन्मथोपकरणक्रयविक्रयैः, शनिना श्रमवधभारनीचशिल्पखरोष्ट्रपक्षिमहिषीवृद्धाङ्गनैः इति । एवं वृत्तिरभिधाय कर्मेशाध्युशितकर्मसिद्धिरिति उपसंह्रियते । कर्मेशाध्युशितनवांशकर्मसिद्धिरिति उक्तौ विशेषस्तावत्– दशमस्थः, दशमद्रष्टा, दशमराशिः इत्येतान् सर्वान् अप्याधृत्य संवादचिन्तनं विधाय दैवज्ञेन वृत्तिरादेष्टव्या ।

अन्ते धनागमकालज्ञानमुच्यते– यदि लग्नात् चन्द्रात् सूर्यात् वा दशमभावगतः राश्यधिपः मित्रग्रहे मित्रनवांशे वा स्थितः चेत् मित्रेण धनागमः, तथा शत्रुराशिः शत्रुनवांशगतः चेत् शत्रुतः एव धनागमः । यदि स्वगृहे स्वांशे वा भवति तदा स्वार्जितं धनम् । पुनः स्वोच्चगतः रविः यदा दशमाधिपतिः भवति तर्हि स्वोपार्जितधनागमः भवति । यः कोऽपि बलयुक्तः शुभग्रहः एकादशे, लग्ने, द्वितीये वा स्थिते सति बहुभिः मार्गैः धनागमः भवति ।

इत्थं ग्रहाः सबलाश्चेदेव स्वीयां वृत्तिं प्रदास्यन्ति । यदि ग्रहाः निर्बलाः तर्हि तदुक्तानि फलानि स्वप्नचिन्तास्वेव अनुभूयन्ते न तु निजजीवने इति शास्त्रराद्धान्तः । तच्चोक्तं बृहज्जातके **"परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः"** इति । एवं ईदृशे प्रसङ्गे मनुष्यः वृत्तिहीनः एव जीवति ।



ISSN : 2320-740X

# वेदोक्तकर्मणां फलसाधनत्वम्

**राजेश हेगडे**

आचार्यप्रथमवर्षम्

वेदकर्तृत्वेन ईश्वरस्य सिद्धिं चिकीर्षन्ति नैय्यायिकाः । अत्र वेदवाक्यानाम् अनृत–विसंवाद–व्याघातादिदोषैः कलुषितत्वात् सुतराम् अप्रामाण्यम् इति पूर्वपक्षमुपस्थापयताम् अयमाशयः ।

'चित्रया यजेत पशुकामः' 'पुत्रकामः पुत्रेष्ट्या यजेते'ति श्रूयते । न चेष्ट्यनन्तरं पुत्रपश्वादिफलमुपलभ्यते, तस्मादसत्याः चित्रादिचोदनाः । विसंवादोऽपि क्वचिद्दृश्यते । तथा हि – प्रमीते यजमाने पात्रचयाख्यं कर्मोपदिश्यैवमादिदेश वेदः, 'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गलोकं याती'ति । तत्र 'एष' इति तावदात्मनो निर्देशः क्लिष्ट एव परोक्षत्वात्, स्फ्यकपालादियज्ञायुधसम्बन्धाभावाच्च । नापि कायस्य निर्देशः सम्भवति । यतो हि स न स्वर्गलोकं याति, तद्विपरीतभस्मीभावोपलम्भादिति विसंवादः । व्याघातोऽपि क्वचिद् दृश्यते । तथा हि — 'उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्यमि'ति होमकालत्रयमपि विधाय निन्दाऽर्थवादैः श्रुतिरेव निषेधति, 'श्यामो वा अस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलो वा अस्याहुतिमभ्यवहरति योऽनुदिते जुहोति, श्यामशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति' इति ।

**अत्र समाधिमाह सूत्रकारो महर्षिगौतमः** — 'न कर्मकर्तृसाधनवैगुण्यादिति' (न्या.सूत्रम् १.३.५७) अयमाशयः – वेदेषु अप्रामाण्यसाधकमनृतत्त्व परैरुक्तम्, अनृतत्त्वस्य च साधको हेतुः फलादर्शनम् इति । एतच्चानैकान्तिकम्, अन्यथाऽपि फलादर्शनोपपत्तेः । किं वेदस्यासत्यार्थत्वादत्र फलादर्शनमुत कर्त्रादिवैगुण्यादित्यत्र न विशेषहेतुरस्ति । ननु न कदाचिदपि कर्मसमनन्तरमेव फलमुपलब्धमिति तदनृतत्त्वमेव फलादर्शनकारणम्, न कारणवैगुण्यमिति । तदयुक्तम्, अविगुणाय कारीर्या प्रयुक्तायां सद्य एव वृष्टेर्दर्शनात् । पुत्रादिः ऐहिकमपि फलं वस्तुस्वभावपर्यालोचनयैव न सद्यो भवितुमर्हति । न हि नभसस्तदानीमेव वृष्टिरिव निपतति पुत्रः, स्त्रीपुंसंयोगकारणान्तरसव्यपेक्षत्वात्तदुत्पत्तेः । पश्वादिप्राप्तिस्तु कस्यचिदुत्तरकालेऽपि दृश्यते प्रतिग्रहादिना । तर्हि प्रतिग्रहाद्येव दृष्टं कारणमस्तु पश्वादेः, पुत्रस्य च स्त्रीपुंसंयोगः, किमिष्टेः कारणत्वकल्पनयेति । मैवं वोचः, सत्स्वपि च दृष्टेषु कारणेषु फलादर्शनात् इष्टिप्रयोगानन्तरं चैतद्दर्शनादिष्टिकृतं स्त्रीपुंसंयोगादिकारणत्वमिति निश्चीयते ।

यत्र पुनरविगुणेऽपि कर्मणि प्रयुज्यमाने कालान्तरेऽपि पुत्रपश्वादिफलं न दृश्यते, तत्र तीव्रं किमपि प्राक्तनं कर्म प्रतिबन्धकं कल्पनीयम् । यथोक्तम् 'फलति यदि न सर्वं तत्कदाचित्तदेव ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते' इति । कर्मादिवैगुण्यग्रहणमुपलक्षणार्थमृषिणा प्रयुक्तम् । न तु वेदस्याप्रामाण्यकल्पना साध्वी, साद्गुण्ये कर्मणः प्राचुर्येण फलदर्शनात् ।

अपि च चित्रातः पशवो भवन्तीत्येतावानेव शास्त्रार्थः, आनन्तर्ये तु न किञ्चित् प्रमाणमस्ति । तदयं प्रत्यक्षादिसंवाद आनन्तर्यविषयः चित्रादिचोदना त्वनिर्दिष्टकालविशेषविषयेति विषयभेदान्न सा तेन बाध्यते ।



ISSN : 2320-740X

यत्तु कर्मस्वभावपर्यालोचनया चित्रादेरनन्तरफलत्वमुक्तम् 'यत्कालं हि मर्दनं तत्कालं हि मर्दनसुख'मिति तदेतदत्यन्तमनभिज्ञस्याभिधानम् । विधिफलानां क्रियाफलतुल्यत्वानुपपत्तेः । इह, किञ्चिद्विधिफलं भवति किञ्चित् क्रियाफलम्। कृष्यादौ भूमिपाटवादि क्रियाफलम्, सस्यसम्पत्तिस्तु विधिफलम् । कः पुनः कृष्यादौ विधिः अस्ति ? वार्त्ताविद्यायां वृद्धोपदेशे वा कश्चिद्विधिः अस्ति, अन्वयव्यतिरेकौ वा तत्र विधिस्थानीयौ भविष्यतः । लोकेऽपि च 'वेतनकामः पचती'त्यादौ पाकक्रियाफलमोदनः, विधिफलं तु वेतनम् । तत्र क्रियाफलानामेवैष नियमो यत्क्रियानन्तरभावित्वम् । विधिफलानां तु वेतनादीनां नास्ति कालनियमः । इष्टावपि हविर्विकारादि क्रियाफलं सद्यो भवति ।

आयुर्वेदोपदिष्टानामप्यौषधविधीनां न क्रियावत्सद्य एव फलदर्शनम् । अपि तु फलापेक्षमेवेति न फलानन्तर्य्ये किञ्चित् प्रमाणम् ।

अपि चैहिकत्वं फलस्य तावता सेत्स्यति, न पुनः क्रियाफलवत्सद्यस्त्वम् । सन्ति चैहिकफलान्यपि कालान्तरसव्यपेक्षाणि कर्माणि यथा 'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे' इति । न तत्र पञ्चमवर्षे उपनीतमात्र एव माणवको ब्रह्मवर्चससम्पन्नो भवति, कालान्तरे तु भवतीति । एवं वीर्यकामादिष्वपि द्रष्टव्यम् । तस्माद्विधिफलानामानन्तर्यनियामाभावान्न तद्विसंवादो दोषाय । कालान्तरेऽपि यत्र फलादर्शनं तत्र क्रियावैगुण्यं कर्मान्तरप्रतिबन्धादि कारणमित्युक्तम् ।

तथा च त्रिविधं कर्म किञ्चिदैहिकफलमेव किञ्चिदनियतफलमेव किञ्चिदामुष्मिकफलमेव इति कल्पना ।

i. तत्र **कारीर्यादि तावदैहिकफलमेव** । तद्धि सकलजनपदसंतापकारिणि महत्यवग्रहे प्रस्तूयते । वृष्टिलक्षणं च तत्फलं स्वभावत एव सकललोकसाधारणम्, आसन्नतयैव तदभिलषणीयमिति सद्य एव भवितुमर्हति । वचनानि च तत्र तादृशान्येव दृश्यन्ते, 'यदि वर्षेत्तावत्यैवेष्टि समापयेद्यदि न वर्षेच्छ्वोभूते जुहुयादि'ति ।

ii. **आमुष्मिकफलं तु कर्म ज्योतिष्टोमादि**, फलस्वभावमहिम्नैव पारलौकिकं भवति ।

**'स्वर्गो निरूपमा प्रीतिर्देशो वा तद्विशेषणः । भोक्तुं नोभयथाऽप्येष देहेनानेन शक्यते ॥'**

iii. **चित्रादि त्वनियतफलं** कर्म । तत्फलस्य पश्चादेरिह वा परत्र वा लोके सम्भवात् । अवश्यं चैतदेवं विज्ञेयम्, तथा हि – अकृतचित्रायागानामपि इह जन्मनि पशवो दृश्यन्ते । ते परिदृश्यमानसेवाप्रतिग्रहादिकारणका एवेति कथ्यमाने कर्मनिमित्तत्वहानेः बृहस्पतिमतानुप्रवेशप्रसङ्गः । कर्मनिमित्तकत्वे तु तेषां पशूनामुपपादकं किं कर्मेति निरूपणीयम् । न हि ब्रह्मवर्चसादिफलात् कर्मणः पशवो निष्पद्यन्ते । चित्रा च पशुफलेह जन्मनि तैर्न कृतैव । पूर्वजन्मकृता तु तस्मिन्नेव जन्मनि फलं दत्तवती नियतैहिकफलाभ्युपगमादिति कुतः पशुसम्पत् । ननु गौतमवचनप्रामाण्यात्पूर्वकृतभुक्तशिष्टज्योतिष्टोमादिकर्मनिमित्तकः पशुलाभो भविष्यति । यथोक्तम् 'वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय पतन्तः शेषेण विशिष्टदेशश्रुतवृत्तवित्तादियुक्तं जन्म प्रतिपद्यन्ते' इति । नैतद्यथा श्रुतं बोद्धुं युक्तम्–


ISSN : 2320-740X

**न ह्यन्यफलकं कर्म दातुमीष्टे फलान्तरम् । साध्यसाधनभावो हि नियतः फलकर्मणाम् ॥**

तस्मात्समूहापेक्षाशेषवाचोयुक्तिर्व्याख्येया । बहूनि यानि कर्माणि वर्णिनो आश्रमिणश्च कृतवन्तः ततः कर्मसमूहाज्ज्योतिष्टोमादि फलं प्रेत्यनुभूयते । ततः शेषेण चित्रादिना कर्मणा विशिष्टं जन्म प्रतिपद्यन्ते इति । तस्मात्पूर्वजन्मकृतचित्रादिनिबन्धन इह जन्मनि पशुलाभो नाकर्मनिमित्तको, नान्यकर्मनिमित्तक इत्येवमनियतफलत्वाचित्रादेरिह जन्मनि फलादर्शनेऽपि नानृतत्वं तच्चोदनानाम्, जन्मान्तरे हि ता इष्टयः फलं दास्यन्तीति ।

***

# संस्कृते विज्ञानम्

**–मञ्जुनाथ भट्टः**

आचार्यप्रथमवर्षम्

आत्यन्तिकदुःखोच्छेदः संस्कृताध्ययनेन साध्यः इति सिध्दविषयं साधयितुं गमिष्यामश्चेत् सिध्दसाधनम्। अथापि संस्कृतप्रेम्णा किञ्चिदिव लिख्यते ।

विषयेस्मिन् अंशद्वयम्, संस्कृतं विज्ञानञ्चेति । संस्कृते यदस्ति तत्तु जगति प्रतिभाति । यतोहि यद्यज्जगति विज्ञानपदेन व्यवह्रियते, तेषां सर्वेषामपि मूलं संस्कृतमेव । भाषाविज्ञानं, भूविजानं, खगोलविज्ञानं, औषधविज्ञानं, पर्यावरणविज्ञानं, मनोविज्ञानं, समाजविज्ञानं, गृहविज्ञानं किं बहुना ब्रम्हाण्डस्य सृष्टेः रहस्यमपि ज्ञानदृष्ट्या अनुभवन्तः अस्मभ्यं दत्तवन्तः प्राक्तनमहर्षयः । संस्कृतभाषा एव एका वैज्ञानिकभाषा अस्ति । यतः अस्याम् भाषायां विद्यमानानां वेदानां परिपठनादेव पर्यावरणे जायमानानां तरङ्गाणां साहाय्येन शरीरिणां रुग्णादिपीडा परिहार्यते । तथा पर्यावरणस्य परिशुध्दिरपि अनेनैव जायते ।

वर्णोच्चारणविषये जगति कापि भाषा एतत्तुल्या नाविष्कृता । परा, पश्यन्ती, मध्यमा, वैखरी इति क्रमेण श्वासोदीरणं कृत्वा तत्तत्स्थानेषु अभिहतैः आभ्यन्तर–बाह्य–प्रयत्नादिभिः पुरस्कृतः वायुः वर्णानुत्पादयति इति वर्णोच्चारणविषयकं विज्ञानमत्रैव वरीवर्ति ।

प्रकृतेः परिरक्षणं कथमिति भाषायामस्यां विद्यमानेन आम्नायादिना अवगन्तुं शक्नुमः । रविचन्द्रयोः आगमनं भूमेः परिभ्रमणं तथा च अस्यां पृथिव्यां जायमानानामुपरि ग्रहाणां प्रभाव इत्येतत्सर्वमपि ज्यौतिश्शास्त्राध्ययनात् साधितमभूत् ।

अस्माकं पूर्वजाः कीदृशमाविष्कारं वैद्यविषये कृतवन्तः इत्यत्र सुश्रुतसंहिताध्ययनात् स्पष्टीभविष्यति । शस्त्रचिकित्सायाः विषयमपि तस्मादेव अवगच्छामः । नौकाशब्दस्य प्रयोगादेव जानीमः नौकाशास्त्रस्यापि विधयः अस्यां भाषायाम् आसन्निति । नौकारचनायाः चातुर्यं तत्कृते काष्ठानामुपयोगः किम्बहुना? तत्काले जलान्तर्गामिन्यः



ISSN : 2320-740X

नौका अपि आसन्निति वेदविमर्शकाणामभिमतम् । खगवत् खे गन्तुम् विमानस्याविष्कार अभूदिति पुष्पकविमानप्रकरणेन विद्मः ।

सात्विकाहारः, तामसाहारः इति भेदं परिगणय्य तयोः सेवनेन शरीरे उत्पत्स्यमानविकारेण कीदृशी मानसिकस्थितिः भवतीति अस्याः भाषायाः अध्ययनेन साध्यमित्यत्र न कापि संशीतिः । पञ्चकोशात्मकस्य शरीरस्य रचना कथं, पचनव्यवस्था कथं? इत्यपि अत्रैव निगदितम् ।

आत्मनः मनसा साकं सम्बन्धः, एवं आत्मनः शरीरेण सम्बन्धः, जीवात्मपरमात्मनोः सम्बन्धश्च, शरीरत्यागानन्तरम् आत्मनः गमनं, इत्यादयः कर्मसिद्धान्ताः अस्यां भाषायामेव सन्ति ।

राष्ट्रनिर्माणस्य, तथा समाजनिर्माणस्य विज्ञानमपि अर्थशास्त्रस्याध्ययनेन साध्यम् । वस्तुविषयकं ज्ञानदायकं ग्रहविज्ञानं संस्कृते वर्तते इति निश्चप्रचम् । नलन्दातक्षशिलयोः भस्मीभवनादनंतमवशिष्टानां वेदानां शास्त्राणाम् अध्ययनेन अवग्च्छामः तयोः विनाशात् पूर्वं कीदृशं विज्ञानं आसीत्...... इति ।

***

# प्राचीनं भूकम्पविज्ञानम्

**एन्. सुब्रह्मण्य भट्**

शिक्षाशास्त्री 'अ' विभागः

सामान्यतः सर्वदा सर्वावयवैः सम्पूर्णता प्रकृतिरित्युच्यते । विश्वस्य जगतः लक्षणभूतां प्रकृतिमत एव तन्नाम्ना व्यवहरन्ति विबुधाः। तस्यामेव न्यस्तदृष्टेः रसिकस्य अन्वेषकस्य साधकस्य वा सात्यन्तं विस्मयं जनयति यस्य विस्मयस्य तत्त्वान्वेषणायैते प्रवर्तन्ते । एवमेतादृशेषु विस्मयकरेषु विषयेषु कदाचित् दृश्यमानमिन्द्रधनुर्मनोहारि, सूर्यचन्द्रयोर्बिम्बेषु दृश्यमानाः विशिष्टाकृतयः, जलधरेषु दृश्यमानाः विविधाकाराः इत्यादयः दर्शकानां मनसि आनन्दमन्वेषकाणां चेतसि जिज्ञासाञ्च जनयन्ति । एवमेवैतादृशेषु घटनाविशेषेषु निर्घातभूकम्पादयः घोराः प्रकृतेः प्रकृतित्वं द्योतयन्तोऽपि तदङ्गानां विकृतिं जनयन्ति। तत्र भूकम्पविषयकं विश्लेषणमस्य लेखनीप्रसारस्य लक्ष्यम् ।

संस्कृतवाङ्मये गर्गादयः ऋषयः स्वाभिप्रायेण विषयेऽस्मिन् कृतविचाराः चेदपि तद्विचारसार सरलसम्प्राप्तये ज्योतिषशास्त्रस्य संहितास्कन्धः एव समग्रसामग्रीनिदानम् । तत्र वाराहीसंहितायां भूकम्पस्य कारणविषये अनेकेषामाचार्याणां मतानि चर्चितानि । तत्र कानिचन लक्ष्यन्ते ।

**भूकम्पकारणानि :–**

**ते श्वसन्ति यदा श्रान्ताः स वायुः श्वसितो महान् । वेगान्महीं चालयति भावाभावाय देहिनाम् ॥** इति गर्गः

चतसृषु दिक्षु नागाः पृथ्वीधारकाः तद्भारश्रान्ताः निश्वसन्ति । तेषां प्रबलः निश्वासपवन एव भूमौ निपतितः भुवं कम्पयतीति गर्गः ।


ISSN : 2320-740X

**वारुणस्योपरि पृथ्वी सशैलवनकानना । स्थिता जलजसत्वाश्च सक्षोभाश्चालयन्ति ताम् ।।** इति कश्यपः

समुद्रस्योपरि नौरिव प्लवमानां पृथ्वीं जलनिधिगताः सत्वाः सक्षोभाश्चालयन्ति येन भूः कम्पते । पुनश्च पराशरः अचलानामचलत्वनामहेतुकां कथां वर्णयन् भूकम्पकारणं व्याख्याति । सचलनैरचलैः यथायथमुत्पतद्भिः पीडिता वसुमती सृष्टिकर्तारं स्वकष्टं न्यवेदयत् । जगदादिकारकस्तु सचलनाचलानां पक्षकर्तनाय इन्द्रमादिशत् । इन्द्रोऽपि तद्वचनसाफल्यमकरोत्। तेन च भुवः शोकः विनष्टः, परमपि वाय्वग्निवरुणेन्द्राः भुवः कम्पनं कुर्युः भूवासिनां शुभाशुभफलसूचनायेति च भूर्विज्ञापिता । एतत्पराशरमतम् । तथा च वसिष्ठः अनिलेन हतः अनिलः नभसः भुव्यापतति, यश्च निर्घातः उच्यते स एव प्राबल्यात् भुवं कम्पयति, अत एव अनिलेन भूकम्पो जायते इति । एतेषु मतेषु वासिष्ठं काश्यपं च मतं प्रत्यक्षमिव भाति यद्यपि अर्वाचीनं चिन्तनं विभिन्नं विद्यते । परञ्च पुरातनं चिन्तनं पाराशरीयमतावलम्बितमिति भूकम्पप्रकारविभागीकरणप्रकारेण ज्ञायते ।

भूकम्पानां प्राङ्निमित्तानामाधारेण भूकम्पस्य विभागः चतुर्धा कृतः वायव्याग्नेयैन्द्रवारुणाः इति । एतेषां प्रकाराणां लक्षणनिमित्तपरिणामानां यथायोग्यविश्लेषणे प्रकृतमुपक्रम्यते ।

**वायव्यः भूकम्पः –** दिवसस्य पूर्वार्धे उत्तराफल्गुनीहस्तचित्रास्वातीपुनर्वसुमृगशिरोऽश्विनीति नक्षत्रसप्तके पृथिव्यां कम्पितायां सत्यां वायव्योऽयं भूकम्पः इति तद्विद्भिर्निरूप्यते । धूमव्याप्तदिग्दर्शनं, रजःक्षेपिद्रुममारणः समीरणः, शीतकरान्वित उष्णकरः एते च सङ्केताः महीचलनात् प्राक् सप्ताहाभ्यन्तरे प्रवर्तन्ते । अनेन भूकम्पनेन सस्यवनजलौषधीनां नाशः, शोफोन्मादज्वरकासव्याधीनां सम्भवः, वणिक्पीडा वेश्याशस्त्रभृत्वैद्यस्त्रीकविसंगीतज्ञशिल्पिजनानां पीडा परिणामतः सम्भवति।

**आग्नेयः भूकम्पः :–** दिनस्य द्वितीये भागे कृत्तिकाविशाखाभरणीमघापूर्वाभाद्रापूर्वाफाल्गुनीष्वेतेषु अन्यतमे भूकम्पे सति सह आग्नेयः । तत्र प्रदीप्ताकाशः, उल्कापातः, दिग्दाहः, मरुत्प्रेरितमरुत्सहायः– एतेषां सम्भवः प्राक्सप्ताहभवसङ्केतः । अस्य परिणामाः मेघनाशः, सलिलाशयसंक्षयः, भूपालवैरं, दद्रूविचर्चिकाज्वरविसर्पपाण्डुरोगपीडा, तेजस्विक्रुद्धजनानां क्लेशसम्भवश्चेति ।

**ऐन्द्रभूकम्पः :–** अभिजिच्छ्रवणधनिष्ठारोहिणीज्येष्ठोत्तराषाढानुराधानक्षत्रेष्वन्यतमे रात्र्याद्यर्धे भूकम्पने स ऐन्द्रः । सप्ताहात्प्राक् चलिताचलसमानाः पयोमुचो मेघाः गम्भीरविरावतडित्सारथयः दृश्यन्ते । अनेन भूकम्पेन विख्यातवंशनाशः, अतिसारकण्ठमुखककफरोगाः च परिणमन्ति ।

**वारुणभूकम्पः :–** रेवत्यार्द्राश्लेषामूलापूर्वाषाढोत्तराभाद्राशतभिशक्तारास्वन्यतमे रात्र्युत्तरार्धे भूकम्पने स वारुणः । अस्य प्राक्सप्ताहं नीलोत्पलालिभिन्नाञ्जनसशोभाः मधुरविरावभूयिष्टाः धाराङ्कुरवर्षिणः धूमयोनयः चिह्नानि भवन्ति । भूकम्पेनानेन अर्णवसरिदाश्रितजननाशः अतिवृष्टिश्च भवति । वैराभावरूपं शुभं परिणमते च ।


ISSN : 2320-740X

भूकम्पविषयकः प्राचीनाभिप्रायः दैवतनामपूर्वकोऽपि अकेवलतन्निष्ठः अपि च तदङ्कितवस्त्वपरपर्यायः साक्षादृषिभिः वेद्यः । तत्र पावनः शतद्वयम्, आग्नेयश्शतं दशाधिकं, वारुणः अशीत्युत्तरशतम्, ऐन्द्रः ततोऽप्यधिकं भुवं चालयतीति पुरातनमतं यथार्थवादिनां दृक्पथं विकासयति ।

***

# शुभकर्मणां कालविभागः

**श्रीहरि शंकर शर्मा बि**

शिक्षाशास्त्री 'अ' विभागः

ज्योतिषशास्त्रं कालविधानशास्त्रम् । अस्य प्रतिपाद्यविषयोऽपि काल एव । अर्थात् काल एवात्र स्वावयवेषु विभज्य उच्यते इति । ज्योतिषस्य सन्ति त्रयो मुख्यभागाः स्कन्धसंज्ञिताः सिद्धान्त–संहिता–होराख्याः । तत्र ग्रहाद्यवस्थितिबोधकः स्कन्धः सिद्धान्तः । ग्रहाणां सामुद्रिकप्रभावो येन ज्ञायते स संहितास्कन्धः । येन सः प्रभावो व्यक्तावन्विष्यते स होरास्कन्धः । एवं संहितास्कन्धे मुहूर्तविषयः अन्तर्भवति ।

संहिताकालेऽपि इदं दृश्यते यत् प्रत्येककर्मनिमित्तं शुभो मुहूर्तः आवश्यकः । शुभे मुहूर्ते कृतेन कर्मणा शुभं फलति तदन्यथा तद्विपरीतं भवतीति ।

**"कालः शुभक्रियायोग्यो मुहूर्त इति कथ्यते"**

कालस्य नवविधमानानि सन्ति । तानि

**"ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम् । सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥"**

तेषु मानवानां व्यावहारिकमानानि चत्वारि ।

**"चतुर्भिव्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः"**

एतेषु मानवानां नित्यशो व्यवहारो दृश्यते । आचार्य भास्करेणोऽक्तं यत् :–

**"वर्षायनर्तुयुगपूर्वकमत्र सौरात् मासस्तथा च तिथयस्तुहिनांशुमानात् ।**
**यत्कृच्छ्रसूतकचिकित्सितवासराद्यम् तत्सावनाच्च घटिकादिकमार्क्षमानात् ॥"**

तत्र सौरसावनचान्द्रनाक्षत्राः इति चतुर्विधदिनमाससंवत्सराः ।

**सावनं नाम – "सावनोऽर्कोदयैस्तथा"** । अर्थात् सूर्योदयद्वयान्तर्गतकालः सावनमेकं दिनम् । त्रिंशत्सावनदिनैः एकः सावनो मासः । द्वादश सावनमासाः सावनवर्षं भवति ।

**सौरमानम् – "संक्रान्त्या सौर उच्यते"** । सूर्यकेन्द्रबिन्दोः प्रथमराशिप्रवेशकालात् अन्यराशिप्रवेशकालं यावत् एकः सौरमासः। तस्य त्रिंशत्तमो भागः सौरदिनम् । द्वादश सौरमासाः सौरवर्षं भवति ।


ISSN : 2320-740X

**चान्द्रमानम् – "ऐन्दवस्तिथिभिः"** । चान्द्रो मासः तिथिभिः इत्युक्ते शुक्लपक्षप्रतिपदमारभ्य दर्शान्तावधिकाभिः त्रिंशत्संख्याभि तिथिभिः चान्द्रदिनं भवति । तत्तु सूर्यचन्द्रमसोः प्रतिद्वादशभागमितान्तरेण तुल्यं भवति ।

**नाक्षत्रमानम् – "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते"** । नक्षत्रमण्डलस्य एकं परिभ्रमणं यावता कालेन भवति तावत्प्रमाणं नाक्षत्रदिनं भवति । तत्त्रिंशता नाक्षत्राहोरात्राणां मासः । एवं द्वादशभिः मासैः नाक्षत्रं वर्षं भवति । चतुर्णां कालमानानां दिनानि एवमुक्तानि ।

**"सौरो बृहस्पतिश्चैव नाक्षत्रः चान्द्रसावनौ । क्रमान्मातुलपातालवराङ्गीविमलाऽतुला ॥"**

सौरस्य ३६५ दिनानि, नाक्षत्रं ३२४ दिनानि, चान्द्रस्य ३५४ दिनानि, सावनस्य ३६० दिननि भवन्ति ।

**"केचिन्नाक्षत्रमासं तु वदन्ति शशिमण्डलात्" इति ।**

नाक्षत्रदिनैः त्रिंशद्भिः एको नाक्षत्रमासः इत्युच्यते । केचित् शशिमण्डलात् नाक्षत्रमासं वदन्ति । चन्द्रस्य द्वादशराशिपरिवर्तनकालः शशिमण्डलः । अश्विन्यदिरेवत्यन्तसप्तविंशतिः नक्षत्रगतिकलात्मको नाक्षत्रमासः इत्यर्थः। एषः नाक्षत्रमासः एव इदानीं सद्भिः अङ्गीक्रियते न तु पूर्वोक्तः त्रिंशद्दिनात्मकः । एवं चतुर्विधदिनमाससंवत्सरप्रमाणानि अत्रोक्तानि । तत्तत्कर्मसु तत्र तत्रोक्ताः दिनमाससंवत्सराः ग्राह्याः ।

**"सावनः सम्मतः कालो व्रतसीमन्तपुंसवे । चौळोपनीत्योः सौरोऽपि चान्द्रोऽप्यापदि भोजने ॥"**

व्रतेषु इत्युक्ते संवत्सरव्रतगोदानव्रतादिषु । सीमन्तपुंसवे इत्युक्ते गर्भरक्षा, पुंसवनम् । तृतीये मासे पुंसवनम्, चतुर्थे मासे सीमन्तः, अष्टमे मासे विष्णुबलिः इत्यादिषु संस्कारोक्तमासगणने सावनमानेनैव मासः कल्पनीयः ।

**"गर्भहोमेषु सर्वेषु सावनो मास उच्यते"**

गर्भात् पञ्चमे अब्दे चौळम्, सप्तमे अब्दे उपनयनम् इत्यादौ सावनेन सौरमानेन वा ग्राह्यः ।

**"सौरो वा सावनो वाऽब्दश्चौळादौ सावनो व्रते"**

बालानाम् भोजनम् अन्नप्रदानं वा षष्ठे अष्टमे वा मासि कर्तव्यम् । तत्र आपदि इत्युक्ते चान्द्रमानेन, अपि शब्देन सौरसावनमासौ ग्राह्यौ भवतः । एवं चान्द्र–सौर–सावनमासेषु वा अन्नप्राशनं कार्यम् ।

**"मासोऽत्र सावनस्त्विष्टश्चान्द्रोऽप्यत्रापदिष्यते सौरोऽपि मुख्य उदितः"**

तत्रापि सावनमासः इष्टः, सौरमासः ग्राह्यः, तथा चान्द्रमासः मध्यम इति उच्यते ।

**"अन्त्येऽहस्त्रयमाद्ययोश्चरमयोर्दिक्पञ्चनाडीस्त्यजेत्"**

तत्रापि सौरचान्द्रयोः अन्त्ये अहस्त्रयम्, सावननाक्षत्रमासयोः अन्त्ये क्रमात् दिक् (१०), पञ्च नाड्यः शुभकार्ये त्यजेत् ।

अत्रिसंहितायाम् :– **"अभिषेके तु नाक्षत्रं सावनं जननादिषु । पित्र्यै चान्द्रमसं शस्तं सौरं पूर्ते प्रशस्यते ॥"**

इति स्पष्टं उक्तं वर्तते ।

**सहायकग्रन्थसूची :–** मुहूर्तपदवी, मुहूर्तमाधवी, सूर्यसिद्धान्तः ।



ISSN : 2320-740X

# योगशास्त्रोक्तसमाधिविचारः

सन्ग्रहः

**कृष्णमूर्ति हेगडे**

शिक्षाशास्त्री अ विभागः

"योगः समाधिः" इति भाष्यात् योगशब्दः युज् समाधौ इत्यस्मात् धातोः उत्पन्नः समाध्यर्थकः । अत्र युजिर् योगे इति संयोगार्थकः योगशब्दः नाभिप्रेतः । सम्, आङ्-पूर्वक डुधाञ् धारणपोषणयोः इत्यस्मात् धातोः "उपसर्गे गोः किः" इति सूत्रात् क्विप् प्रत्यये प्राप्ते समाधिः इति रूपम् सिध्यति । "योगश्चित्तवृत्तिनिरोधः" इति सूत्रात् चित्तवृत्तिनिरोधः समाधिः इति ज्ञायते । सर्वासु अपि चित्तभूमिषु कथंचित् चित्तवृत्तिनिरोधसंभवेऽपि समाधिस्तु न सर्वावस्थायी । तथाहि क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुध्दमिति पञ्च चित्तभूमयः । तत्र सर्वदा रजोगुणेन विषयेषु क्षिप्यमाणमत्यन्तमस्थिरं क्षिप्तम् । तमोगुण समुद्रेकात् निद्रावृत्तिवत् जडं मूढम् । अस्थैर्यबहुलस्य चित्तस्य कादाचित्कस्थैर्यं विक्षिप्तम् । निवातस्थदीपवत् अचलमेकाग्रम् । सकलवृत्तिकं संस्कारमात्रशेषं निरुध्दम् । तत्र क्षिप्तमूढावस्थयोः परस्परापेक्षया वृत्तिनिरोधे सत्यपि पारम्पर्येण निःश्रेयससाधनहेतुत्वाभावत् तद्विरोधित्वाच्च न तयोः योगत्वम् । विक्षिप्तावस्थायां विद्यमानमपि कादाचित्कस्थैर्यम् विक्षेपोपसर्जनीभूतत्वात् न तस्य योगत्वम्। एकाग्रनिरुध्दाख्ये अवस्थाद्वये चित्तस्य यः धर्मः सः योगः समाधिः इत्युच्यते । समाधिश्चायं व्दिविधः संप्रज्ञातः असंप्रज्ञातश्चेति। तत्र संप्रज्ञातसमाधौ इतरासाम् चित्तवृत्तीनां निरोधेऽपि यां चित्तवृत्तिमाश्रित्य इतरासाम् चित्तवृत्तीनां निरोधः जातः सा सात्विकावृत्तिरेका वर्तते, वृत्तेः सात्विकत्वं एवं ज्ञातव्यम् प्रकाश-प्रवृत्ति-स्थिति धर्मकत्वात् चित्तं त्रिगुणात्मकम् । तस्य सत्वगुणप्राधान्येऽपि रजस्तमसोः संबन्धात् ज्ञानमनुत्पाद्य ऐश्वर्यादि विषयासक्तं भवति । तदेव चित्तं तमोगुण संबन्धात् अधर्माज्ञान-अवैराग्य-अनैश्वर्याभिमुखं तिष्ठति । तमोगुणकृतावरणस्य नाशे चित्तं धर्मज्ञानविरागैश्वर्याभिमुखम् भवति । यदा तु चित्तं रजोलेशमलतः निर्मुक्तं प्रकृतिपुरुषविवेकख्यातिं लभते । तदेव संप्रज्ञातसमाधिरित्युच्यते । अयमेव संप्रज्ञातः, सबीजः, सविकल्पकसमाधिरित्युच्यते । अस्यामवस्थायां विवेकख्यातिरूपसात्विकवृत्तेः सत्वेऽपि इतरवृत्तीनां निरुध्दत्वात्, अयं चित्तवृत्तिनिरोधाख्यः समाधिः योगशब्दवाच्यो भवति । अस्य संप्रज्ञातसमाधेः संग्रहार्थमेव "योगः चित्तवृत्तिनिरोधः" इति सूत्रे सर्वचित्तवृत्तिनिरोधः इत्यनुक्त्वा चित्तवृत्तिनिरोधः इत्यभिहितम् । अयं च संप्रज्ञातसमाधिः वितर्कानुगतः, विचारनुगतः, आनन्दानुगतः, अस्मितानुगतश्चेति चतुर्विधः । तत्र चित्तस्य चतुर्भुजादिस्थूलरुपं यत्र ध्येयं सः वितर्कानुगतः । पञ्चतन्मात्रादि सूक्ष्मविषयकः विचारानुगतः । यत्र स्थूलविषयगतचित्तस्य आह्लादः आनन्दानुगतः । बुध्दिचैतन्ययोः ऐक्यमिव यदा ध्यायते तदा अस्मितानुगतः इति सालंबनसमाधयः । सात्विकवृत्तिसहितानां इतरासां चित्तवृत्तीनां निरोधे असंप्रज्ञातसमाधिः सिध्यति। सात्विकवृत्तेः जडान्तःकरणपरिणामरूपत्वात् सा न चेतनस्य धर्मः अतः पुरुषेण स्वस्वरूपान्तर्गता इयमपि वृत्तिः निरोध्दव्या।



ISSN : 2320-740X

अयं समाधिः पतञ्जलिना एवं सूत्रितं "विराम प्रत्ययाभ्यासपूर्वःसंस्कारशेषोऽन्यः" । तस्मिन्नपि निरोधे सिध्दे संस्कारमात्रेण चित्तस्य अवस्थानं असंप्रज्ञातसमाधिः निर्बीजः निर्विकल्पकश्च समाधिः इत्युच्यते । एवमेकाग्रनिरुध्दाख्यचित्तभूम्योः चित्तस्य यः धर्मः क्रमेण संप्रज्ञातः, असम्प्रज्ञातश्च समाधिरिति सिध्दम् ।

***

# ईश्वरस्य अशरीरित्वम्

**वाणी एम् हेगडे**

शास्त्री–तृतीयवर्षम्

जगन्निमातृपुरुषधौरेयस्य ईश्वरस्य सद्भावे विवदन्ते बहवः । ईश्वरोऽस्तीत्यत्र प्रमाणमेव नास्तीति पूर्वपक्षः । तथा च दर्शयति – न हि ईश्वरः अस्तीत्यत्र बाह्य प्रत्यक्षं प्रमाणमरूपिद्रव्यत्वेन बाह्यप्रत्यक्षाविषयत्वात् । नापि मानसं, परात्मनः परेण मनसा प्रत्यक्षवारणायात्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयात्ममनः संयोगत्वेन हेतुत्वस्यावश्यकतया ईश्वरे तस्याभावात् । नाप्युपमानम्, ईश्वरसदृशपुरुषाभावात् । न च “द्यावाभूमी जनयन्” इत्यादिश्रुतिरेव प्रमाणम्, श्रुतीनाम् ईश्वरोच्चरितत्वेन प्रामाण्यादीश्वरसन्देहे श्रुतिप्रामाण्यस्यापि संदिग्धत्वात् । तस्मादीश्वरः शशविषाणायते इति ।

सिद्धान्तस्तु अनुमान प्रमाणेन ईश्वरसिद्धिः । तथा च अनुमानम् – “क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात्, घटवत्” इति । अनेन क्षित्यङ्कुरादौ कर्तृजन्यत्वं सिद्धम् । अत्र कर्तृत्वं च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वम्। परमाणुरूपोपादानविषयकप्रत्यक्षज्ञानं, ‘परमाणुद्वयेन द्व्यणुकं साधयामीति’ द्व्यणुकविषयिणी चिकीर्षा, परमाणुविषयिणी कृतिश्च अस्मदादीनां न संभवतीति अस्मदतिरिक्तस्यैव कर्तृत्वं सिद्ध्यति । स एव ईश्वरः इत्यभिधीयते ।

ननु “क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशादिवत्” इति प्रत्यनुमानं संभवति । तथा च सिद्धान्तिना उक्तानुमानसत्प्रतिपक्षदोषकबलितम् इति चेत् न, अप्रयोजकत्वात् । न्यायनये तु कर्तृत्वेन कार्यत्वेन कार्यकारणभावः एवानुकूलस्तर्कः ।

ननु घटत्वावच्छिन्नं प्रति कुलालादिचेष्टा कारणं, पटत्वावच्छिन्नं प्रति कुविन्दादिचेष्टा कारणम् । इत्थं च कुलालादिचेष्टासत्त्वे घटसत्त्वम्, कुलालादिचेष्टाभावे घटाभावः इति अन्वयव्यतिरेकाभ्यां चेष्टायाः अपि कारणत्वं सिद्ध्यति । एवमेव अङ्कुराद्युत्पादत्वावच्छिन्नं प्रति ईश्वरीयचेष्टा कारणम् । चेष्टा तावत् शरीरनिष्ठा भवति, तथा च चेष्टाश्रयत्वेन ईश्वरस्य नित्यं शरीरमपि सिद्ध्येत् इति चेत्, न चेष्टा इष्टानिष्टप्राप्तिपरिहारानुकूलक्रिया ।

एतादृशप्राप्तिपरिहारानुकूलक्रियात्वेन रूपेण कार्यं प्रति हेतुत्वं वक्तव्यम् । तच्च न स्वीक्रियते तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वावच्छिन्नत्वेनैव हेतुत्वात् तत्र चेष्टात्वेन हेतुत्वे गौरवात् । अतः



ISSN : 2320-740X

चेष्टाश्रयत्वेन शरीरमपि न सिद्ध्यति। एवं च चेष्टाश्रयत्वेन नित्यशरीरमपि सिद्ध्येत् इति या आपत्तिः सा वारिता भवति ।

ननु ईश्वरः कर्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्तीति चेत् – ईश्वरसिद्ध्यसिद्धिभ्यां व्याघातः । तदुदितमुदयनेन –

**आगमादेः प्रमाणत्वे बाधनादिनिषेधनम् । आभासत्वे तु सैव स्यादाश्रयसिद्धिरुद्धता ॥** इति ॥

(न्या.कु.३१ पू ) इति । श्रुतेः प्रामाण्यस्वीकारे ईश्वरः शरीरी कर्तृत्वात् कुलालवत् इत्यनुमाने पक्षप्रसिद्धिसम्भवेऽपि 'अपाणिपादो जवनो ग्रहीता' इत्यादिश्रुत्या बाधो दुर्वारः । श्रुतिप्रामाण्यास्वीकारे तु अस्मिन् अनुमाने पक्षाप्रसिद्ध्या आश्रयासिद्धिदोषो दुष्परिहरः ।

आचार्याः नित्यशरीरसिद्धिमङ्गीकुर्वन्ति । चेष्टात्वेन रूपेणैव क्रियायाः हेतुत्वमस्तु चेष्टाश्रयत्वेन ईश्वरस्य किञ्चित् शरीरमपि अस्तु । परन्तु अतिरिक्तम् ईश्वरस्य शरीरमिति न स्वीक्रियते अपि तु विद्यमानानां परमाणूनां समुदाय एव शरीरमिति स्वीक्रियते । तत्रैव चेष्टा वर्तते, तेन च कार्यं जायते । ईश्वरस्य कृत्या काचित् चेष्टा जायते । क्रियया परमाणुभिः तत् तत् द्व्यणुकं, तेन त्र्यणुकमित्यादि कार्यमुत्पद्यते इति, चेष्टायाः कार्यसामान्यं प्रति हेतुत्वमुपपद्यते ।

ननु ईश्वरकृतिजन्या क्रिया परमाणौ अस्तु, परन्तु सा चेष्टा कथमिति चेत्, न परमाणु क्रियायां चेष्टात्वाजातिविशेषः कल्प्यते । इत्थं च अत्र चेष्टाश्रयत्वं शरीरस्य लक्षणमिति स्वीक्रियते । न तु अन्त्यावयविवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वमिति । यतो हि परमाणुस्तावत् अन्त्यावयवी न भवति, अपि तु आरम्भावयवः एव । दर्शितशरीरलक्षणे अन्त्यावयवि इति अनिवेशे तु न परमाणूनां शरीरत्वानुपपत्तिः । शरीरलक्षणं चेष्टावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्युच्यते चेत्, परमाणोः अपि शरीरत्त्वनिर्वाहः सम्भवतीति आचार्याणामभिप्रायः।

अत्र विचार्यते– अनन्तपरमाणूनां शरीरत्वकल्पने गौरवात् अतिरिक्त किञ्चिदेकं शरीरस्वीकारे लाघवं खल्विति । यद्यतिरिक्तमेकं शरीरं कल्प्यते तर्हि शरीरं महद्वा, अणु वा इति विकल्पे, यदि महच्छरीरं स्यात् तर्हि लघुरूप पाषाणान्तर्वर्तितया भेकस्योत्पत्तिः न स्यात् । ईश्वरीयशरीरं यदि अणु तर्हि लघुरूपपाषाणान्तर्वर्तितया भेकशरीरमुत्पादयति इति वक्तुं शक्यते परन्तु एकस्मिन्नेव समये दूरेऽपि कार्यम्भवति अत्रापि भवतीति नोपपद्यते । तस्मात् ईश्वरस्य अतिरिक्तशरीरं न युक्तिपथमारोहति ।

ननु ईश्वरस्य शरीराभावात् तस्य वेदोच्चारणं कथमिति चेन्न । वृद्धाः भूतावेशन्यायेन ईश्वरस्य शरीरमिच्छन्ति। अन्ये तु अदृष्टम् ईश्वरस्य नास्ति, यः सम्सारी तस्यात्मनि अदृष्टमस्ति । तद्वशात् शरीरमीश्वरस्य भवति । ईश्वरस्य संसारित्वं अदृष्टञ्च नास्ति । अतः ईश्वरस्य स्वीयं शरीरन्तु न भवति इति समाहधिरे ।

तथा च श्रुतिः – **'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रुणोत्यकर्णः ।**

**स वेत्ति वेद्यं न च तस्याऽस्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥' इति ।**


ISSN : 2320-740X

# तत्त्वानि

**ब्रह्मानन्दः**

शास्त्रितृतीयवर्षम्

तत्त्वानां सङ्ख्याविचारे उपनिषत्सु मतभेदो दृश्यते । केचित् चतुर्विंशतितत्त्वानि अङ्गीकुर्वन्ति । केचन षट्त्रिंशत् तत्त्वानि, एवं केचन षण्णवतितत्त्वानि अङ्गीकुर्वन्ति । तदुक्तं वराहोपनिषदि –

**चतुर्विंशतितत्त्वानि केचिदिच्छन्ति वादिनः । केचित्षट्त्रिंशत्तत्त्वानि केचित्षण्णवतीनि च ॥**

१. चतुर्विंशतिः तत्त्वानि यथा– पञ्च ज्ञानेन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । पंच कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि । वायवः पञ्च प्राणापानसमानोदानव्याना इति । पञ्च शब्दस्पर्शरूपरसगन्धाः । मनो बुद्धिरहंकारश्चित्तम् इति । तदुक्तं वराहोपनिषदि –

**तेषां क्रमं प्रवक्ष्यामि सावधानमनाः शृणु । ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः ॥**

**कर्मेन्द्रियाणि पञ्चैव वाक्पाण्यङ्घ्र्यादयः क्रमात् । प्राणादयस्तु पञ्चैव पञ्च शब्दादयस्तथा ॥**

**मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयम् । चतुर्विंशतितत्त्वानि तानि ब्रह्मविदो विदुः ॥**

२. षट्त्रिंशत्तत्त्वानि यथा– उक्तैः चतुर्विंशतितत्त्वैः सह पृथिवीजलतेजोवाय्वाकाशानि पञ्च भूतानि, देहत्रयं– स्थूलदेहः, सूक्ष्मदेहः, कारणदेहः इति, अवस्थात्रयं जाग्रत्, स्वप्नः सुषुप्तिः इति । तदुक्तं वराहोपनिषदि–

**एतैस्तत्त्वैः समं पञ्चीकृतभूतानि पञ्च च । पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥**

**देहत्रयं स्थूलसूक्ष्मकारणानि विदुर्बुधाः । अवस्थात्रितयं चैव जाग्रत्स्वप्नसुषुप्तयः ॥**

**आहत्य तत्त्वजातानां षट्त्रिंषत्मुनयो विदुः ।**

३. षण्णवति तत्त्वानि यथा षड्भावविकृतयः अस्तित्वं, उत्पत्तिः, वृद्धिः, परिणामः, क्षयः, नाशः इति । षडूर्मयः अशना, पिपासा, शोकमोहौ, जरा, मृतिः इति । त्वक्, रक्तं, मांसमेदोमज्ज्ञास्थीनि इति षड्कोशाः । कामः, क्रोधः, लोभः, मोहः, मदो मात्सर्यम् एते षड् रिपवः । विश्वः, तैजसः, प्राज्ञः इति जीवत्रयम् । सत्त्वरजस्तमांसि इति गुणत्रयम् । प्रारब्धागाम्यार्जितानि इति कर्मत्रयम् । वचनादानगमनविसर्गानन्दाः पञ्च । सङ्कल्पोऽध्यवसाश्च अभिमानोऽवधारणा इति चतुष्टयं, मुदिता करुणा मैत्री उपेक्षा इतिचतुष्टयं, दिक्–वातः–अर्कः–प्रचेताः–अश्विनौ–वह्निः–इन्द्रः–उपेन्द्रः–मृत्युः

तथा चन्द्रः–चतुर्वक्त्रः–रुद्रः–क्षेत्रज्ञः–ईश्वर इति चतुर्दश । आहत्य षष्ठिः पूर्वोक्तैः षट्त्रिंशत्तत्वैः सह षण्णवति तत्त्वानि ।

**पूर्वोक्तैस्तत्त्वजातैस्तु समं तत्त्वानि योजयेत् ॥**

**षड्भावविकृतिश्चास्ति जायते वर्धतेऽपि च । परिणामं क्षयं नाशं षड्भावविकृतिं विदुः ॥**

**अशना च पिपासा च शोकमोहौ जरा मृतिः । एते षडूर्मयः प्रोक्ताः षट् कोशानथ वच्मि ते ॥**


ISSN : 2320-740X

**त्वक् च रक्तं मांसमेदोमज्ज्ञास्थीनि निबोधत । कामक्रोधौ लोभमोहौ मदो मात्सर्यमेव च ॥**

**एतेऽरिषड् वा विश्वश्च तैजसः प्राज्ञ एव च । जीवत्रयं सत्त्वरजस्तमांसि च गुणत्रयम् ॥**

**प्रारब्धागाम्यर्जितानि कर्मत्रयमितीरितम् । वचनादानगमनविसर्गानन्दपञ्चकम् ।**

**सङ्कल्पोऽध्यवसायश्च अभिमानोऽवधारणा । मुदिता–करुणा–मैत्री–उपेक्षा च चतुष्टयम् ॥**

**दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमृत्युकाः । तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः ॥**

**आहत्य तत्त्वजातानां षण्णवत्यस्तु कीर्तिताः । पुर्वोक्ततत्त्वजातानां वैलक्षण्यमनामयम् ॥**

***

## "भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि" इति सूत्रार्थविचारः

**मुकेशकुमारशर्मा,**

शास्त्रिद्वितीयवर्षम्

**"भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि"** सूत्रेऽस्मिन् भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणाम् अपि इति पदच्छेदः, त्रिपदात्मकं सूत्रमिदम् । पाणिनीयाष्टकेऽङ्गाधिकारे सप्तमाध्यायस्य तृतीयपादे सप्तचत्वारिंशत्तममिदं सूत्रम् । भस्त्रा च एषा च अजा च ज्ञा च द्वा च स्वा च एतेषां षण्णां इतरेतरयोगद्वन्द्वः, भस्त्रैषाजाज्ञाद्वास्वाः, तेषां भस्त्रैषाजाज्ञाद्वास्वानाम्, इति यद्यपि प्राप्नोति किन्तु सूत्रे भस्त्रैषाजाज्ञाद्वास्वा इति लुप्तषष्ठीकं पदम् । सूत्रे द्वा इत्यत्र कृतटाम्निर्देशः । नञ्पूर्वं यस्मात् सः नञ्पूर्वः, तेषां नञ्पूर्वाणाम् इति षष्ठ्यन्तं पदम् । अपि इति अव्ययम् ।

अत्र सूत्रे पूर्वसूत्रात् **"प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" (पा. सू.०७–०३–४४)** इत्यतः अतः इति इदिति चानुवर्तते, **"उदीचामातः स्थाने यकपूर्वायाः" (पा. सू.०७–०३–४६)** इत्यस्मात् उदीचामित्यनुवर्तते । एवञ्च सूत्रार्थः – एषां भस्त्रादीनाम् अत इद्वा स्यादिति फलति । वस्तुतस्तु सूत्रमिदम् अङ्गाधिकारे पठितम् अतः **"पदाङ्गाधिकारे तस्य च तदन्तस्य च" (प. शे.२९)** इति न्यायेन भस्त्राद्यन्तशब्दानाम् अत इद् वा स्यात् इति यद्यपि फलति । एवञ्च भस्त्राद्यन्तस्य नञ्पूर्वस्य अभस्त्रा इत्यादेरपि इत्वं सिध्यति । एवम् इत्वे सिद्धे सूत्रे नञ्पूर्वाणाम् इति कुतः इति चेत् आहुः ग्रन्थकाराः नञ्पूर्वाणामपि इति स्पष्टार्थम् इति । यद्यपि **"पदाङ्गाधिकारे तस्य च तदन्तस्य च"** इति तदन्तविधिनैव भस्त्राद्यन्तस्य ग्रहणं सम्भवति तर्हि केवलस्य भस्त्राशब्दस्य विकल्पेन इत्वं न स्यात् खलु, इति चेत् तस्य समाधानम् आह **"व्यपदेशिवदेकस्मिन्" (प. शे.३०)** इति परिभाषया केवलस्यापि भस्त्राशब्दादेः इत्वं सिध्यति । अतः सूत्रे गृहीतं नञ्पूर्वाणामपि इति पदं नापेक्षते इति तदा तत्तु स्पष्टार्थमेव।

ननु **"सिद्धे सति आरभ्यमाणो विधिः नियमाय भवति"** इति नञ्पूर्वाणामिति पदं नियमाय भवतु । कोऽसौ नियमः इति चेत् आह पदाङ्गाधिकारे इत्येव सिद्धे नञ्पूर्वाणामपि इति विधानसामर्थ्यात् भस्त्रादिषण्णां शब्दानां यदि विकल्पेन इत्वं भवति तर्हि नञ्पूर्वाणामेव इति । तेन अभस्त्रिका अभस्त्रका इत्यादिरूपं सिद्ध्यति ।



ISSN : 2320-740X

केवलभस्त्राशब्दस्य इत्वं न स्यात् तदा इति चेत् सूत्रे अपि इति शब्दबलात् केवलभस्त्राशब्दस्यापि इत्वं भवत्येव । तेन भस्त्रिका, भस्त्रका इत्यपि सिद्ध्यतः ।

अत्र समाधानम् आह यद्यपि एवं नञ्पूर्वाणां तद्ग्रहीतानाञ्च इत्वं विकल्पेन सिद्ध्यति, किन्तु निर्भस्त्रिका, निर्भस्त्रका इति च रूपे न स्याताम् । अत्र नञ्पूर्वत्वमपि नास्ति, केवलभस्त्राशब्दोऽपि नास्ति । अतः नञ्पूर्वाणामपि इति, यत् तत् स्पष्टार्थमेव इति सिद्धान्तः ।

**भस्त्राग्रहणं सूत्रे कुतः इति विचारः प्रवर्तते ।**

भस्त्राशब्दः अभाषितपुंस्कः अस्ति । अभाषितपुंस्को नाम भाषितः पुमान् यस्मिन् तद्भाषित पुंस्कम्, तदस्यास्तीति सः भाषितपुंस्कः, न भाषितपुंस्कः अभाषितपुंस्कः इति व्युत्पत्या यः शब्दः नित्यस्त्रीलिङ्गे वर्तते, सः अभाषितपुंस्क इत्युच्यते। भस्त्राशब्दः नित्यस्त्रीलिङ्गे वर्तते । अतः भस्त्र इति प्रातिपदिकात् टापि सवर्णदीर्घे भस्त्रा इति जाते।स्वार्थे कपि **“अभाषितपुंस्काच्च” (पा. सू.०७-०३-४८)** इति सूत्रेणैव सिद्धे भस्त्राग्रहणं व्यर्थं खलु इति चेत् दीक्षिताः मूले एव अवोचन् भस्त्राग्रहणम् उपसर्जनार्थम् इति । अन्यस्य तु **“अभाषितपुंस्काच्च”** इति उत्तरसूत्रेणैव सिद्धमिति । केवलभस्त्राशब्दः अभाषितपुंस्कः वर्तते। परन्तु भस्त्रायाः निर्गता इति विग्रहे **“निरादयः क्रान्ताद्यर्थे पञ्चम्या” (वा. सू. १३३९)** इति वार्तिकेन समासे निर्भस्त्रा इति रूपम् । इदानीं निर्भस्त्रा इति प्रातिपदिकम् उपसर्जने वर्तते । भाषितपुंस्कः वर्तते इत्यर्थः । अतः **“अभाषितपुंस्काच्च”** इति सूत्रेण इत्वं न प्राप्नुयात् तदर्थं भस्त्राग्रहणं सूत्रे अकारि। । तथा हि निर्भस्त्रा इत्यस्मात् स्वार्थे कप्रत्यये **“केऽणः”** इति ह्रस्वे विशिष्टात् टापि विकल्पेन इत्वे निर्भस्त्रिका, तदाभावे निर्भस्त्रका इति रूपं च सिद्ध्यतः । केवलभस्त्राशब्दस्य तु भस्त्रा इत्यस्मात् स्वार्थे कप्रत्यये **“केऽणः”** इति ह्रस्वे टापि **“अभाषितपुंस्काच्च”(पा-सू)** इत्यनेन इत्वे भस्त्रिका, भस्त्रका एवमेव परमभस्त्रिका, परमभस्त्रका इति रूपं च सिद्ध्यतः ।

**सूत्रे एषाद्वा एतयोः ग्रहणं किमर्थमिति विचारः ।**

एतद्शब्दः द्विशब्दश्च सर्वादिगणे पठितः, तयोः **“अव्ययसर्वनाम्नामकच् प्राक्टेः” (पा. सू.०५-०३-७१)** इति टेः प्राक् अकचि एतकद् इति रूपम् । तस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां सुपि **“त्यदादीनामः” (पा. सू.०७-०२-१०२)** इति त्यदाद्यत्वे **“अतो गुणे” (पा. सू.०६-०१-९७)** इति पररूपे **“तदोः सः सावनन्त्ययोः” (पा. सू.०७-०२-१०६)** इति सत्वषत्वयोष्टापि च एषका इति रूपं साधितम् । न एषका इति विग्रहे “**नञ्” (पा. सू.०२-०२-०६)** इति नञ्तत्पुरुषे कृते **“नलोपो नञः” (ष्टा. सू.०६-०३-७३)** इति सूत्रेण नञः नकारस्य लोपे **“तस्मान्नुडचि” (पा. सू.०६-०३-७४)** इति नुटि अनेषका इति रूपम् । तथा च परमश्चासौ एषका च इति कर्मधारये परमैषका इति च । अत्र विकल्पेन इत्वं न भवति । एषाद्वा एतयोस्तु सपूर्वयोः नेत्वम् इति उक्तत्वात् । एवमेव अद्वके, परमद्वके इत्यत्रापि विकल्पेन नेत्वम् इति द्रष्टव्यम् । अपि च **“प्रत्यस्थात्कात्पूर्वस्यात इदाप्यसुपः”** इति सूत्रेणापि नित्यं इत्वं न भवति कुतः? इति चेत् आह अत्र यः टाप् वर्तते सः सुपः परो वर्तते ।


ISSN : 2320-740X

**"प्रत्यस्थात्कात्पूर्वस्यात इदाप्यसुपः"** इति सूत्रे असुपः इति प्रतिषेधात् । अतः सुपः परः टाप् अस्ति इति कृत्वा इत्वं न भवति । एवं च समासस्थले किञ्चिद् पूर्वपदस्य एषाद्वा एतयोः इत्वं न भवतु इत्येतदर्थम् एतयोः ग्रहणम् अत्र कृतम् ।

अत्र पूर्वपक्षी आह एतद् सु इति दशायां त्यदाद्यत्वे अदन्तत्वम् आश्रित्य टाप् भवतु, सः कथं सुपः परः स्यात् इति। अकचि सत्वषत्वे च एषका सु इत्यवस्थायां यः टाप् अस्ति सः सुपः परो नास्ति । अतः इत्वं विकल्पेन प्रवर्तताम् इति । समासे परम सु एतद् सु इत्यवस्थायां **"सुपो धातुप्रातिपदिकयोः"** (पा. सू.०२-०४-७१) इति सुपः लुक् प्राप्नोति त्यदाद्यत्वञ्च प्राप्नोति । अन्तरङ्गत्वात् आदौ त्यदाद्यत्वं भवति, ततः पररूपे परम सु एतक सु टापि **"तदोः सः सावनन्त्ययोः"** इति सूत्रेण तकारस्य सत्वे सकारस्य षत्वे परम सु एषका सु इत्यवस्थायां सुपः परः टाप् नास्ति खलु अतः इत्वं प्रवर्तताम् इति तस्याशयः।

सिद्धान्ती आह परम सु एतद् सु इत्यवस्थायां यद्यपि अन्तरङ्गशास्त्रं **"त्यदादीनामः"** इति, बहिरङ्गकार्यं **"सुपो धातुप्रातिपदिकयोः"** इति, तथापि **"अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधते"** (प.शे.५२) इति न्यायेन पूर्वं लुगेव प्रवर्तते । ततः विशिष्टात् सुपि परमैतद् सु इत्यवस्थायां अकच्त्यदाद्यत्वपररूपटाप्सत्वषत्वेषु कृतेषु परमैषका इति। अत्र पूर्वं सु आसीत्, सः **"प्रत्ययलोपे प्रत्यलक्षणम्"** (पा.सू.०१-०१-६२) इत्यनेन आनीयते इदानीं सुपः परे टाप् भवति । अतः इत्वं नास्ति अत एव अवादि मूले अन्तर्वर्तिनीं विभक्तिमाश्रित्य **"असुपः"** इति प्रतिषेधात् नेत्वम् इति ।

संख्यावाचिनित्यद्विवचनान्तात् द्विशब्दात् अकचि सुपि द्वकि औ ततः टापि औङः शीभावे विकल्पेन इत्वे द्विका ई गुणे द्विके इत्वाभावे द्वके इति च रूपम् । न सु द्वकि औ इत्यवस्थायां अन्तरङ्गानपि इति न्यायेन पूर्वं लुकः एव प्रवृत्तौ अद्वकि इति रूपम् । पुनः औङि अद्वकि औ इत्यवस्थायां त्यदाद्यत्वपररूपटाब्शीभावगुणेषु कृतेषु अद्वके इति रूपम् । एवं परमद्वके इत्यपि । अत्रापि असुपः इति निषेधात् इत्वं न भवति । केवलैतच्छब्दात् अकजत्वटाब्सत्वषत्वेषु कृतेषु एषका सु इत्यवस्थायां प्रत्ययस्थात् इति नित्यमित्वे प्राप्ते विकल्पेन इत्वे एषिका, एषका इति रूपे । एवमेव द्विके द्वके इत्यत्रापि द्रष्टव्यम् ।

